आई.एस.एस.एन :२४५८-२०१२

# स्नीथिका

अन्ताराष्ट्रिय-बह्वानुशासिक-बहुभाषिक-वार्षिक-शोधपत्रिका

( पुनरीक्षिता )

संख्या -२०२०

मुख्यसम्पादकः -

डॉ रातुलबुजरबरुवा

सम्पादकौ -

डॉ कमललोचनआत्रेयः

डॉ देवब्रतबाडइ

प्रकाशकः -

संस्कृतसाहित्यविभागः

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

नलबारी, असमप्रदेशः

ISSN : 2454-2881

# स्नीथिका

अन्ताराष्ट्रिय-बह्वानुशासिक-बहुभाषिक-वार्षिक-शोधपत्रिका
( पुनरीक्षिता )

## संख्या- २०२०

मुख्यसम्पादकः
ड॰ रातुलबुजरबरुवा

सम्पादकौ
ड॰ कमललोचनआत्रेयः
ड॰ देवव्रतबाडइ

प्रकाशकः
संस्कृतसाहित्यविभागः
कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः
नलबारी, असमप्रदेशः

# सम्पादनसमितिः


मुख्योपदेष्टा

**प्रो. दीपककुमारशर्मा**

**कुलपतिः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः**

**उपदेष्टारः**

प्रो. मालिनीगोस्वामी, भूतपूर्वकुलपतिः, असममहिलाविश्वविद्यालयः, असमः

प्रो. अशोककुमारगोस्वामी, प्राक्तनविभागाध्यक्षः, संस्कृतविभागः, गौहाटीविश्वविद्यालयः, गुवाहाटी, असमः

प्रो. सत्यनारायणचक्रवर्ती, सेवानिवृत्ताचार्यः, रवीन्द्रभारतीविश्वविद्यालयः, कलिकाता

प्रो. रमाकान्तपाण्डेयः, आचार्यः, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः (जयपुरपरिसरः)

प्रो. भागीरथी विश्वासः, आचार्या, संस्कृतविभागः, असमविश्वविद्यालयः, शिलचरः

प्रो. निर्माल्यनारायणचक्रवर्ती, आचार्यः, दर्शनशास्त्रविभागः, रवीन्द्रभारतीविश्वविद्यालयः, कलिकाता

ड॰ हेमेन्द्रशर्मा, कुलसचिवः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

ड॰ सुशान्तकुमारकाश्यपः, परीक्षानियन्त्रकः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

मुख्यसम्पादकः

ड॰ रातुलबुजरबरुवा

विभागाध्यक्षः, संस्कृतसाहित्यविभागः

सम्पादकौ

ड॰ कमललोचनआत्रेयः

सहायकाचार्यः, संस्कृतसाहित्यविभागः

ड॰ देवव्रतबाडइ

सहायकाचार्यः, संस्कृतसाहित्यविभागः

सदस्याः

**ड॰ नुरिमा इयाच्मिन**

सहायकाचार्या, संस्कृतसाहित्यविभागः

**ड॰ छविलाल उपाध्यायः**

अतिथि-अध्यापकः

संस्कृतसाहित्यविभागः

**ड॰ पमीतालुकदारः**

सहायकाचार्या, संस्कृतसाहित्यविभागः

**ड॰ चम्पक कलिता**

अतिथि-अध्यापकः

संस्कृतसाहित्यविभागः

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

## पुनरीक्षकसमितिः

१. **प्रो. भागीरथिनन्दः,** आचार्यः, साहित्यविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

२. **प्रो. शान्ति पोखरेल,** विभागाध्यक्षः, संस्कृतविभागः, असमविश्वविद्यालयः, शिलचरः

३. **ड॰ रुणिमा शर्मा,** विभागाध्यक्षा, संस्कृतविभागः, भट्टदेवविश्वविद्यालयः, पाठशाला, असमः

४. **ड॰ जगदीश शर्मा,** सहाचार्यः, संस्कृतविभागः, गौहाटीविश्वविद्यालयः, गुवाहाटी

५. **ड॰ अलका दास,** सहाचार्या, शिक्षाविभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः

६. **ड॰ नारायणभट्टराई,** सहायकाचार्यः, वेदविभागः, काशीहिन्दूविश्वविद्यालयः, वाराणसी

७. **ड॰ गोविन्दशर्मा,** सहायकाचार्यः, संस्कृतविभागः, असमविश्वविद्यालयः, शिलचरः

**प्रकाशकालम् - अक्टूबर, २०२०**

© ड॰ देवव्रतबाडइ, सहायकाचार्यः, संस्कृतसाहित्यविभागः

**मूल्यम् - ८०० ( अष्टशतरूप्यकाणि ) मात्रम्**

**मूद्रितम् - निउडिजिटालकम्पुटार, नलबारी, असमः**

**प्रज्ञापितम्-**

लेखेषु यन्मतानि प्रकाशितानि तानि लेखकानामेव, न तु सम्पादनसमित्याः।

प्रकाशकः - संस्कृतसाहित्यविभागः, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी, असमप्रदेशः

ISSN : 2454-2881

# SNĪTHIKĀ

An International
Multi-Disciplinary and Multi-Lingual Annual
Research Journal
(Peer-reviewed)

**2020**

Chief Editor
**Dr. Ratul Bujar Baruah**

Editors:
**Dr. Kamal Lochan Atreya**
**Dr. Debabrata Barai**

Published by:
**Department of Sanskrit (Sahitya)**
**Kumar Bhaskar Varma Sanskrit and Ancient Studies University,**
**Nalbari, Assam**

# Editorial Board

## Chief Advisor

**Prof. Dipak Kumar Sharma**

*Hon'ble Vice chancellor, KBV Sanskrit & AS University, Nalbari, Assam*

## Advisors

**Prof. Malini Goswami,** Former Vice-chancellor, Assam Women's University, Jorhat, Assam
**Prof. Ashok Kumar Goswami,** Former HoD, Department of Sanskrit, Gauhati University, Guwahati
**Prof. Satyanaranayana Chakraborty,** Rtd. Prof. of Sanskrit, Rabindra Bharati University, Kolkata
**Prof. Ramakant Pandey,** Professor, National Sanskrit University (Jaipur Campus)
**Prof. Bhagirathi Biswas,** Professor and Former HoD of Sanskrit, Assam University, Silchar, Assam
**Prof. Nirmalya Narayan Chakraborty,** Dept. of Philosophy, Rabindra Bharati University, Kolkata
**Dr. Hemendra Sarma, Registrar,** KBV Sanskrit & AS University, Nalbari, Assam
**Dr. Sushanta Kumar Kashyap,** Controller of Examinations, KBV Sanskrit and AS University, Nalbari, Assam

## Chief Editor

**Dr. Ratul Bujar Baruah**
Head, Department of Sanskrit (Sahitya)
KBV Sanskrit & AS University, Nalbari

## Editors

**Dr. Kamal Lochan Atreya**
Assistant Prof., Sanskrit (Sahitya)
KBV Sanskrit & AS University, Nalbari

**Dr. Debabrata Barai**
Assistant Prof., Sanskrit (Sahitya)
KBV Sanskrit & AS University, Nalbari

## Members

**Dr. Nurima Yeasmin**
Assistant Prof., Sanskrit (Sahitya)
KBV Sanskrit & AS University, Nalbari

**Dr. Pomi Talukdar**
Assistant Prof., Sanskrit (Sahitya)
KBV Sanskrit & AS University, Nalbari

**Dr. Chabilal Upadhyaya**
Guest Lecturer, Sanskrit (Sahitya)
KBV Sanskrit & AS University, Nalbari

**Dr. Champak Kalita**
Guest Lecturer, Sanskrit (Sahitya)
KBV Sanskrit & AS University, Nalbari

# Peer-Review Board

**Prof. Bhagirathi Nanda,**
Professor, Department of Sahitya , Shri Lal Bahadur Shastri National Sanskrit University, New Delhi
**Prof. Shanti Pokhrel,**
Professor & Head, Department of Sanskrit, Assam University, Silchar.
**Dr. Runima Sharma,**
Head, Department of Sanskrit, Bhattadev University, Bajali
**Dr. Jagadish Sharma,**
Associate Professor, Department of Sanskrit, Gauhati University, Guwahati.
**Dr. Alaka Das,**
Associate Professor, Department of Education, KBV Sanskrit & AS University, Nalbari.
**Dr. Narayan Bhattarai,**
Assistant Professor, Department of Veda, Banaras Hindu University, Varanasi.
**Dr. Govind Sharma,**
Assistant Professor, Department of Sanskrit, Assam University, Silchar.

© Dr. Debabrata Barai, Assistant Professor, Department of Sanskrit (Sahitya), KBVS&AS University

**Printed by:**
New Digital Computer, Nalbari, Assam

Price : Rs. 800/- (Eight Hundred only)

**Published By:**
Department of Sanskrit (Sahitya)
Kumar Bhaskar Varma Sanskrit and Ancient Studies University, Nalbari, Assam

**Disclaimer :**

The opinion expressed in the articles are of the contributors and do not necessarily reflect the opinion and views of the Editorial Board.

कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः
KUMAR BHASKAR VARMA SANSKRIT AND ANCIENT STUDIES UNIVERSITY
NAMATI, NALBARI - 781337, ASSAM
Website- www.kbvsasun.ac.in • Email Id- kbvsasun@rediffmail.com
Prof. Dipak Kumar Sharma
*Vice Chancellor*
E-mail: dipaksharma2@rediffmail.com



# शुभाशंसनम्

भाषा हि मानवानां भावप्रकाशिका इति सर्वे जानन्ति खलु। भाषाविचारयोः क्षेत्रं सर्वदा विकाशशीलं वर्तते। संस्कृतवाङ्मयस्य विशालत्वं समग्रविश्वस्य कृतेऽस्ति अतीवाश्चर्यकरम्। भारतवर्षं यादृशं प्राचीनमस्ति तादृशमेव पुरातनमस्ति संस्कृतम्। संस्कृतं विना आधुनिकानां भारतीयभाषाणां पुष्टिः न सम्भवति। संस्कृतभाषासाहित्यस्य ज्ञानं विना भारतवर्षस्य ज्ञानधारायाः समुद्घाटनं नैव सम्भवम्। अस्माकं विश्वविद्यालयस्य संस्कृतसाहित्यविभागपक्षतः 'स्नीथिका' इत्यभिधेया अन्ताराष्ट्रियगवेषणापत्रिका प्रकाशमानास्तीति श्रुत्वा महानेवानन्दः सञ्जायते। अस्याः पत्रिकायाः सम्पादनकार्यसम्बद्धान् सर्वान् प्रति वर्धापनवचनं व्याहरामि। पत्रिकायाः माध्यमेन ज्ञानसामान्यस्य विशेषतः संस्कृतसंस्कृत्योः सर्वत्र सञ्चारणमस्तु इति कामये।

दीपककुमारशर्मा 20.6.2020

(प्रो. दीपककुमारशर्मा)
कुलपतिः
कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः,
नलबारी, असमप्रदेशः

# प्राक्कथनम्

संस्कृतसाहित्यं भारतीयसभ्यतायाः संस्कृतेः च सुविचाराणां सुन्दरं दर्पणमस्ति। प्राचीनकालादेव संस्कृतभाषा धर्मनिरपेक्षभाषारूपेण आद्रियते तथा च भारतवर्षस्य ज्ञानधारायाः अपूर्वकोषस्य समुद्घाटनार्थं महत्वपूर्णं योगदानं कुर्वती अस्ति। संस्कृतभाषा न केवलं भारतवर्षस्य अपि तु सुविशालतायाः सामर्थ्यस्य च दिशा विश्वभाषाणां मूर्ध्नि विराजते। भारतवर्षे विज्ञानसम्बद्धानां ग्रन्थानां रचनं संस्कृतभाषायामेवाऽभवत्। गणितं रसायनं खगोलविज्ञानं वनस्पतिविज्ञानञ्चेत्यादिविज्ञानविषयाः संस्कृते बहुचर्चिताः सन्ति। संस्कृते लीलावत्यादयोऽनेके ग्रन्थाः गणितस्य सिद्धान्तान् प्रमाणीकुर्वन्ति। प्राचीनमनीषिभिः समुद्भावितानां अमूल्यानां तत्त्वानां प्रासङ्गिकता अवश्यमेव प्रदर्शनीया। साम्प्रतं राष्ट्रस्य शिक्षानीतिनिर्धारकैः संस्कृतात्मकज्ञानभाण्डारः कथं प्रासङ्गिको भवति इति चर्चितः। संस्कृतभाषासाहित्यस्य अनुसन्धानं विना भारतवर्षस्य प्राचीनज्ञानधारायाः चर्चा नैव भविष्यति।

वर्षादस्मात् कुमारभास्करवर्मसंस्कृत-पुरातनाध्यनविश्वविद्यालयस्य संस्कृतसाहित्यविभागात् 'स्नीथिका' नामिका अन्ताराष्ट्रियगवेषणापत्रिका प्रकाश्यते। पत्रिकायाः शोधपत्राणां सारवस्तूनि वैचित्र्यपूर्णानि भवन्ति। अस्यां पत्रिकायां वेद-काव्य-दर्शन-भारतीयज्ञानवैभवादिविषयकाः विंशतिसंख्यकाः प्रबन्धाः विराजन्ते। भारतवर्षस्य विविधप्रदेशेभ्योऽपि वरेण्याः पण्डिताः प्रबन्धान् प्रेषितवन्त इति ते सर्वे कृतज्ञतार्हाः। सीमिते समये अस्याः पत्रिकायाः सम्पादनं न सुकरमिति सुविदितमेव। अतः अशुद्धयः संजाताः स्युरिति मन्ये। ते सर्वे दोषाः गुणीजनैः क्षन्तव्याः। अस्याः पत्रिकायाः प्रकाशनकार्येण सह युक्तान् सर्वान्नेव कार्तज्ञमभिनन्दनञ्च विज्ञापयामि।

पत्रिकायाः प्रकाशनेन सुरभारत्याः सेवकाः नितरां बहूपकृताः भविष्यान्तीति वक्तुं शक्यते। 'स्नीथिका' माध्यमेन संस्कृतस्य भारतीयसंस्कृतेश्च पुनः पुनः संबर्द्धनमस्तु। पत्रिकायाः विभिन्नदिशं प्रति विश्वविद्यालयस्य परमादरणीयकुलपतिमहाभागानां मार्गदर्शनमस्माभिः प्राप्तम्। अतः कुलपतिवर्यान् प्रति

कार्तज्ञ्यं प्रकाशयामि। पत्रिकायाः प्रकाशनार्थं विश्वविद्यालयस्य कुलसचिवाः ड० हेमन्द्रशर्मामहाभागाः अतीव तत्पराः आसन्। असौ हि धन्यवादार्हः। विश्वविद्यालस्य परीक्षानियन्त्रकाः ड० सुशान्तकुमारकाश्यपमहाभागाः मार्गदर्शकरूपेण स्थित्वा अस्मान् प्रोत्साहयन्ति। अतः तान् प्रत्यपि धन्यवादवचनं कथयामि।

पत्रिकायाः सम्पादकौ ड॰ कमललोचनआत्रेय ड॰ देवव्रतवाइड च अस्मद्पक्षतः कृतज्ञतार्हौ।

ड॰ रातुलबुजरबरुवा
मुख्यसम्पादकः, स्नीथिका

# सम्पादकीयम्

ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः

'सरस्वती श्रुतिमहतां महीयताम्' इति कालिदासीयभणितिं पुरस्कृत्य संस्थापितस्य कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य संस्कृतसाहित्यविभागस्य स्नीथिका-नामधेयप्रथमपत्रिकायाः प्रकाशनस्य प्रागवसरे वयं सर्वे विभागीयजना नितरामानन्दं गौरवञ्चानुभवामः। शोधकार्यं हि विश्वविद्यालयस्यैकस्य चक्षुरिति वयं मन्यामहे। इतः पूर्वमपि विश्वविद्यालयेऽस्मिन् २०१८-२०१९ शिक्षावर्षत उर्जोस् इत्येका शोधपत्रिका प्रकाश्यते। किंतु विभागीयशोधपत्रिकारूपेणादिमतमेयं स्नीथिकाभिधशोधपत्रिकेति नूनं गौरवस्य विषयोऽयमस्माकं सर्वेषां कृते। पत्रिकायामस्यां भारतवर्षस्य विविधक्षेत्रस्थविदुषां विदुषीणाञ्च ज्ञानगर्भशोधपत्राणि संकलितानि वर्तन्ते। सर्वेऽपि शोधपत्रलेखका अस्माकं धन्यवादार्हा अभिनन्दनीयाश्च। विश्वविद्यालयस्य कुलपतिवर्यस्यानुप्रेरणया कुलसचिव-परीक्षानियन्त्रकवर्ययोः प्रोत्साहनेन च पत्रिकाया अस्याः प्रकाशने समर्था वयमित्येतेभ्यः त्रिमूर्त्तिभ्यो भूयस्यः कृतज्ञताः समर्प्यन्ते। विभागाध्यक्षस्य ड॰ बुजरबरुवामहाभागस्य यथोचितमार्गदर्शनेन तथा चान्येषां विभागीयशिक्षकाणां ड॰ नुरिमा इयाचमिन्-ड॰ पमी तालुकदार-ड॰ छविलालउपाध्याय-ड॰ चम्पककलितादीनां सक्रियसहयोगेनैव शोधपत्रिकाप्रकाशनकार्यमिदं साफल्यमाप्नोति। अत एतेभ्यः सर्वेभ्योऽपि हार्दिकसाधुवादा विज्ञाप्यन्ते। अपि च ये विद्वंसो विदुष्यश्चास्माकमनुरोधमङ्गीकृत्य शोधपत्राणां पुनरीक्षणरूपं महत्कार्यं सम्पाद्य अस्माननुगृहीतवन्तः तेभ्यः सर्वेभ्योऽपि हार्दं कार्तज्ञं निवेद्यते। पुनश्च टंकणमुद्रणादिकार्ये साहाय्यं कृतवद्भ्यो निउ-डिजिटेल-कम्पिउटार इतस्य सत्वाधिकारिणे जगदीशदासाय अन्यकर्मचारिभ्यश्चापि धन्यवादाः प्रकाश्यन्ते। विश्वविद्यालयस्य विभागान्तरीया अध्यापकाध्यापिकाः कर्मचारिणः बनजित् राभा अन्ये शुभाकांक्षिणश्च ये मनोवाक्कर्मभिरस्याः शोधपत्रिकायाः प्रकाशने प्रत्यक्षतया परोक्षतया वा सहयोगं कृतवन्तः, तेभ्यः सर्वेभ्योऽपि साधुवादाः प्रकट्यन्ते। अन्तेऽस्माकमनवधानवशादज्ञानवशाद्वात्रावशिष्याः सर्वेऽपि दोषाः सुधिजनैः क्षन्तव्या इति निवेदनपुरस्सरं शोधपत्रिकेयं विदुषां विदुषीणां शिक्षकाणां शोधकर्तृणां समेषां पाठकानाञ्च कृते लाभदायिनी भविष्यतीत्याशां मनसि निधाय भगवतः चरणकमलयोर्मानसकुसुमाञ्जलिं विनिवेद्यात्रैव विरमावः।

"समानी व आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वः सुसहासति॥"

ड॰ कमललोचनआत्रेयः
ड॰ देबव्रतबाडइ
सम्पादकौ, स्नीथिका

# सूचीपत्रम्


| | | |
|---|---|---|
| ✸ साहित्यरत्नाकरे गुणालङ्कारविवेचनम् | ✍ प्रो. भागीरथिनन्दः | 1 |
| ✸ संस्कृतमहाकाव्येषु महात्मागान्धी | ✍ प्रो. रमाकान्तपाण्डेयः | 11 |
| ✸ ऋग्वेदे प्रयुक्तस्य ध्रुवपदस्य अर्थः – एको विमर्शः | ✍ प्रो. कमलेशकुमार छ. चोकसी | 17 |
| ✸ व्यवहारिकजीवनोपयुक्ताः नीतिश्लोकाः | ✍ प्रो. शान्ति पोखरेल | 23 |
| ✸ मनोरञ्जनशास्त्रिणः पताकाम्नाये दार्शनिकतत्त्वम् | ✍ ड° रातुलबुजरबरुवा | 29 |
| ✸ प्राचीनकामरूपीयलिपिषु पौराणिकाभिषङ्गाः– समीक्षणमेकम् | ✍ ड° रुणिमा शर्मा | 34 |
| ✸ ऋग्वेदस्य इन्द्रसूक्तानि : नायकत्वभावस्य प्रतिफलनानि | ✍ ड° जगदीश शर्मा | 46 |
| ✸ वेदान्तदर्शनभेदस्वरूपविमर्शः | ✍ ड° गोविन्दशर्मा | 52 |
| ✸ नाट्यशास्त्रीयपरम्परायां महापुरुषशंकरदेवस्य अङ्कीयानाटकानि– एका समीक्षा | ✍ ड° कमल लोचन आत्रेयः | 61 |
| ✸ आधुनिकविश्वे जनमानसनिर्माणे उपनिषदीयेन्द्रियज्ञानस्य प्रासङ्गिकता | ✍ ड° बिभूतिलोचनशर्मा | 68 |
| ✸ महाभारतोक्तदिशा करव्यवस्था | ✍ ड° पमी तालुकदारः | 73 |
| ✸ अर्वाचीनसंस्कृतदूतकाव्यपरम्परा | ✍ ड° छबिलाल उपाध्यायः | 80 |
| ✸ वाजसनेयिसंहितास्वरूपम्–एका पर्यालोचना | ✍ ड° मैत्रेयी गोस्वामी | 94 |
| ✸ धर्मशास्त्रदिशा असमीयाविवाहपद्धतिः – एकं विश्लेषणम् | ✍ ड° चम्पक कलिता | 102 |
| ✸ कालिदासस्य काव्ये वर्णिता यौवनकालस्य सार्थकता- एका समीक्षा | ✍ ड° देवव्रतबाडइ | 111 |
| ✸ अथर्ववेदे पर्यावरणम्– एका समीक्षा | ✍ ड° प्रणवज्योति डेका<br>✍ ड° बर्णाली बरठाकुर | 118 |

✸ मनुस्मृतिशास्त्रानुसारं नारी ✍ ड॰ नुरिमा इयाच्मिन 122

✸ संस्काराणां महत्त्वम्–वर्तमानयुगे तेषां प्रासङ्गिकता च ✍ पवनकुमारपाण्डेयः 129

✸ CONCEPT OF ISVARA IN THE PHILOSOPHY OF SANKARA : A STUDY ✍ Dr. Bikash Bhargab Sarma 136

✸ TEXT, CONTEXT AND CONSIDERATION: CONTEXTUALIZING HERMENEUTICS IN THE STUDY OF ANCIENT INDIAN SANSKRIT TEXTS ✍ Ankur Jyoti Bhuyan 141

✸ CONCEPT OF DHANURVEDA AS REFLECTED IN THE AGNIPURĀNA ✍ Dr. Arundhati Goswami 149

✸ DESCRIPTION OF PLANTS AND HERBS FOUND IN BĀṆABHAṬṬA'S WRITINGS ✍ Dr. Nandita Sarmah 158

✸ शोधपत्रलेखकानां सूची 166

# साहित्यरत्नाकरे गुणालङ्कारविवेचनम्

प्रो. भागीरथिनन्दः

शब्दवादिन आलङ्कारिका रमणीयार्थप्रतिपादकस्य शब्दस्य काव्यत्वमामनन्ति। अथ गुणालङ्कारयोः काव्यविशेषणताङ्गीकारे को विशेष इति धर्मसूरिः स्वसाहित्यरत्नाकराख्यग्रन्थे स्वयमाशङ्क्य समाधत्ते यत् न विशेषणाङ्गीकारेऽनुपादेयतेति। अत्र पूर्वपक्षद्वारेणैतदनङ्गीकारे शङ्काद्वयमुत्पादयति अव्यापकत्वात्, अचारुताहेतुत्वादिति। अव्यापकता इति काव्ये गुणालङ्कारयोः। परन्तु नैतद्युक्तम्, निर्गुणालङ्कारशब्दार्थेभ्यो व्यावर्त्तकत्वात्। अयं भावः- "तस्य गुणालङ्काररहितयोः शब्दार्थयोः काव्यव्यवहारनिरासकवादावश्यकत्वम्" इति तत्स्पष्टीकुर्वन् तन्मन्दरटीकाकारः। न चाचारुत्वहेतुत्वम्, तयोः कविताकामिनीरमणीयकताऽऽपादकत्वात्। अत्र स्मर्यन्ते सौन्दर्यमलङ्कारः काव्यशोभायाः कर्तारो धर्मा गुणाः, तदतिशयहेतवस्त्वलङ्काराः, अलङ्कारो हि चारुत्वहेतुः प्रसिद्धः, उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः इत्यादीनि वचनानि प्रसिद्धालङ्कारिकाणाम्। उत्तरपक्षं द्रढयितुं ग्रन्थकृदसौ धर्मसूरिः काव्यालङ्कारसूत्रकारं वामनमुपन्यसतीह पर्याये। तथाहि-

युक्तेरिव रूपमङ्ग............ संश्रयन्ते।।[१]

अर्थात् गुणालङ्कारयोः सन्निवेशेन किमप्यपूर्वं चारुत्वं काव्यस्य भवति। निर्गुणं तु काव्यमलङ्कारयुक्तमपि न शोभावहम्, द्वयोर्गुणालङ्कारयोस्तु काव्येन सह सम्बन्धनिबन्धनादुभयोश्चारुत्वहेतुत्वमिति एतदीय आशयः।

अनयोर्द्वयोर्गुणालङ्कारयोश्चारुत्वहेतुत्वसिद्धेः एकस्याङ्गीकारे कर्तव्ये सति अन्यतर-प्रयोजनप्रतिपत्तिप्रस्तावः सम्पद्येत। अथ च द्वयोरनयोरभेद आकल्प्यते इति पूर्वपक्षः। परन्तु तत्र, उभयोर्मिथो व्यावर्तकधर्मवैविध्यात्। तथा सति शृङ्गित्वसाम्यात् गोमहिषयोः पार्थिवत्वसाम्यात् घटपटयोश्चाभेदो निश्चीयते इति अस्मिन् प्रसङ्गे मन्दरटीकाकारः।

अस्मिंश्च वामनमतानुसृततया भोजराजेन या गुणालङ्कारयोर्व्यावर्तकधर्मता उक्ता, सा सन्निवेश्य निरस्ता। तथाहि भोजराजेन.... "काव्यव्यवहारप्रवर्तका गुणाः, तच्चारुत्वहेतवोऽलङ्कारा इति व्यावर्तकधर्म


ISSN : 2454-2881

उक्तः। एतत् खण्डयतो धर्मसूरेः मतं यथा'' तन्नोपपद्यते। तत् किं सर्वे गुणास्तत्प्रवर्तकाः, कतिपये वा? नाद्यः ''रीतिरात्मा काव्यस्य''[२] इति हि तन्मतम्। रीतयश्च शिलष्टवचनरचनात्मिकाः। ''ताश्च तिस्रः- गौडी, वैदर्भी, पाञ्चाली चेति'' तत्र समग्रगुणा वैदर्भी, ओजःकान्तिमती गौडी, माधुर्यसौकुमार्यधुर्या पाञ्चालीरीतिरिति हि स्थितिः। तत्र साकल्यस्य काव्यव्यवहारप्रवर्तकत्वे गौडीपाञ्चाल्योरव्याप्तिः। न द्वितीयः, अतिव्याप्तेः, यत्किञ्चिद्गुणसत्तामात्रेण यत्र कुत्रापि काव्यव्यवहारप्रसङ्गात्''। [३] इति यद् विमृष्टं धर्मसूरिणा तन्नितरां युक्ततरम्। विमर्शोऽयं काव्यप्रकाशेऽपि दृष्टचरः। एवमलङ्कारलक्षणमपि दूषणीयम्।

वस्तुतस्तु भोजराजकृतलक्षणे काव्यव्यवहारप्रवर्तका गुणाः, तच्चारुताहेतवोऽलङ्कारा इत्यत्र उच्यते- अलङ्कारा गुणविशिष्टकाव्यस्य अविमृष्टगुणकाव्यस्य चारुताहेतवो वा? आद्यपक्षे, किं गुणपदोल्लेखेन? तस्य चारुत्वहेतुत्वासिद्धेः।

द्वितीये तु अलङ्कारस्याढ्यतरतायाः स्वतः सिद्धिरिति अत्रैव ग्रन्थकारस्य विचारणीयमासीत्। गुणालङ्कारसामान्यलक्षणे- ''वयं तु ब्रूमः'' इति स्वसिद्धान्तम्-

समवायवृत्त्या रसोपस्कारकत्वं गुणसामान्यलक्षणम्।
संयोगवृत्त्या रसोपस्कारकत्वमलङ्कारसामान्यलक्षणम्।।[४]

इति सन्दर्शयति ग्रन्थकारः।

अत्र ''काव्यात्मरससमवेतत्वे सति रसोत्कर्षाधायकधर्मत्वं गुणसामान्यलक्षणम्। काव्याङ्ग-शब्दार्थ-संयुक्तत्वे सति रसोत्कर्षकहेतुत्वमलङ्कारलक्षणमित्यर्थः।''[५] इति नौकाटीकाकारः। भट्टोद्भटादीनां ''समवायवृत्त्या शौर्यादयः संयोगवृत्त्या तु हारादय इत्यस्तु गुणालङ्काराणां भेदः, ओजःप्रभृतीनामनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवेषां भेदः''[६] इति प्रलपतां मुखमुद्रणाय अनयोर्गुणालङ्कारयोरत्र भेदकपुरःसरं लक्षणे प्रदर्शिते। मतमिदं धर्मसूरेरपि काव्यप्रकाशानुसारि। यद्यपि काव्यप्रकाशकारेण गुणलक्षणेऽङ्गिनो रसस्याचलस्थितयो गुणाः[७] अलङ्कारलक्षणे सतो रसस्य अङ्गद्वारेण (शब्दार्थ) उपकारका अलङ्कारा [८] इति प्रयोगात् अनयोः रससमवायत्वसंयोगत्वे प्रतीयेते। किंच 'यत्र तु नास्तितत्रोक्तिवैचित्र्यमात्रपर्यवसायिनः। क्वचित्तु सन्तमपि नोपकुर्वन्तीति''[९] अलङ्कारलक्षणकारिकायाः वृत्तौ श्रीमान् मम्मटः प्रस्तौति। एतेनालङ्काराणां संयोगवृत्तिः फलिता।

ननु चित्रमिति ''गुणालङ्कारयुक्तमिति गुणस्याङ्गिरससमवेतत्वात् चित्रेऽपि रसोऽङ्गी इति आस्तां काव्यप्रकाशकारस्याभिमतम्, न, तत्रैव तद्बालबोधिनीकारेण अत्र गुणपदं तद् (शब्दार्थ) व्यञ्जकपरिमिति

[10] स्पष्टीकृतत्वात्। किञ्च शब्दार्थयोः गुणव्यञ्जकत्वमुपचारः[11] परमार्थतस्तु रसे एवेति हेमचन्द्रः। अथ वस्त्वलङ्कारध्वन्योः गुणानां कुत्र स्थितिरिति तत्र शब्दार्थयोरेव ब्रूमः तयोः संलक्ष्यक्रमतया रसध्वनेर्दूरव्यवधानदर्शनात्। तत्तद्रसाश्रयिणस्तत्तद्गुणा इति नाव्याप्तिः, रसमात्राश्रयित्वात्। नैते गुणा वर्णधर्माः। माधुर्यादिविशिष्टरसस्य व्यङ्ग्यत्वेन व्यङ्ग्यगतमाधुर्यस्य व्यञ्जके समारोप्य प्रतीतेः।

अतः सर्वमेतदाकलय्य प्राचीनालङ्कारिकानुरोधेन स्पष्टेयं गुणालङ्कारलक्षणपरा कारिकोपन्यस्तेति साधु।

**गुणालङ्कारयोः धर्मसूरिकृतः पृथक्त्वविवेकः**

माधुर्यादीनां गुणानां वर्णैर्व्यज्यमानानां यदेवाव्यवधानेन रसोपकर्षकत्वं तदेव तेषां रसे समवायवृत्तित्वम्।

उपमादीनामलङ्काराणां तु वाच्यवाचकोपस्कारकाणां यदेवाभिधादिव्यापारव्यवधानं, तदेव तेषां संयोगवृत्तित्वम् इति औपचारिकस्तु गुणेषु शब्दधर्मत्वव्यवहारः।

**गुणानां सङ्ख्याने हेतवः**

आलङ्कारिकैः कृतं गुणसङ्ख्यानं परस्परं भिद्यते। काव्यप्रकाशकारादयः त्रीन् गुणान् प्राहुः। दशगुणान् भोजराजादयः। चतुर्विंशतिरिति विद्यानाथादयः। विंशतिर्वामनादयः। रससमवेतत्वे सति तदुपकारकत्वं गुणत्वमिति। अभिधीयतामत्र साकल्येन एक एव गुणः, तेन च सिद्ध्यतां तत्त्वम्, परन्तु तथा न, तत्तद्रसेषु तत्तद्वर्णद्वारेण एते रससमवायतां भजन्ते।

अनेन, काव्यप्रकाशकारादीनां गुणत्रयं यथेष्टमपि अपरे तत्सङ्ख्याधिक्यं शब्दार्थाश्रयेण निरूपयन्ति वामनादयः प्राञ्चः। एतन्मतं "विशिष्टपदरचनारीतिः, विशेषो गुणात्मा" इति वामनीयसूत्रात् सिद्ध्यति। किञ्च, "गुणानां चैषां द्रुतिदीप्तिविकासाख्यास्तिस्रश्चित्तवृत्तयः क्रमेण प्रयोज्या" इति पण्डितराजोक्त्या गुणेभ्य एतास्तिस्रः प्रकाश्यन्त इति गुणानां त्रिधा भेदः। "चित्तवृत्तयस्त्वनन्ता इति सन्त्वनन्ताः गुणाः इति भवन्मते त्रयः कथमिति शङ्कायां तत्रैव "तत्तद्गुणविशिष्टरसचर्वणाजन्या (एतास्तिस्रः) इति यावदिति पण्डितराजमताङ्गीकारेण नवरसेभ्यः प्रामुख्येन एतासां तिसृणां जन्यत्वात् गुणत्रैविध्यस्वीकारः साधुः। एतेनैतदधिकानां गुणानां निरासः। सम्भवन्त्यपरे चेत्तेषामेष्वन्तर्भावो युक्तः।

अत्रैव धर्मसूरिणा विविधानां गुणसङ्ख्यानभेदः पुरस्कारितः। मम्मटादीनां गुणत्रयवादं सम्मानयन्नसौ चतुर्थं सौशब्द्यमधिकमपरं योजयति। किञ्च नवानां गुणानामन्येषां स्वीकारसहकृततया नामग्राहं पुरस्करोति एषः। सम्प्रति आलोच्यते तत्–


ISSN : 2454-2881

**गुणानां सङ्ख्या-**

प्रतापरुद्रीये विद्यानाथेन चतुर्विंशतिः गुणा गणिताः। ते च-

श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वं तथा कान्तिरुदात्तता।
ओजः सुशब्दता प्रेय और्जित्यमथ विस्तरः।
समाधिः सौक्ष्म्यगाम्भीर्ये संक्षेपो भाविकं तथा।।
सम्मितत्वं तथा प्रौढिरुक्ती रीतिस्तथा गतिः।। इति

एषु माधुर्यौजःप्रसादास्त्रयो मम्मटादिमताः। काव्यप्रकाशानुकारी हेमचन्द्रः स्पष्टं ब्रूते यत् त्रयो न तु पञ्च, दश वा, लक्षणस्य व्यभिचारात्, उच्चमानगुणेष्वेवान्तर्भावात्, दोषपरिहारेण स्वीकृतत्वाच्चेति।[१२] श्लेषसौकुमार्यार्थव्यक्तिसमतौदार्यकान्तिसमाधयः सप्त भोजराजादिस्वीकृताः।[१३]

श्लेषः प्रसाद-समते माधुर्यं सुकुमारता।
अर्थव्यक्तिरुदात्वमोजः कान्तिसमाधयः।।

इत्येते दश शब्दे चार्थे च सम्भवन्तीति आहत्य विंशतिरिति वामनादयः।

तत्र तत्र तत्तद्ग्रन्थेषु गुणानामेतेषां प्रदर्शितानि लक्षणानि प्रायः समानानि। वामनादिसम्मतानां विंशतिगुणानां यथासम्भवमन्तर्भावो मम्मटविश्वनाथादिभिः त्रिषु माधुर्यादिगुणेषु कृतः।[१४] हेमचन्द्रस्तु पिष्टमधिकं न पेषयन् सूक्ष्मरूपेणैतत् समर्थयति। पण्डितराजस्तु विचार-पेशलया गिरा सर्वान् विंशतिगुणान् उपास्थाप्य मम्मटादीन् निराकर्तुकामोऽन्ततो गत्वा तदीय-त्रैगुण्यमये व्यवहारे परापतितः।[१५] परन्तु परवर्तिना विद्यानाथेन चतुर्विंशतिगुणाः सविस्तरं प्रदर्शिताः ये तावदनेन परवर्त्तितरेण रत्नाकरकारेण विचार्य तत्र तत्रान्तर्भाविताः। नव स्वीकृताः चत्वारो निश्शेषेण तु प्रतिपादिताः।[१६] तथाहि अर्थव्यक्तेः वक्ष्यमाणे प्रसादेऽन्तर्भावः। अनन्तरम्-

१. विकटाक्षरबन्धत्वमौदार्यम्।
२. श्लाघ्यविशेषणयोग उदात्तता।
३. गाढबन्धत्वमौर्जित्यम् इति त्रय ओजस्यन्तर्भूताः।

अन्ये च प्रोढ्यादयः-

१. परिपाकवत्यूक्तिः प्रौढिः।
२. विदग्धभणितिरुक्तिः।
३. संक्षेपेणार्थस्योक्तिः संक्षेपः।

ISSN : 2454-2881

४. अनेकार्थशब्दोक्तिः सौक्ष्म्यम्।

५. उक्तार्थसमर्थनोक्तिर्विस्तरः।

६. यावदर्थपदोक्तिः सम्मितत्वम्।

७. प्रियतरवस्तूक्तिः प्रेयः।

८. आरोहावरोहाभ्यामतिरम्योक्तिर्गतिः।

९. अवैषम्येण पादचतुष्टयेऽप्यर्थकथनं समता। इति।

नवान्यतमायामुक्तावितरेषामष्टानामुक्तिरूपत्वात् अन्तर्भाव इति धर्मसूरिः।

अन्यधर्मस्यान्यत्रारोपणं समाधिः। अस्योरापगर्भेषु रूपकादिष्वन्तर्भाव इति तस्य न गुणत्वम्। अनेकपदानामेकपदप्रतीतिविषयत्वं श्लेषः इति शब्दश्लेषेऽन्तर्भाव्यत इति अस्यापि न गुणत्वम्। सानुस्वारकोमलवर्णता सुकुमारता इतीयं माधुर्येऽन्तर्भूता।

१. बन्धोज्ज्वलता कान्तिः।

२. शब्दसाधुत्वं सुशब्दता।

३. गूढार्थत्वं गाम्भीर्यम्।

४. भावात् या वाग्वृत्तिः सा भाविकम्।

५. प्रक्रमनिर्विहणं रीतिः।[१७] एते तु पञ्च पृथग्गुणाः।

आहत्य धर्मसूरिमते गुणानां सङ्ग्रहो यथा-

ओजःप्रसादमाधुर्याण्युक्तिकान्तिसुशब्दताः।

गाम्भीर्यं भाविकं रीतिमूचुः केचिद् गुणान् नव।।[१८] इति

**१. माधुर्यम्**

आनन्दनिष्यन्दित्वं माधुर्यमिति धर्मसूरिः।[१९] आह्लादकत्वं माधुर्यमिति प्राञ्चस्तदनुयायिनश्च। उभयत्र आह्लादकत्वानन्दत्वयोः लोकोत्तरत्वं मन्तव्यं, सूत्रे चित्तद्रवीभावमयत्वदर्शनात्, तस्य लोकोत्तरत्वमात्रे सम्भवात्। आनन्दाह्लादयोः कदाचित् जायतां तारतम्यमिति आनन्दनिष्यन्दित्वस्याह्लादैकमात्रत्वमर्थं टीकते नौकाकारः।[२०] किञ्च, अधिकतरं स्पष्टतया रचनावैचित्र्यप्रयुक्तानन्दवाहित्वमस्यार्थो मन्दरकारेण[२१] उट्टङ्कितः। अस्य प्राचुर्येण पृथक्पदतालक्षणः शब्दधर्मो व्यञ्जकः। इदं च माधुर्यं सम्भोगशृङ्गारे करुणे विप्रलम्भे शान्ते क्रमशोऽतिशय्यत इति केचित्। सम्भोगशृङ्गारे करुणे शान्ते विप्रलम्भे त्वपरे। सम्भोग-शृङ्गारे करुणे सहृदयानुभावात् तत्रैवास्मदनुकूलत्वमिति पण्डितराजः।[२२] परन्तु ''इदं च सम्भोगविप्रलम्भकरुणशान्तमनुरूपम्[२३] इति ब्रूवन् न तारतम्यमपितु यथाप्रश्रयमेतेषां संभावनां कलय्ययं


ISSN : 2454-2881

धर्मसूरिः । अस्मिन् सानुस्वारकोमलवर्णतया सुकुमारताया अन्तर्भावः । उदाहरणम्–

रामेऽभिमुखे सीता व्रीडाद् विमुखी तमेव मणिभित्तौ ।
दृष्ट्वा ततोऽपि विमुखी समन्दहासं प्रियेण परिरेभे ।।[२४]

इत्यत्र सम्भोगशृङ्गारः पृथक्पदत्वप्रयुक्ताह्लादत्वं चास्तीति माधुर्यम् ।

**२. ओजः**

''ओजः पुनर्दीप्त्यात्मकचेतोविस्तारहेतुः ।'' तद्व्यञ्जकं समासभूयस्त्वम् । वीररौद्रबीभत्सभयानकेषु चैतत् प्रयोज्यम् इति ग्रन्थकारः ।[२५] ओजसो लक्षणं स्पष्टतया मन्दरकारेण – दीप्त्यात्मकः समासभूयस्त्वप्रयुक्तसावधानतारूपो यश्चेतोविस्तारस्तस्य हेतुरोज इति ।[२६] ''ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते इति पूर्ववर्ती साहित्यदर्पणकारः ।[२७]

उदाहरणमस्य यथा–

शुम्भच्छुण्डालशैलाऽविरलपरिगलद्दानधाराझराणि
भ्राम्यत्कूजद्रथाङ्गान्यसुरहरियुतान्युग्रखड्ग्यावृतानि ।
आकर्णाकृष्टचापच्युतनिबिडतरोच्चण्डकाण्डप्रकाण्ड–
ज्वालामालाकरालो दहति रघुशिखी वैरिसेनावनानि ।।[२८]

अत्र समासभूयस्त्वम् ।

**३. प्रसादः**

यश्चित्तं ह्यंश्नुतेऽह्नाय शुष्केन्धनमिवानलः ।
स प्रसादो मतः सर्वरससाधारणस्थितिः ।।[२९]

इति धर्मसूरिः । लक्षणमिदं प्रायशः सर्वत्र समानरूपं समानार्थकञ्च । उदाहरणम्–

चरन्तमम्बरे दृष्ट्वा रामेण प्रेरितं खगम् ।
अहीना वैरिणो भीत्या मुञ्चन्ति नगराण्यहो ।।[३०] इति ।

तस्य प्रसिद्ध्यर्थत्वं व्यञ्जकमिति वृत्तौ धर्मसूरिः ।

अस्य प्रसिद्धार्थरूपत्वात्, अर्थप्रतिपादने वाक्यस्य निराकाङ्क्षत्वेन परिपूर्त्तौ झटित्यवबोधकत्वलक्षणाया अर्थव्यक्तेरन्तर्भावः ।

गुणेषु त्रय एते माधुर्यादयो भावरूपाः । सर्वैरालङ्कारिकैः सम्मतत्वात्, उत्कर्षहेतुत्वात्, केषाञ्चिद् गुणान्तराणामत्रान्तर्भावात् चैतेषां भावरूपत्वमिति ग्रन्थकृदाशयः । आशयोऽयं पूर्ववर्तिनो विद्यानाथादनुकृतः । तथाहि– प्रतापरुद्रीये, केषाञ्चिद् दोषपरिहारकत्वेन गुणत्वम् । केषाञ्चित् स्वत एवोत्कर्षहेतुत्वात्

गुणत्वमिति।[३१]

अर्थव्यक्त्यादीनामन्तर्भावाद् दोषपरिहारकत्वाद्वा गुणत्वमपि साक्षादुत्कर्षहेतुत्वरूपाभावात् अभावरूपत्वं मन्तव्यम् इत्यपि अस्य मतिः। काणादतन्त्रे वैशेषिकगुणानां समेषां भावरूपेण पठनं दृश्यते। परन्तु नैष नयोऽत्र साहित्यतन्त्रे स्वीकार्यः। तेषामत्र भावाभावरूपत्वसिद्धेः इत्यपि ग्रन्थकृद् स्पष्टयति।

अत्रेदं स्पष्टं यत् माधुर्यादयस्त्रयो भावरूपाः नियताः एतदधिका अपरे येऽनेनाऽपि धर्मसूरिणा स्वीकृताः ते त्वभावरूपाः। अथापि तेषामेवाभावरूपत्वात् अन्ततो गत्वा भावरूपास्त्रयो माधुर्यादयः पूर्ववर्तिभिरङ्गीकृताः। गुणत्वेनैव अन्यान् एषु अन्तर्भावयद्भिः दोषपरिहारकत्वेन वा प्रतिपादयद्भिः तथावत्त्वाङ्गीकारमतिरिच्य को धर्मसूरेरत्र विशेष इति अनन्तरं वक्ष्यते।

**४. कान्तिः**

बन्धोज्ज्वलतालक्षणा कान्तिः।

उदाहरणं यथा–

ताराहारहराचलाम्बरसरिन्नीहारहीरामरा–
हारासारपटीरसौवरकरिन्यक्कारभारोद्धुरा।
कीर्तिः कार्त्तिकचन्द्रमूर्त्तिविजयिस्फूर्त्तिस्त्वदीया गुणाऽऽ–
राम ! श्रीरघुराम ! काममकरोद् दीप्रा दिशः प्रायशः।।[३२]

स्पष्टाऽत्र वर्णादिबन्धोज्ज्वलता।

**५. रीतिः**

प्रक्रमनिर्वहणं रीतिः। तथाहि–

कल्याणकेलिकलना कविपुङ्गवानां
कौतुहलं किमपि कञ्जविलोचनानाम्।
कीर्त्युद्गमः कमलबन्धुकुलोद्भवानां
कस्योत्सवं न कुरुते भुवि कोसलेन्द्रः।।[३३]

अत्र प्रक्रान्तस्य लकारस्य पुनः पुनर्निर्वहणाद् रीतिः। अयं च मार्गाभेदः समतेतिलक्षणात् समत्वगुणेन तुल्यः।

**६. उक्तिः**

विदग्धभङ्गीभणितिरुक्तिः।

यथा–


ISSN : 2454-2881

मन्दोदरीविलोचनवाष्पोत्कटवृष्टिपूर्वदिग्वात्या।

क्षोणीनग्नङ्करणक्षुरप्रदीप्रा प्रभाति कापि कला।।[३४]

अत्र नामग्रहणमकृत्वापि रामप्रत्यायनेन वैदग्ध्यप्रकटनाद् भवत्युक्तिः। विदग्धभणितिरुक्तिलक्षणम्। वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरुच्यते इति कुन्तकाचार्यः। अलङ्कारोऽपि विदग्धभणितिः प्रसिद्धः। अथात्र विदग्धभणितिप्रकार उक्त्याख्यो गुणः स्वीक्रियतामिति को विशेषः ? स्मृताऽपि तरुणातपं करुणया हरन्ती नृणा[३५]मित्यादिप्रथमपद्ये "मन्दोदरीविलोचनवाष्पोत्कटवृष्टिपूर्वदिग्वात्या" इत्यादिवत् व्यवहारदर्शनात्, तत्रस्थव्यतिरेकातिशयोक्त्यङ्गाङ्गिभावसङ्करवत् तत्रापि प्राधान्येन तदस्तु। परन्तु न तथा, उभयोः अलङ्कारसाम्यस्वीकारेऽप्यत्र ग्रन्थकर्त्तुरस्याशयभिन्नत्वात्। तथाहि–अत्र नामग्रहणमकृत्वापि रामप्रत्यायनेन वैदग्धप्रकटनाद् भवत्युक्तिः, या गुणत्वेन स्वीक्रियते इति गुणालङ्कारयोरत्र भेदः स्फुटः।

**७. भाविकम्**

भावाद् या वाग्वृत्तिः, सा भाविकम्।

यथा–

असारं संसारं जहिहि विरसारम्भबहुलं
मम भ्रातश्चेतः परिचिनु वचोऽतः परमिदम्।
महोदारे धीरे भुवनभरधैरेयविभवे
गुणारामे रामे दशमुखविरामे कुरु रतिम्।।[३६]

अत्राभिमतार्थप्रवर्तनीये चेतसि प्रियरूपभावनावशात् "भ्रातर" इति वाग्वृत्तिरिति भाविकम्।

**८. गाम्भीर्यम्**

गूढार्थत्वं गाम्भीर्यम्।

यथा–

प्रायेण मार्गणै रामो नामरारीनमीमरत्।
छित्वाऽङ्गान्यकरोत् किन्तु पलायनपरायणान्।।[३७]

अत्रार्थस्य गूढत्वाद्गाम्भीर्यमिति।

**९. सुशब्दता**

सुशब्दविन्यासा इति। एतानि पूर्वोक्तान्युदाहरणानि सुशब्दताया उदाहरणानि मन्तव्यानि इति ग्रन्थकारः। तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशीति वदता भामहेन केषाञ्चिन्मतेन सौशब्द्यावस्थितिरेव काव्यजीवातुभूतेति दर्शितमिति केचित्।

साहित्यरत्नाकरे ग्रन्थकारो नवगुणान् पुरस्कृत्य तेषु चतुर एव स्वीकरोति। किञ्च प्राचां प्रदर्शितान् त्रीन् माधुर्यौजःप्रसादाख्यान् गुणान् ''त्रय एवेति वाऽत्यर्थं मनसे रोचते मतमिति''[३८] सप्रश्रयं प्रस्तौति। चतुर्षु गुणेषु उल्लिखिता या सुशब्दता सा शब्दसाधुत्वलक्षणा तत्तद्गुणेषु तत्तदनुकूलशब्दसाधुतया विशिष्य पुनः सुशब्दताख्यगुणस्वीकारे अनावश्यकता अनुमीयते। एतच्चानुमाय धर्मसूरिः प्रायशः अन्ततो गत्वा गुणवैविध्यमेवाङ्गीकरोति इत्यपि प्रतीयते। अतः मूलतो नव गुणा अनेन कलिताः। सूक्ष्मेक्षणेनानेन पुनश्चत्वारस्तेषु विशेषिताः।[३९] अत्यर्थं त्रय एव स्वीकृताः। इति दिक्।


**सन्दर्भसूत्राणि-**

१. काव्यालङ्कारसूत्रे ३.१.२

२. का. सू., १.२.६.

३. सा. र., ५, पृ. ३५०-३५१

४. तत्रैव, ४, पृ. ३५२

५. तत्रैव नौकायां पृ. ३५३

६. का. प्र., ८, सू. ८८ वृत्तौ

७. तत्रैव, सू. ८७

८. तत्रैव, सू. ८८

९. तत्रैव, वृत्तौ

१०. तत्रैव, १, सू. १९

११. तत्रैव

१२. काव्यानुशासनम्, ४, पृ. २३२-२३३

१३. साहित्यदर्पणः, ५, पृ. ३६३

१४. का. प्र., ८, सू. ९६, सा. द., ८, ९-१६

१५. रसगङ्गाधरः, १, गुणनिरूपणप्रसङ्गे

१६. सा. र., ५, पृ. ३८२

१७. तत्रैव, ५, पृ. ३७४-३७५

१८. तत्रैव

१९. तत्रैव, ५, पृ. ३६५




ISSN : 2454-2881

२०. तत्रैव, ५, पृ. ३६४
२१. तत्रैव, पृ. ३६५ मन्दरे
२२. र.ग., १, गुणनिरूपणप्रसङ्गे
२३. सा. र., ५, पृ. ३६५
२४. तत्रैव, ५.१
२५. तत्रैव, ५, पृ. ३६५
२६. तत्रैव, ५, पृ. ३६६ मन्दरे
२७. सा. द., ८.४
२८. सा. र., ५.२
२९. तत्रैव, ५, पृ. ३६६
३०. तत्रैव, ५.३
३१. प्रतापरुद्रीय, ६.१
३२. सा.र ५.४
३३. तत्रैव, ५.५
३४. तत्रैव, ५.६
३५. र.ग. १.१
३६. सा. र ५.७
३७. तत्रैव, ५.८
३८. तत्रैव, ५.८. पृ. ३८२
३९. माधुर्यौज:प्रसादास्तु सौशब्देन समन्विता: ।
गुणाश्चत्वार एवैते मम सूक्ष्मतरेक्षितुः ।।– तत्रैव, ५, पृ. ३८२

# संस्कृतमहाकाव्येषु महात्मागान्धी

प्रो. रमाकान्तपाण्डेयः

पौराणिकमैतिहासिकम् आध्यात्मिकं च साहित्यमुपजीव्य यथा काव्यकर्मणि दृश्यते संस्कृतकवीनां प्रवृत्तिस्तथैव राष्ट्रे समाजे क्षेत्रविशेषे वा प्राप्तावकाशानां घटनानां राष्ट्रस्य समाजस्य वोत्थानाय लब्धजनीनां सतां वर्णनेऽपि तेषां लेखनी सर्वथा अग्रेसरति। स्वातन्त्र्यसङ्ग्रामं साक्षाद् वर्णयन् संस्कृतकविः सहृदयानां मनसि विस्मयमुत्पादयति। आजादचन्द्रशेखरस्य विस्मिलरामप्रसादस्य नेहरूजवाहरलालस्य तथा चान्येषां महापुरुषाणां चरित्रं जीवनं चोपजीव्य कविभिः संस्कृते नवीना काचित् काव्यरचनाधारैव प्रवाहिता। महात्मागान्धिनो जीवनं त्यागं तपश्चर्यां देशसेवाव्रतं विनम्रतां च विषयीकृत्य संस्कृतकविभिः शताधिककाव्यानि विरचितानि। तद्यथा- वी. राघवन्महोदयेन प्रणीतं महात्माकाव्यं, कवकुश्रीनृसिंह-मूर्तिनः महात्मागान्धी, आराधनशर्मपाठकस्य महात्मचरितं, गोखले-रामचन्द्रविष्णोः महात्मविजयं, नारायणवी. नायरस्य महात्मनिर्वाणम्, केदारगङ्गाधर-विष्णुठेकेदारस्य महात्मायनम्, एस. आर. लीलाया गान्धिस्मरणसम्भ्रमम्, रघुनाथप्रसादचतुर्वेदस्य गान्धिगरिमकाव्यम्, अ.वि. काणेमहोदयस्य गान्धीगीता, रमेशचन्द्रशुक्लस्य महात्मगान्धीगौरवम्, महाभिक्षोः ब्रह्मक्षत्रियस्य डाह्यालालस्य गान्धीप्रवाहणम्, मथुराप्रसाददीक्षितस्य गान्धिविजयम्, मधुकरशास्त्रिणः गान्धीगाथा, बङ्गपण्डू-लक्ष्मीनायडूप्रणीतं गान्धेयचरितं, साधुशरणमिश्रस्य गान्धिचरितम्, विद्यानिधिशास्त्रिणः गान्धिचरितामृतम्, द्वारकाप्रसादशास्त्रिणः गान्धिनस्त्रयो गुरवः शिष्याश्च, प्रभुदत्तशास्त्रिणः गान्धिनान्दीश्राध्दामृतम्, लोकनाथशास्त्रिणः गान्धिविजयमहाकाव्यम्, देशमुखचिन्तामणेः गान्धिसुक्तिमुक्तावली, शिवकुमारमिश्रस्य गान्धिसुक्तिसप्तशती, राधामोहनोपाध्यायस्य भारतविजयम्, शिवगोविन्दत्रिपाठिनः श्रीगान्धिगौरवमहाकाव्यम्, भगवदाचार्यस्य श्रीमहात्मगान्धिचरितम्, विजेन्द्रविद्यामार्तण्डस्य स्वराज्यविजयम् तथा चान्यानि बहूनि काव्यानि नाटकानि च महात्मगान्धिवर्णनपराणि सन्ति प्रसिद्धानि। पण्डिताक्षमारावदेव्याः सत्याग्रहगीता उत्तरसत्याग्रहगीता च महात्मगान्धिनः देशसेवाब्रतवर्णने विशिष्टं स्थानं भजेते। तथैव श्रीनिवासतडपत्रीकरस्य गान्धिगीता, ब्रह्मानन्दशुक्लस्य गान्धिचरितम्, यज्ञेश्वरशास्त्रिणः राष्ट्ररत्नम्, श्रीधरभास्करवर्णेकरस्य श्रमगीता तथा च अन्यानि बहूनि काव्यानि विद्यन्ते


ISSN : 2454-2881

विश्रुतानि।

निबन्धेऽस्मिन् संस्कृतमहाकाव्येषु महात्मगान्धिविषयकं यत्तथ्यं प्रदिपादितं तदेव अतिसंक्षेपेण निरूपयिष्यते। गान्धिचरिताश्रितमहाकाव्यानां भूयस्त्वं विद्यते संस्कृतसाहित्ये, अतः केषुचित् प्रमुखमहाकव्येषु प्रथितं गान्धिचरितमेवेह वर्णयिष्यते। पण्डितया क्षमारावदेव्या गान्धिनः चरितमाश्रित्य सत्याग्रहगीता उत्तरसत्याग्रहगीता स्वराज्यविजयं चेति त्रीणि महाकाव्यानि व्यरच्यन्त। सत्याग्रहगीता श्रीमभ्दगवग्दीताया रचनाशैलीमाश्रित्य प्रवर्तते। अष्टादशाध्यायेषु अत्र नैके विषया निरूपिताः सन्ति। ग्रन्थारम्भे कालिदासस्य सरणिमनुसरन्ती वदति क्षमादेवी–

गम्भीरो विषयः क्वायं श्रेष्ठः सत्याग्रहात्मकः।
कृत्स्ने जगति विख्यातः क्व मे लघुतमा मतिः।।
तथापि देशभक्त्याऽहं जातास्मि विवशीकृता।
अत एवास्मि तद्दातुमुद्युक्ता मन्दधीरपि।।

सत्याग्रहगीतायाः प्रारम्भिकेषु पञ्चसर्गेषु देशस्य तदानीन्तनदुर्दशाया वर्णनं कृतम्। भुस्वामिभिः जनतायाः शोषणं डायरनामकस्य क्रुरतम-शासनाधिकारिणः क्रौर्यं साइमनकमीशनादिकं निर्भयतयाऽत्र व्यवर्णयत् क्षमादेवी–

सैमनीयस्य सङ्घस्य जिज्ञासोर्भारतस्थितम्।
वहिष्कारः कृतो लोकैर्निश्चितं नायकैर्यथा।
सैमनप्रमुखे सङ्घे मुम्बापुरमुपागते।
श्मशानमिव साक्षात् तत् कृष्णध्वजमयं बभौ।।[१]

नवमेऽध्याये तात्कालिकस्य आङ्ग्लशासकस्य इर्विनस्य सन्देशस्तस्मिन् विषये च काङ्ग्रेसनेतृणां प्रतिक्रियायाः स्पष्टं वर्णनं कृत्वा दशमे तस्मै अधिकारिणे गान्धिना प्रेषितपत्रस्य विषयः अवतारितः। तत्र क्षमादेवी गान्धिनः पत्रस्य अनुवादं प्रास्तौत्–

निरङंकुशाः प्रवर्तन्ते यस्मिन् राज्येऽधिकारिणः।
शासनं तद्वरं नष्टं प्रजाहितविवर्जितम्।।[२]

सत्याग्रहस्य सारं क्षमादेवी स्वशब्देन स्थापितवती–

दुर्बला ननु गण्यन्ते शान्तिमार्गावलम्बिनः।
परं सत्याग्रहाद् विद्धि नास्ति तीव्रतरं बलम्।।

पण्डितया क्षमादेव्या गान्धिनो दाण्डीयात्रायाः प्रत्यक्षदृष्टमिव वर्णनमकारि। लवणसत्याग्रहकारणात् शासकैः गान्धी पुण्यनगरस्थ-येरवणाकारागारे पिहितः। तत्सर्वं महाकाव्येऽस्मिन् विशदतया वर्णनविषयीकृतम्। अत्र हि प्रायशः सत्याग्रहस्य सर्वेऽपि विषयाः सप्रमाणं न्यरूपिषत। वस्तुतः सत्याग्रहस्य

नैकासु घटनासु क्षमादेवी सहाय्यमप्यकरोत्। बहुषु ग्रामेषु तया बहव्यो घटना महात्मगान्धिनो धर्मपत्न्या कस्तुरवया सह अक्षिलक्ष्यीकृता अभवन्–

पर्याटिषं प्रतिग्रामं सह पत्न्या महात्मनः।
पांसुदूषितमार्गेण गाढदुर्भिक्षशंसिना।।[३]

इदं महाकाव्यं स्वातन्त्र्यसङ्ग्रामस्य विविधान् पक्षान् पुरस्करोति। गान्धिनो जीवनदर्शनं कवयित्र्याः सर्वस्वं वर्तते। सा महात्मनः अपुर्वं विग्रहं पश्यति। महात्मा न कश्चन सामन्यो मनुष्यः। राष्ट्रस्य रक्षायै भगवानेव तद्रूपेण अवततार–

निक्षिप्तं विधिना तेजस्तस्मिन् गान्धौ महात्मनि।
जन्मभूमिं तमोग्रस्तां विद्योतयितुमात्मनः।।
न परं भारतं वर्षं विदूरा अपि भुमयः।
भासिताः सत्यदीपेन ज्वालितेन महात्मना।।
तस्मादधर्मनाशाय प्रशान्तेः स्थापनाय च।
गान्धीरूपेण भगवानवतीर्णः किमु वा स्वयम्।।[४]

उत्तरसत्याग्रहगीतायां १९८९ श्लोकाः सन्ति। सप्तचत्वारिंशत्सर्गेषु निबद्धेऽस्मिन् काव्ये अष्टाविंशतिसर्गेषु दाण्डीयात्रायाः प्रभावेण देशवासिनां हृदये नवचेतनायाः सञ्चारो न्यरूपि, अन्येषु अध्यायेषु देशस्य अन्यास्तत्कालीनसमस्याः वर्णिताः। गान्धिनः वर्णने अत्रापि क्षमादेव्याः अनितरसाधारणत्वं दृग्गोचरीभवति। तथा हि–

क्रशीयानपि तेजस्वी दीनोऽपि प्राभवान्वितः।
एकदन्तोऽप्यवक्रास्यः श्रुतौ साक्षाद् विनायकः।।

अत्र विरोधालङ्कारस्य प्रयोगपटुत्वमपि मनोहरम्। स्वराज्यविजयस्य उत्तरजयसत्याग्रहगीता नाम्नाऽपि प्रसिद्धिः। अत्र आहत्य चतुष्पञ्चाशद् अध्यायाः सन्ति। अस्मिन् महाकाव्येऽपि स्वातन्त्र्यसङ्ग्रामस्य नैका ऐतिहासिक्यो घटनाः सन्ति निरूपिताः। भारतवर्षस्य विभाजनं महात्मनः कृते कियत् कष्टकरमासीदिति महाकाव्यस्यास्य त्रिचत्वारिंशत्तमे सर्गे द्रष्टुं शक्यते। गान्धिनो वधेन क्षमादेव्या हृदये अपुर्वा कापि पीडा अपुर्वा च कापि लज्जा समुदपद्यत्–

धन्याः किल वयं सर्वे युगेऽस्मिन् प्राप्तसम्भवाः।
चरन्तः क्ष्मातलं तस्य पावितं पादरेणुभिः।।
परस्सहस्रवर्षोर्ध्वं स्मरिष्यन्ति जनाः किल।
महात्मानमिमं गान्धिं जनांश्च समकालिकान्।।


ISSN : 2454-2881

स महापुरुषो लोकैः पूजितः सकलप्रियः।
निजघ्ने देशजेनेति भारतस्य त्रपाकरम्।।
तत्रापि हिन्दुनैकेन हिन्दुष्वपि महत्तमे।
उद्यतो हस्त इत्येष कलङ्को वागगोचरः।।[५]

भगवदाचार्यप्रणीतं महात्मगान्धिचरितमहाकाव्यं त्रिषु खण्डेषु विभक्तम्। तत्र प्रथमे भारतपारिजाताख्ये प्रथमे खण्डे पञ्चविंशतिसर्गा विलसन्ति। पारिजातापहारसंज्ञे द्वितीये खण्डे अष्टाविंशतिः सर्गाः पारिजातसौरभाख्ये च तृतीये खण्डे विंशतिः सर्गाः सन्ति। कविनाऽत्र ''गान्धिन आत्मकथा'' ''दिल्ली डायरी'' चेति ग्रन्थद्वयमुपजीव्य कथावस्तु काव्यसङ्घटना च समयोजि। वैश्यकुलोत्पन्नो मोहनोऽत्र धीरोदात्तो नायकः आङ्लशासकाश्च प्रतिनायकाः। गान्धिनो जन्म शिक्षा विवाहः हीनोद्धारः दाण्डीयात्रा सत्याग्रहः स्वातन्त्र्यप्राप्तिः तथा चान्ये विषया महाकाव्येऽत्र प्रतिपादिताः। पारम्परिकच्छन्दसां प्रयोगे महाकवेरस्य वैशिष्ट्यं प्रतीयते। कविना गान्धिनो वर्णने तस्मिन् देवत्वमारोपितम्। तदनुसारेण महात्मगान्धी अनुपमेयो महापुरुषः तन्माता च तथैव साध्वी। गर्भभारमन्थरां गान्धिनो मातरं पुत्तलीं स्वतटे भ्रमणार्थं समागतां दृष्ट्वा समुद्रस्तच्चरणौ प्रक्षालयति-

श्रीपुत्तलीं स्वीयतटे विहर्तुं
दृष्ट्वागतां रत्ननिधिर्महाब्धिः।
प्रक्षाल्यामास पदौ स तस्याः
रत्नाधिरत्नस्य महाधरित्र्याः।।[६]

श्रीसाधुशरणमिश्रविरचिते श्रीगान्धीचरितमहाकाव्ये एकोनविंशसर्गा विलसन्ति। महाकाव्यादौ कविः वक्ति-

महात्मनः क्वातिमहच्चरित्र-
मगाधसिन्धुपममद्वितीयम्।
क्वाऽहं भृशं मन्दगतिर्न गन्तुं
तत्पारमीशोऽस्य विना कृपाभिः।।[७]

कविना साधुशरणमिश्रेण सूक्तीनां लोकोक्तीनां च प्रयोगेण गान्धिनश्चरित्रवर्णने चमत्कार उत्पादितः। काव्ये क्वचित् दीर्घाः संवादाः सिकतायन्ते। गान्धिनो विचारान् प्रकटीकुर्वन् स वक्ति-

स्वधर्मपालनं कार्यं प्राणैः कण्ठगतैरपि।
कल्याणं जगतां चेति विद्धि मानावताफलम्।।[८]

तथा चान्यत्र-

हिन्दुर्यथास्ते यवनोऽपि तद्वत्
ख्रीष्ट्यनुयायी च जनः परोऽपि।
तुल्योऽस्य दृष्टौ न भिदा लवोऽपि
समप्रवृत्तेर्विषमा न बुद्धिः।।[६]

श्री राधामोहनोपाध्यायोपज्ञं भारतविजयं महाकाव्यं विश्रुतं विद्यते। अत्र हि चतुस्त्रिंशे सर्गे पञ्चसप्ततिश्लोकेषु महात्मगान्धिनो वर्णनं कृतम्। तत्र गान्धिनो जन्म शिक्षा विधिज्ञवृत्तिः आङ्ग्लानां विरोधः अफ्रीकादेशीयानां च सेवादिकं वर्ण्यविषयतां प्रापितम्। तथा हि-

कठियावाढप्रान्ते हि नगरं पोरबन्दरम्।
तत्र हि मोहनदासः कर्मचन्दात्मजो ह्यभूत्।।
माता तु पुत्तलीबाई सदा धर्मपरायणा।
स्तन्येन च सा देवी शिशुं शीलमपाययत्।।
कथाः रामस्य कृष्णस्य श्रवणस्यापि पाठिताः।
हरिश्चन्द्रात् सदाचारं लब्धवान् स हि मोहनः।।

अत्र पौराणिकशैल्या गान्धिनः सर्वं वृत्तान्तं नातिविस्तरेण वर्णितम्। उच्चशिक्षाप्राप्तये विदेशगमनम्, उच्चन्यायालये विधिज्ञवृत्तिः, अफ्रीकादेशे जनसंरक्षणम्, सत्याग्रहः, चम्पारणसङ्घर्षः, सविनयाज्ञान्दोलनं चेति सर्वासां घटनानां सनामग्राहमुल्लेखोऽत्र विहितः। गुरुणा रवीन्द्रनाथठक्कुरेण 'महात्मा' इति संज्ञया अयं समलङ्कृतोऽभुदिति कविरयं सुचयति-

महात्मेति विशेषणं रवीन्द्रेण तस्मै दत्तम्।
आह्वानं गान्धिनः श्रुत्वा छात्राः पथि समागताः।।
गान्धिनो देशसेवां निरूपयन् स कथयति-
चाणक्येन यथापुर्वं राक्षसो हि नियोजितः।
देशायार्पितचित्तेन गान्धिनाऽपि तथा कृतम्।।
अतन्द्रितः स्वदेशस्य कल्याणाय समर्पितः।
स्वदेशीति विख्यातस्यान्दोलनस्य देशकः।।
दृष्ट्वा नग्नान् भारतीयान् दुःखितः स बभूव ह।
स्वल्पेनैव वस्त्रेण सन्तवृत्त्या हि जीवितुम्।।

शिवगोविन्दत्रिपाठिप्रणीते श्रीगान्धिगौरवमहाकाव्ये अष्टौ सर्गा विलसन्ति। अत्र प्रथमसर्गे गान्धिनो विवाहोऽध्ययनं विदेशगमनं तथा च कानिचिद् विशेषवृत्तान्तान्यपि वर्णयति कविः-


ISSN : 2454-2881

तत्रैव चासीदथ प्रीतिभोजो
निमन्त्रितोऽभूत् सखिभिश्च तत्र।
केकादिभोज्यैः सह तत्र मञ्चे
सुरा च मांसं शुशुभे स्वपात्रे।।
परं प्रतिज्ञागतिभङ्गभीरुः
चुक्षोभ चित्ते स तु बालगान्धी।
रक्षन् स्वकीयां किल संस्कृतिं स
चचाल सद्यो निजमाश्रमं तु।।

अस्मिन् महाकाव्येऽपि सर्वा घटनाः सङ्क्षेपेण वर्णिताः। संस्कृतसाहित्ये महात्मगान्धिनः अलौकिकं स्वरूपं कविभिः प्रतिष्ठापितम्। स साक्षादीश्वरस्य अवतारत्वेन कल्पितः। भुभारहरणाय यथा रामकृष्णादयो भुवमवातरन् तथैव अयं महापुरुषोऽपि। गान्धिविषयककाव्येषु नैके रसा आस्वादविषयतां भजन्ते किन्तु वीररसनिरूपणे केचन महाकवयः विशेषेण साफल्यमधिजग्मुः। क्वचित् करुणतरङ्गिणी अपि निर्गलं प्रवहति–

सतां पिता राष्ट्रपिता जगत्याः
विमानमारुह्य दिवङ्गतोऽभत्।
जवाहरो वल्लभपन्तयुक्तो
वक्षो विनिघ्नंश्च भृशं रुरोद।।[१०]

संस्कृतमहाकाव्येषु गान्धिनो वर्णनमतीव वैशद्येन लभ्यते तत्सर्वं प्रबन्धानां विषयः। विद्वद्भिः तादृशमहाकव्यानां समीक्षणे प्रयासो विधेयः। इह तु दिङ्निर्देशमात्रमेव कृतम्।

**सन्दर्भसूत्राणि–**

१. सत्याग्रहगीता, ८.२५-२६
२. तत्रैव,१०.१७
३. तत्रैव, १७.४७
४. तत्रैव, १८.१५-१८
५. स्वराज्यविजयम्, ५४.२-५
६. भारतपारिजाते, २.९
७. श्रीगान्धीचरितमहाकाव्ये, १.४
८. तत्रैव, २.३२
९. तत्रैव, १६.२९
१०. गान्धीगौरवम्, ८.५२

**सन्दर्भग्रन्थाः-**

१. श्रीगान्धिगौरवम्, शिवगोविन्दत्रिपाठी, युनिक ट्रेडर्स, जयपुरम्, २००१
२. भारतविजयम्, राधामोहन उपाध्ययाय, अनुराग प्रकाशन, हावडा, २००१
३. संस्कृत साहित्य का समग्र इतिहास, (चतुर्थ खण्ड) राधावल्लभ त्रिपाठी, दिल्ली, २००१८
४. उत्तरसत्याग्रहगीता, क्षमा राव, ईपुस्तकालये

# ऋग्वेदे प्रयुक्तस्य ध्रुवपदस्य अर्थः - एको विमर्शः

प्रो. कमलेशकुमार छ. चोकसी

**उपक्रमः-**

वेदे विशेषतः ऋग्वेदे ध्रुवपदस्य प्रयोगः अनेकत्र दृश्यते।[१] क्वचित्त्विदं ध्रुवपदं स्वतन्त्रतया सुबन्तपदत्वेन प्रयुक्तमस्ति,[२] क्वचिच्च सामासिकत्वेन।[३] एकस्मिन् स्थानेऽस्य ध्रुवमया (३.२९.१६) इत्वेवम्प्रकारकः तद्धितप्रत्ययान्तः शब्दप्रयोगोऽपि प्राप्यते। अथ चात्र वैदिके प्रयोगे स्वराणामपि प्रयोगो भवतीति संस्मृत्यास्य प्रयोगपरा स्वराङ्कनविषयिणी जिज्ञासापि भवति। ततः प्राथमिकदृष्ट्या ध्रुवपदस्य यत्र यत्र प्रयोगः वर्तते तत्र स्वराङ्कनं समानं नास्तीति प्रतीतिर्भवति। एवमिदं ध्रुवपदमृग्वेदे विविधप्रकारेण प्रयुक्तमस्ति।

विविधतया प्रयुक्तस्यास्य ध्रुवपदस्य सर्वत्र किमेक एवार्थः आहोस्विद् भिन्नार्थः इत्यपि विचारणीयं भवति। वस्तुतः लौकिकसंस्कृतसाहित्ये प्रयुक्तस्यास्य ध्रुवशब्दस्य सामान्यतया स्थिरः इत्येव रूढार्थः प्रचलितोऽस्ति।[४] अयञ्च रूढार्थः ध्रुवशब्दस्य व्युत्पत्तिलभ्योऽर्थः। व्युत्पत्तिश्चास्य स्थैर्यार्थात् ध्रु अथवा ध्रुव् धातोः क (अ) प्रत्यये कृते ध्रुवशब्दः निष्पन्नो भवति, तेन च ध्रुवतीति ध्रुवमिति। अनया व्युत्पत्त्या अस्यार्थो भवति यः स्थिरः तिष्ठति, भवति सः ध्रुवः। एवं ध्रुवशब्दः स्थिरपर्यायो भवति। नात्र काचित् विमतिः। शब्दकोषेष्वस्यान्येऽपि बहवः अर्थाः उपदिष्टाः सन्ति। तद्यथा- वसुयोगभिदोः शम्भौ शङ्कावुत्तानपादजे। स्थिरे (नित्ये) निश्चिते च (ध्रुवं खेऽजस्रतर्कयोः। ध्रुवा मूर्वाशालपर्ण्योः स्रग्भदे गीतभिद्यपि)।।[५] एवमेव विश्वनामके कोषेऽपि- ध्रुवः कीले शिवे शङ्कौ वसौ योगे वटे मुनौ। ध्रुवा मूर्वाशलिपण्यां गीतिस्रुग्भेदयोरपि। ध्रुवं तु निश्चिते तर्के निश्चले शाश्वतेन्यवत्।। (१६२.८-९) इत्युपदिशन्नस्य बहवोऽर्थाः स्वीकृताः सन्ति।

सत्स्वपि ध्रुवपदस्यानेकेष्वर्थेषु प्रसिद्धतमोऽर्थः स्थिरः अस्ति। अन्येऽर्थाः प्रसंगवशान्निर्धारिताः भवन्ति।

परम् ऋग्वेदस्य मन्त्रेषु प्रयुक्तस्य ध्रुवपदस्य यद्यायमेवार्थः प्रवर्तते इति मत्वा तत्तद्वेद-


ISSN : 2454-2881

मन्त्राणामर्थघटनं क्रियते चेद्वहुषु स्थानेषु बहव्यः समस्याः समायान्तिः। तद्यथा-

ध्रुवा द्यौः ध्रुवा पृथ्वी ध्रुवासः पर्वता इमे।

ध्रुवं विश्वमिदं जगत् ध्रुवो राजा विशामयम्।।[६]

अस्य मन्त्रस्यार्थघटनं तत्रभवन्तः श्रीसायणाचार्याः एवं कुर्वन्ति- द्यौः ध्रुवा स्थिरा भवति। पृथ्वी च ध्रुवा स्थिरा भवति। इमे दृश्यमानाः पर्वताः महीधराश्च ध्रुवासः स्थिराः। इदं विश्वं सर्वं जगत् ध्रुवं स्थिरं भवति। एवमेव अयं विशां प्रजानां राजा स्वामी सन् ध्रुवः स्थिरो भवतु।।[७]

इममेवार्थघटनं पुरस्कृत्य विचार्यते चेत् पर्वतानां यत् स्थिरत्वमुपदिष्टमस्ति तत् सत्यमस्ति। द्युलोकस्यापि स्थिरत्वं मान्यमस्ति। परं आधुनिकैः वेदान् प्रति अयमाक्षेपः क्रियते यदत्र पृथ्वी स्थिरास्तीति उपदिष्टमस्ति, तत् वास्तविकं तथ्यं सत्यं च नास्ति। एवं वेदवाक्यानि विज्ञानतः विरुद्धानि सन्तीति वेदेष्वाक्षेपाः आक्षिप्यन्ते।

अथ चास्मिन्नेव सूक्तेपरोप्येकः मन्त्रः वर्तते, यत्र ध्रुवपदं प्रयुक्तमस्ति। तद्यथा-

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः।

ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्।।[८]

अस्य मन्त्रस्य सायणभाष्यमस्ति- हे राजन् ते तव राष्ट्रं राजा राजमानः वरूणः ध्रुवं स्थिरं धारयतु। देवः दानादिगुणयुक्तः बृहस्पतिः ध्रुवं धारयतु। इन्द्रश्च अग्निश्च उभावपि ते तव राष्ट्रं ध्रुवं स्थिरं धारयताम्। इन्द्राग्न्योभयोरपेक्षया ध्रुवशब्दस्य द्विः प्रयोगः।।[९]

अत्र राज्ञः राष्ट्रस्य धारणक्रियां प्रति ध्रुवता प्रदर्शिता अस्ति। यद्यप्यत्र ध्रुवशब्दः स्थिरार्थकः स्वीक्रियते चेदुचितार्थस्य प्रतीतिर्भवति, परं सार्वत्रिकरूपेण न। यतोहि यदि पदस्थः कश्चित् राजा राज-पदे स्थिरो भवति तदा तु तदिष्टोऽर्थः, परं यदि कश्चित् राजा वर्तमाने यस्यां स्थितौ तिष्ठति, तस्यामेव स्थितौ तेन स्थातव्यमिति अनिष्टोर्थः। यतोहि पदे स्थिरः सन्नपि राजा धन-सेना-सेवक-जय-कीर्ति-सुखादीनां संदर्भे वर्धमानः भवेत् तदा तदिष्टं भवति। यदि धनादीनां सन्दर्भेऽपि राज्ञः ध्रुवत्वं नाम स्थिरता कथ्यते चेत् राज्ञः भविष्यकालिक्याः आर्थिक्याः साम्राज्यमूलिकायाः वा परिस्थितेः वर्धनावकाशः सर्वथा अवरुद्धो भवति। नैषा राज्ञः कामना न चैषा राज्ञे आशीर्वाददातुः पुरोहितस्य वा भावना। अतः वेदे एतादृशेषु स्थानेषु प्रयुक्तस्य ध्रुवशब्दस्य स्थिरार्थः सर्वथा औचित्यं न भजते, भवतु नाम आंशिकमौचित्यं भजेत्।

एवमेव यजुर्वेदेऽपि एकः मन्त्रः अस्ति-

ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात्।

घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्यच्छदिरसि विश्वजनस्यच्छाया।।

अस्मिन् सम्पूर्णेऽपि मन्त्रे यजमानाय ध्रुवत्वस्य प्रार्थना वर्तते किंवा पुरोहितेन दातव्य आशीर्वादो वर्तते।[१०] अत्र ध्रुवशब्दः यजमानस्य विशेषणरूपेण प्रयुक्तोऽस्ति। अतो यद्यस्य ध्रुवपदस्य स्थिर इत्यर्थः क्रियते चेद् यजमानस्य कृते कृता प्रार्थना पुरोहितेन दत्तः आशीर्वादो वा समुचितो न प्रतिभाति।

यजमानः सम्प्रति यस्यां स्थितौ यस्मिन्नायतने वा वर्तते, तस्यामेव स्थितौ तस्मिन्नेवायतने वा सर्वदा स्थिरो भवेदिति काम्यते चेत् कामनैषा सुरूचिसम्पन्ना न प्रतिभाति। यतोहि अस्मिन्नायतने ध्रुवः स्थिरो भव इत्यात्मकेन आशीर्वादवाक्येन भविष्यति यजमानोऽयं साम्प्रतिकादद्यतनादायातनादन्यस्मिन् महत्यायतने न कदापि गच्छेदिति तात्पर्यार्थः प्राप्यते।

अथ चेदमपरमपि ध्यातव्यमस्ति यत्- कश्चिदपि यजमानः सम्प्रति यस्यां स्थितौ वर्तते तस्यां स्थितौ कदाचिदपि स्थिरो न भवति।[११] प्रत्येकं यजमानस्तु स्वीयेन पुरुषार्थेण भाग्येन च स्वीयां परिस्थितिं सततं परिवर्तयत्येव। गेहं वसन्तः सर्वेऽपि यजमानाः अत्र प्रमाणमस्ति। कश्चित् यजमानः धनेन वर्धते कश्चिद् यशसा पदेन वा। कश्चिद् यजमानः आलस्यवशात् त्रुटिवशाच्च स्वस्थानादधोऽपि पतति। एवं व्यवहारे जगति दृश्यते यत् राज्ञः यजमानस्य वा ध्रुवता नाम स्थिरता कदाचिदपि न भवति। अस्यां स्थितौ वेदवचने यदि उभयोः ध्रुवत्वं काङ्क्षितं वर्तते तस्य किमपि विशिष्टं तात्पर्यं भवितुमर्हति। तत् च किं भवितुमर्हतीति विचार्यते।

किं नाम यजमानस्य ध्रुवत्वमिति प्रश्ने विचारमयमिदमुत्तरमत्र प्रदीयते।

वस्तुतः कदाचित् शब्दार्थस्य विनिश्चयाय लक्ष्यं लक्षणं चेति द्वयोः वस्तुनोः समन्वयः करणीयो भवति। तद्यथा- पाणिनीये व्याकरणे कारक-प्रकरणे सूत्रमेकमस्ति- ध्रुवमपायेऽपादानम्। (पा. १.४.२४)। अस्मिन् सूत्रे आचार्येण प्रयुक्तस्य ध्रुवशब्दस्य स्थिरः इत्येष अर्थः गृह्यते चेत्- वृक्षात् पर्णम् पतति। सदृशाः वाक्यप्रयोगः सिद्धाः भवन्ति, परन्तु धावतोऽश्वात् पतति। सदृशाः नैके प्रयोगाः सिद्धाः न भवन्ति। यतोहि एतादृशेषु वाक्येषु यस्य अश्वस्य अपादानसंज्ञा इष्टास्ति, सः अश्वः धावन-क्रियायां संलग्नोऽस्तीतिकृत्वा ध्रुवं नाम स्थिरः नास्ति। एवं विचार्यमाणे सति अश्वस्य गतिमत्वात्, गतिमतश्च अस्थिरत्वात्, सूत्रकारेणापेक्षिता स्थिरता ध्रुवता वात्र नास्ति। ततः अपादानसंज्ञायाः इष्टः प्रसङ्गोऽपि नायाति।

अस्मिन् संदर्भे महाभाष्यकारैः पतञ्जलिवर्यैरपि विचारः कृतो वर्तते। तैः पूर्वमुदाहरणत्रयं प्रदत्तमस्ति- १. त्रस्ताद् अश्वात् पतितः। २. रथात् प्रवीतात् पतितः। ३. सार्थाद् गच्छतो हीनः। एषु त्रिषु प्रयोगेष्वश्वः रथः सार्थश्चेति ये त्रयः पदार्थाः सन्ति, ते सर्वेऽपि गतिमन्तः सन्तः ध्रुवत्वेन स्थिताः न


ISSN : 2454-2881

सन्ति। तेषामध्रुवत्वाद् अनेन सूत्रेणापादनसंज्ञा भवितुं नार्हति। अपादानसंज्ञायाः अभावे तत्प्रयुक्ता पञ्चमी विभक्तिरपि न प्राप्यते।[१२] अस्यां स्थितौ पञ्चमी-विभक्ति-प्रयोग-रूपस्य लक्ष्यस्य सिद्ध्यर्थं पाणिनि-प्रोक्त-सूत्रस्थस्य ध्रुवपदस्य वास्तविकोऽभिप्रेतार्थो विचारणीयो भवति येन सूत्रप्रणयस्य सार्थक्यं भवेत्। अनया रीत्या विचारणायाः पृष्ठभूमिं विरच्य पाणिनीय-परम्परायाः समादरणीयाः आचार्याः यद्विमर्शं कुर्वन्ति तस्य सारः निम्नानुसारः वर्तते।

क) भाष्यकाराः कथयन्ति-इह तावदश्वात् त्रस्तात् पतितः इति, यत्तदश्वेऽश्वत्वमाशुगामित्वं तद् ध्रुवं, तच्च विवक्षितम्। रथात् प्रवीतात् पतितः इति यत्तद्रथे रथत्वं रमन्तेऽस्मिन्रथ इति तद् ध्रुवं, तच्च विवक्षितम्। सार्थाद् गच्छतो हीनः इति यत्तत्सार्थे सहार्थीभावस्तद् ध्रुवं, तच्च विवक्षितम्। एवं सर्वत्र ध्रुवत्वं परिकल्प्य अपादानसंज्ञा तत्प्रयुक्ता च पञ्चमी विभक्तिः अनुशासिता।

महाभाष्यस्य अस्मिन् समाधाने ध्रुवत्वं नाम स्थिरत्वं वर्तते, परं तादृशं स्थिरत्वं वस्तुगतं स्वाभाविकमान्तरिकं च ध्रुवत्वमस्ति। अस्यायमाशयः यत् अश्वे यदश्वत्वं वर्तते, रथे च यत् रथत्वं वर्तते, सार्थे च यत् सार्थत्वं वर्तते, तत् ध्रुवमस्तीति।

ख) महाभाष्योक्तस्यास्यैव विचारस्योपबृंहणं पाणिनीय-व्याकरण-परम्परायां विस्तरतः दृश्यते। वाक्यपदीये (३.७.१३८) भर्तृहरिः कथयति-द्रव्यत्वभावो न ध्रौव्यमिति सूत्रे प्रतीयते। अपायविषयं ध्रौव्यं यत्तु तावद्विवक्षितम्। भर्तृहरिवचनमिदं विवृण्वन् हेलाराजः आह-एवं च कृत्वा धावतोऽश्वात् पतितः। इत्यत्र पातस्य अश्वकर्तृकत्वाभावात्तेनानावेशे ध्रुवताश्वस्य तत्रास्त्येव।।[१३]

अस्मिन् विवरणेऽपि पदार्थगतस्य स्वाभाविकस्य स्थैर्यं ध्रुवत्वेन सूचितमस्ति, पदार्थेन सह प्रवर्तमानायाः क्रियायाः अपेक्षया दृश्यमानमध्रौव्यमस्थैर्यं वाऽपेक्षितं नास्तीति प्रतीयते।

ग) महाभाष्यस्य सुप्रसिद्धायाः प्रदीपटीकायाः कर्ता कैयटः विषयमिममधिकृत्य यन्मतं प्रदर्शयति तदपि ध्यातव्योऽस्ति। तद्यथा-ध्रुवमेकरूपमुच्यते। तच्च ध्रौव्यमपायविषयमाश्रीयते न त्वनवच्छिन्नम्। ततोपाये यदनाविष्टं तदपाये ध्रुवमुच्यते। देवदत्तकर्तृके च पाते त्रस्तस्याप्यश्वस्यापायानावेशाद् ध्रुवत्वम्। देवदत्तस्यैवापायावेशादध्रुवत्वम्।।[१४]

कैयटाचार्यकृतेऽस्मिन् विवरणे देवदत्तः त्रस्तात् अश्वात् पतितः - इति वाक्यप्रयोगो मनसि वर्तते। अत्र अश्वः देवदत्तश्चेति वस्तुद्वयमस्ति। उभयोः मध्ये अपायक्रियया केवलं देवदत्तः प्रभावितो भवति, न तु अश्वः। यतोहि पतनक्रियावशात् जायमानः व्रण-कायक्षत्यादिकः प्रभावः प्रतिभावो वा देवदत्ते दृश्यते। त्रस्तः सन्नप्यश्वः अपायक्रियातः अनाविष्टोऽर्थादप्रभावितः तिष्ठति। एवमप्रभावितोऽश्वः त्रस्तत्वेन अध्रुवोऽप्यत्र ध्रुवत्वेन स्वीक्रियते।

एषा स्वीकृतिरेव अश्वस्य अपादानसंज्ञां तत्प्रयुक्तां पञ्चमीविभक्तिं च प्रापयति, पाणिनीयवचनस्य च सार्थकत्वं साध्नोति।

उपरि चर्चितस्य विषयस्यानुरूपं वेदमन्त्रे प्रयुक्तस्य पृथ्वीविशेषणस्य यजमानविशेषणस्य च ध्रुवशब्दस्य अर्थघटनं क्रियते चेत् ध्रुवा पृथ्वी इत्यस्य वेदवचनस्यायमर्थः भवति–पृथ्व्यां यत्पृथ्वीत्वं वर्तते तत् स्थिरमस्तीति।

एवमेव ध्रुवः यजमानः इति विशेषणविशेष्यवतः वाक्यस्यार्थो भवति–यजमाने यद् यजमानत्वमस्ति तत् ध्रुवं स्थिमस्त्विति।

अतः ये विद्वांसः ध्रुवशब्दस्य स्थिरः इत्येवमर्थं प्रदाय वेदे पृथ्वी ध्रुवा अर्थात् स्थिरा वर्णितास्ति, न तु भ्रममाणेत्यादिकं क्षिपन्ति ते वेदाभिप्रायविरुद्धं विचारयन्तीति सप्रमाणमस्माभिरत्र प्रदर्शितम्। वस्तुतस्तु वेदे बहुत्र पृथ्वीभ्रमणनिर्देश उपलभ्यते। स्वामिदयानन्दसरस्वती स्वीयायाम् ऋग्वेदादिभाष्यभूमिकायाम् "आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः।[१५] मन्त्रमुद्धृत्य लिखन्ति यत् – "अस्याभिप्रायः अयं गौरित्यादिमन्त्रेषु पृथिव्यादयो हि सर्वे लोका भ्रमन्त्येवेति विज्ञेयम्।"[१६]

अथ चान्यत्र ध्रुवः यजमानः इत्यादिस्थाने पाणिनीय-वैयाकरणैः स्वीकृतायाः परम्परायाः अनुसरणं कुर्वन्तो वयमुपर्युक्ते मन्त्रे प्रयुक्तस्य ध्रुवशब्दस्य वास्तविकमर्थ–निर्धारयितुं यदा यतामः तदा, तत्तन्मन्त्रगतं पदार्थजातमाधृत्य ध्रुवशब्दस्य वास्तविकमर्थघटनं करणीयं भवति। तद्यथा– ध्रुवशब्दस्यार्थः वर्तते स्थिर इति। परन्त्वेषा स्थिरता केवलं गतिहीनतां न कथयति, अपित्वेषा स्थिरता तु तत्तत्पदार्थस्य समुत्पत्तिकाले परमात्मना प्रकृत्या वा ये गुणाः, यानि कर्माणि, यः स्वभावश्च नियतो वर्तते, स एव गुणः तदेव कर्म, स एव च स्वभावः स्थैर्यतां भजतीति मन्तव्यः। पृथ्वीपदार्थे यजनामव्यक्तौ च गुण–कर्मस्वभावाः ध्रुवत्वं स्थिरत्वं भजन्तीति वेदस्याशयः। यद्येवं ध्रुवपदार्थः विचार्यते चेत् वेदे प्रयुक्तस्य ध्रुव–पदस्य चारितार्थ्यं सर्वथा सुप्रतिष्ठितं भवतीति दिक्।

**सन्दर्भाः-**

१. ऋग्वेदे प्रायः एकोनपञ्चाशत् स्थानेषु अस्य प्रयोगः समुपलभ्यते।

२. ध्रुवा, ध्रुवे, ध्रुवासः, ध्रुवासु, ध्रुवस्य, ध्रुवाणि, ध्रुवम्–इत्यादिरूपेण।

३. ध्रुवच्युतः (१.६४.११), ध्रुवक्षेमासः (३.५४.२०), ध्रुवक्षेमा (४.१३.३) तथा (५.७२.२) – इत्यादिरूपेण।

४. ध्रुवति। ध्रुव स्थैर्ये (तु. प. से.)। इगुपध..।। पा.सू. ३.१.१३५ इति कः (प्रत्ययः)।। द्र. अमरकोषस्य रामाश्रमीटीका, पृ. ५०४ (सं. हरगोविन्द शास्त्री, प्रका, चोखम्बा संस्कृतसिरीझ ओफिस, वाराणसी, सन् १९७०)


ISSN : 2454-2881

५. इति हैमकोषे (द्रष्टव्यम्- २.५.३९, पृ. ५४०)।

६. ऋग्वेदः, १०.१७३.४

७. ऋग्वेदसंहिता सायणभाष्यसमेता, नवम-दशम-मण्डलात्मकः चतुर्थो भागः, पृ. ८६८ (संपा, श्रीनारायण शर्मा चिन्तामणि शर्मा च, प्रका. वैदिक संशोधन मण्डल, पुना, सन् १९४६)

८. ऋग्वेदः, १०.१७३.५

९. तत्रैव, पृ. ८६८

१०. मन्त्रार्थस्तु- हे औदुम्बरि, त्वं ध्रुवा स्थारासि। त्वमिव यजमानोस्मिल्लोकं स्वकीय आयतने ध्रुवो भूयात् स्थिरो भवतु।। शुक्लयजुर्वेदसंहिता, करपात्रिभाष्यम्, पृ. १८४ (संपा, प्रो. व्रजवल्लभ त्रिवेदी, प्रका. श्रीराधाकृष्णधानुका प्रकाशनसंस्थानम्, कलकत्ता, प्रथमसंस्करणम्)

११. द्रष्टव्यम्- करपात्रिमहानुभावानां वचनम्- न च यजमानपत्न्यां ध्रौव्यं सम्भवति, न वा यजमानस्य ध्रौव्यं विधीयते, व्यवहारे कर्मण एव प्राधान्येन स्थैर्यस्य दूषणत्वात्।। तत्रैव, पृ. १८६

१२. द्रष्टव्यम्- गतियुक्तेष्वपादानसंज्ञा नोपपद्यतेध्रुवत्वात्।। महाभाष्यम् १.४.२४

१३. हेलाराजः, पृ. ३४० (द्र. हेलाराजटीकासमेतम्, वाक्यपदीयम्, संपा. के.सु. ऐय्यर, पूना, सन्-१९६३)

१४. भाष्यप्रदीपः, पृ. ३९०

१५. यजुः ३.६

१६. भूमिकाभास्करः (प्रथमभाग), पृ. ४०३ (सं. स्वामी विद्यानन्द सरस्वती, प्रका. इण्टरनेशनल आर्यन फाउन्डेशन, बम्बई, १९८८)

* महर्षि-सांदीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठानेन उज्जैनस्थितेन (म.प्र.) समायोजिते (दि. ४, ५, ६ तथा ७ जनवरी, २०१३) अन्तर्राष्ट्रिये द्वितीये वेद-सम्मेलने प्रस्तुतः शोधालेखः।

# व्यवहारिकजीवनोपयुक्ताः नीतिश्लोकाः

प्रो. शान्ति पोखरेल

संस्कृतसाहित्यं धर्मार्थकाममोक्षाख्यं चतुर्विधपुरुषार्थसाधकम्। एतद्यथा श्रुतिसुखदं रसमण्डितमाह्लाददायकं तथैव भावमाधुर्यमपि। निखिलं संस्कृतसाहित्यं काव्यशब्देनाभिहितम्। तद् काव्यञ्च गद्यमयं पद्यमयं गद्यपद्यमिश्रितं चम्पूमयं मुक्तकं वा भवितुमर्हति। तत्र नीतिश्लोकाः प्रायशः उपदेशमूलाः सदाचारविषयकाः राजनीतिपरकाः मानवव्यवहारयुताश्च भवन्ति। नीतिशब्दस्य व्याख्या शब्दकल्पद्रुमे एवं दर्शिता–'नीयन्ते संलभ्यन्ते उपायादय ऐहिकामुष्मिकार्था वास्यामनया वा, नी–अधिकरणे, करणे वा क्तिन्' इति। वस्तुतः समाजेन सह स्वं सत्पथि परिचालयितुं ये खुल विधिनिषेधाः पालितव्यास्ते नीतिशब्देनाभिहिता। तत्र धर्मनीतिः, अर्थनीतिः, राजनीतिः, दण्डनीतिः, आचारनीतिः, व्यवहारनीतिश्चेत्यादयः नीतिनां भेदाः। यद्यपि संस्कृतसाहित्ये सर्वत्र नीतिपरकानि वाक्यानि पद्यानि च विलसन्ति परन्तु साहित्यिकदृष्ट्या नीतिमुलकाः इमे ग्रन्थाः विशेषतया ख्याताः– चाणक्यशतकम्, सुन्दरपाण्ड्यस्य नीतिद्विषष्टिका, शान्तिदेवस्य बैधिचर्यावतारः, शिक्षासमुच्चयः, भर्तृहरेः शतकत्रयम्, शङ्कराचार्यस्य मोहमुद्गरः, जल्हणस्य मुग्धोपदेशः, वेदान्तदेशिकस्य सुभाषतनीवी, कुसुमदेवस्य दृष्यन्तशकतम्, द्याद्विवेदस्य नीतिमञ्चरी, गुमानिकवेः उपदेशशतकम्, वेङ्कटाध्वरिणः सुभाषितकौस्तुभश्च प्रमुखाः[१]। एतेषु चाणक्यनीति इत्याख्यायाः श्लोकाः अधुनापि व्यवहारिकजीनोपयुक्ता इति मन्यते।

नीतिपरककाव्यानि अनुभवसिद्धतथ्योपरि समाधृतानि भवन्तीति केषाञ्चिद् मतम्[२]। तत्र यथा नीतिवाक्यानि तथैव उपदेशपरकाणि कथनान्यपि समाश्रितानि भवन्ति। एतादृशैः वाक्यैः श्लोकैर्वा समान्यजनानां मानसपटले प्रभावः परिलक्ष्यते। यतः एतेषां काव्यानां विकाशे धर्मदर्शनयोर्प्रभावः सुस्पष्टतया परिलक्ष्यते इति विदुषां मतम्[३]।

मानवजीवने सुखदुःखानि चक्रवत् परिवर्तन्ते इति तु सर्वविदितम्। तस्मात् सुखदुःखात् जन्ममरणकष्टाद्वा मुक्त्यर्थमुपायाः मानवैः परिचिन्तिताः। मानवा अपि न सर्वे स्वभावेन समानाः। तेषु गुणदोषाः सद्गुणाः दुर्गुणाः वा विलसन्त्यैव। तान् गुणान्नाश्रित्यैव जनः महान् सामान्यो नीचो वेति


ISSN : 2454-2881

निर्द्धार्यते। 'आचारहीनान्न पुनन्ति वेदाः' इति ख्यातोक्तिः। सदाचार-दुराचारादिविषया अपि नीतिशास्त्रे चिताः। जीवनं ससाफल्येन यापनार्थं किं कर्तव्यं किमकर्त्तव्यञ्चेति निर्देशोऽपि तत्र तत्र समावेशितः। अर्थोपार्जनोपायाः अन्यायेनार्थोपार्जननिषेधादयश्चापि नीतिश्लोकेषु समावेष्टिताः। सज्जनानां सत् संगतयुतानां प्रशंसा दुर्जननिन्दा च प्रायशः एतादृशेषु काव्येषु विलसन्ति। राजधर्म-मित्रधर्म-स्त्रीधर्मादीनि चरित्राणि च तत्र तत्र काव्येषु चित्रितानि। इह उपर्युक्तविषययुतानां कतिपयश्लोकानामुध्दरणपुर्वकं तेषामधुना व्यावहारिकत्वं जीवने प्रयोगत्वञ्च समासेन विश्लेष्यते।

नीतिश्लोकेषु चाणक्यनीतिश्लोकाः सरलाः बोधपरकाः सर्वजनविदिताः सुख्याताश्य सन्ति; तान्नेव समाश्रित्य प्रारभ्यते। अन्न-वस्त्र-निवासस्थानञ्च सामान्यदृष्ठ्या मनुष्याणां मौलिकप्रयोजनम्। तत्र निवासः कुत्र कस्मिन्देशे वा कार्यः इति चारुतया निर्देशितः चाणक्यनीतिसु[४], यथा- 'धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः। पञ्च यत्र न विद्यन्ते न तत्र दिवसं वसेत्' इति। यत्र 'धनिकाः' आधुनिकदृष्टया वित्तकोशाः (बैंक इत्यादयः) वा यत्र न सन्ति तत्र धनादानप्रदानविषये अत्यसौविध्यं भवतीति वयं सर्वे जानीमः। तादृशे स्थाने न निवासकार्यः इति निवासनीतिः। 'श्रोत्रियाः'- वेदपारगाः शास्त्रज्ञाः बुध्दिजीविनो वा यत्र न विलसन्ति तत्र बौद्धिकचर्च्चा यथा न स्यात् तथैव न्यायमपि न प्राप्यते दुर्बलेन। यत्र विद्वांसो न सन्ति तत्र बाहुबलिनामत्याचारः प्रायशो भवति। 'राजा' शासकः प्रशासको वा अवश्य भवितव्यः सुशासनार्थम्, अन्यथा 'शुले मत्स्यानिवापक्षन् दुर्बलान् बलवत्तरा' इतिवत् मनुप्रोक्तः मत्स्यन्यायः प्रचलति दुर्बलाश्र्च प्रताडिता भवन्ति। 'नदी' जलस्रोतः अवश्यं स्यात्। यतः 'जलमेव जीवनं जीवानाम्'। जलाभावे जीवनं दुरूहं कृषिकर्म च असम्भवं यच्च जीवननिर्वाहार्थम् अधिकांश-भारतीयानां साधनम्। 'वैद्य'- चिकित्सकः चिकित्सालयो वा यदि न स्यात् अकालमृत्युः अवश्यं भविष्यति, औषधानां वैद्यानां वाभावात्। अत उक्तम् इमे यत्र न विद्यते तत्र न निवासकार्यमिति।

पुनश्चाह-'यस्मिन् देशे न सम्मानो न वृत्तिर्न च बान्धवाः। न च विद्यागमः कश्चित् तं देशं परिवर्जयेत्'[५] इति। श्लोकस्त्वधुना प्रासङ्गिको व्यावहारिकश्र्च। यतः न सामान्यतया स्वस्थः सच्चित्तवान् जन असम्मानिते स्थाने, यत्र जीविका न स्यात् विद्यार्जनसाधनं स्थानं वा न भवेत्, तत्र आत्मीयजना अपि यदि न सन्ति तत्र न निवसति जीवनधारणसाधनरहितत्वात्। न किमपि स्यात् किन्तु आत्मसम्मानमवश्यं भवेत् तत्र यत्र जनाः विलसन्ति। यतः सम्मानरहितस्थाने आत्मसुखं नैवावाप्यते इति तु अनुभवसिध्दं प्रमाणम्।

साम्प्रतिककाले बान्धवाः बहुविधाः मिलन्ति यथा घनिष्ठबन्धुः, सहपाठी, सहकर्मी, फेइसबुक-बन्धुः, ट्विटार-बन्धुः, वयफ्रैंड्, गर्लफ्रैंड् चेत्यादयः। परन्तु विपत्तौ ये सहायकाः भवन्ति ते एव वास्तविक-

बान्धवा इति नीतिवचनम्। प्रायशः धनमस्ति चेत् मित्राणामभावो नैव भवति, धनराहित्ये तु 'यावत् वित्तोपार्जनसक्तः तावत् निजपरिवारो रक्तः' इतिवत् स्वजनाः अपि सुजनवत् न व्यवहरन्ति। निर्धनानां बान्धवास्तु अधुना क्षणिकाः। अतः चाणक्येन मित्रस्य परिभाषा एवं बिहिता– 'आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे। राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः'[६] इति। अर्थात् रुग्णावस्थायां, विपत्तिकाले, खाद्यान्नानामभावे, शत्रुवेष्टितेकाले, राजभयादि आसन्ने सति, मृत्यशोकाद्यवसरे च यः स्वबान्धवं न त्यजति सहयोगार्थमागच्छति स एव प्रकृतबन्धुः। अन्ये तु 'सुखके सब साथी दुःख में न कोइ' इतिवत् उद्देश्यसिध्दये हि बन्धुभावं प्रदर्शयन्ति। सुमित्रं कथं जानीयात् इत्योपरि च चाणक्यवचनमेवमस्ति– 'जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे। मित्रं चापत्तिकालेषु भार्यां च विभवक्षये'[७] इति।

न च सर्वं मित्र विश्वसितुं शक्यते विश्वसितेष्वपि न कदापि गुढतमं रहस्यं तं वदेतिति शास्त्रनीतिः। मित्रं तु सर्वदा विश्र्वसितेष्वपि न कदापि गुढतमं रहस्यं तं वदेतिति शास्त्रनीतिः। मित्रं तु सर्वदा विश्र्वसनीयं भवत्येव– 'तन्मित्रं यत्र विश्र्वासः' इत्युक्तिः। प्रायशः सुमित्रेण सह सर्वविधरहस्यमालोच्यते। परं नीतिवचन्तु 'न विश्वसेत् कुमित्रे च मित्रं चापि न विश्वसेत्। कदाचित् कुपितं मित्रं सर्वगुह्यं प्रकाशयेत्'[८] इति। यतः न सर्वदा सर्वेषां मनःस्थितिः समाना भवेत्। देशकालपात्रपरिस्थित्यनुसारं परिवर्तनमद्यतनीया रीतिः। अतः अद्यतनीयं मित्रं आगामिकल्ये अमित्रं भवितुं शक्नोति परिस्थितिवशात्। तदा तेन शत्रुभावेन सर्वाणि गृढव्यापाराणि अनावृयते येन प्राणहानिरपि भवितुमर्हति। पुनश्च कानिचन मित्राणि 'परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्' भवन्ति। अतः मित्रनिर्वाचनं मित्रेण साकं व्यवहारं वा दूरदृष्ट्या कर्त्तव्यमिति व्यावहारिकजीवनोपयुक्ता नीतिः।

'संसारोयमतीव विचित्रः' इति शङ्कराचार्योक्तिः। संसारे न कस्यापि कृते सर्वदा सुखं दुंखं वा दृश्यते। यतः 'चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च' इति भणितिः। यथा रात्र्यानन्तरं दिवा दिवानन्तरं रात्रिः तद्वत् सुखानि दुःखानि क्रमेणागच्छन्ति। न कोऽपि इहलोके निर्दोषो व्याधिरहितः सर्वसुखयुक्तो वा। अतः चिन्ता न कार्या विपत्तौ। सर्वं सामयिकमिति मत्वा वोढव्यम्, क्रमशः दुर्दिनानि गमिष्यन्ति। प्रसङ्गोऽयं चाणक्यनीत्यामेवमाह– 'कस्य दोषः कुले नास्ति व्याधिना को न पीडितः। व्यसनं केन न प्राप्तं कस्य सौख्यं निरन्तरम्'[९] इति। अतः विपत्तौ धैर्यच्युतिर्न भवेत्।

उद्योगेन सर्वं साध्यते। 'उद्योगे नास्ति दारिद्रियम्' इत्यपि भणितिः। 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः' इत्यप्युक्तिः। परन्तु न सर्वदा सर्वं कार्यम् उद्योगेनैव सिद्ध्यते। ये न विश्र्वसन्ति शास्त्रं तेऽपि स्वभविष्यं ज्ञातुमुत्सुकाः। अतः कतिपयविषयाः दैवाधीनाः इति विश्र्वसन्ति तेऽपि। व्यावहारिकजीवने लक्षीक्रियते चेत् एतत् सत्यमेव, यथा– 'आयुः कर्म च वित्तञ्च विद्या निधनमेव च। पञ्चैतानि हि


ISSN : 2454-2881

सृज्यन्ते सर्भस्थस्यैव देहिनः' इति चाणक्यवचनानुसारं नराणाम् आयुः कर्मक्षेत्रं विद्यार्जनं धनार्जनं मृत्युकालश्च न स्ववशगाः। केचन इह 'कर्म' इत्यनेन विवाहकर्म इत्यपि वदन्ति। येन विवाहोऽपि दैवाधीनः। अतः 'एतत् सर्वं भवितव्यं हि यदि कर्म अहरह क्रियते' इति धिया कर्मप्रवृत्तो भवेत्। सूक्तमुपनिषदि गीतायाञ्च- 'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समा'[१०] इति। 'कर्मण्येवाधिकारस्ते......'[११], 'स्वकर्मणा तमभ्यर्च्य सिध्दिं विन्दन्ति मानवाः'[१२] चेति।

सुभाषितेषु निगदितं 'षड्दोषाः पुरूषेणेह हातव्याः भूतिमिच्छता। निद्रा तन्द्र भयं क्रोध आलस्यं दीर्धसुत्रता'। इमे उन्नतेर्बाधकाः। 'कल करै तो आज कर आज करै तो अब' इत्यनुसारम् आलस्यं त्यक्त्वा करणीयं कर्म त्वरितं कर्तव्यम्। यतः 'न कश्चिदपि जानाति किं कस्य श्वः भविष्यति'। आलस्यवशात् कर्तव्यानि कर्माणि दीर्घसूत्रतां यान्ति। कदाचित् भयमपि कारणं कार्यविघ्नस्य। 'प्रारम्भते न खलु विघ्नभयेन नीचैः........'[१३] इति सुष्ठु भणितमपि। भयं प्राणीनां स्वभावजातम्। जीवनं कस्य नाप्रियम्। जीवनप्रीतिः भयाद्बिभेति। भयमनुशासनमपि, यथोक्तमुपनिषत्सु- 'भीषास्माद्वायुः पवते। भीषोदेति सूर्यः। भीषास्माद-ग्निश्चन्द्रश्च। मृत्युर्धावति पञ्चमः'[१४] इति। इह वायुः सूर्यः अग्निः इन्द्रः मृत्युश्च न भीताः अपितु अनुशासनयुताः। प्रसङ्गस्तु भयस्य। भेतव्यं सकारणं, न अकारणं भेतव्यम्। भयमागमनात् पूर्वं सावधानो भवितव्य। परन्तु यदि भयं समागच्छेत् तदा सत् साहसेन तं प्रहर्तव्यं सोढव्यं वेति चाणक्यनीतिः, या च सर्वदा प्रासङ्गिकी प्रायोगिकी च- 'तावद् भयेषु यावत् भयमनागतम्। आगतं तु भयं दृष्ट्वा प्रहर्तव्यमशङ्कया'[१५] इति।

ऐतरेयब्राह्मणस्य सुविख्याता सप्रासङ्गिकी भणितिरस्ति 'चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्...'[१६] इति। 'चरन्' अर्थात् गतिशीलः, सक्रियो वा जनः। यः सक्रियः सः जीवने सुफलमवाप्नोतीति आशयः। 'न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः' इत्यनेन यथा शक्तिशालिनः अपि अनायासेन न किमपि अवाप्तते इत्याशयः प्रकटितः तद्वत् निष्क्रियो जनः स्वलक्ष्यमवाप्तुम् असमर्थो भवति इति कथनं नीतिश्लोकेषु विद्यते, यथा- 'भ्रमन् सम्पुज्यते राजा भ्रमन् संपूज्यते द्विजः, भ्रमन् संपूज्यते योगी.......'[१७] इति। भ्रमणशब्देन इह कार्यतत्परता बोद्धव्या। ये शासकाः विद्वांसः साधकाश्च स्वस्वकार्ये तत्पराः कर्मठाः भवन्ति तेषां साफल्यं सुयशः वर्ध्दमानं परिलक्ष्यते इह जगति। एतत् प्रत्यक्षं प्रमाणितम्, अत एवाह- 'चरैवेती'ति।

मानवजीवनममूल्यं धनम्। येन केनापि प्रकारेण जीवनं रक्षितव्यं परिपालितव्यञ्च, यतः 'जीवन्नरोभद्रशतानि पश्यति' इति भागवतवचनम्। शरीरं यदि स्वस्थं स्यात् मनसि च स्थैर्यं स्यात् प्राणशक्तिर्यदि सजीवा भवेत्तदा जीवने कर्मपाटव्यं सोत्साहेन प्रदर्शयितुम् इष्टफललाभञ्च अनायासेनावाप्

शक्तते। एतत् प्रत्यक्षतया दृश्यते हि। कालिदासोक्तिः तत्र प्रणिधानयोग्य– 'शरीरमाद्यं खलु धर्मसाधनम्' इति। निरोगं तनुः दीर्घायुष्यं लभते। आयुर्प्राणशक्तिर्हि। अतः जीवनं सर्वथा रक्षेत्। अन्यत् सर्वं तु जीविते सति पौनः पुन्येनापि प्राप्तुं शक्यते इत्याह, यच्च साम्प्रतिकाले व्यावहारिकजीवनोपयुक्तम्– 'पुनर्वित्तं पुनर्मित्रं पुनर्भार्या पुनर्मही। एतत् सर्वं पुनर्लभ्यं न शरीरं पुनः पुनः'[१८] इति।

जीवने अस्माभिः कदा कुत्र कथं केन प्रकारेण च व्यवहर्तव्यमिति व्यावहारिकजीवने समुपयुक्तं वचनं नीतिश्लोकेषु विराजन्ते। एतादृशाः श्लोकाः अस्माकं जीवनपाथेयं भवितुमर्हन्ति। यथा– 'कः कालः कानि मित्राणि को देशः कौ व्ययागमौ। कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहः'[१९] इति।

परिशेषे वक्तुमिष्यते यत् एतादृशाः व्यावहारिकजीवनोपयुक्ताः नीतिश्लोकाः ह्यस्माकं जीवने सदर्थकाः सन्मार्गप्रेरकाश्च। परन्तु यत् किमपि व्यवहारिकजीवनोपयुक्तं स्यात् तत्र मुखनिर्गता वाणी प्रमुखा उपकारणरूपा। यतः वाणी सुमधुरा सुष्पष्टा समयोपयुक्ता हितकारी वा न स्यात् तदा दैनन्दिनजीवने सामाजिकं भवितुं नार्हति। न केवलं मानवाः जन्तवोऽपि प्रियवाक्येन प्रियरवेण वशगाः अनुकारिणो वा भवन्ति। वैदिकहस्तस्वरविषये यथाह– 'यथा वाणी तथा पाणिः' तथैव व्यावहारिकजीवनेऽपि कथनेन सह कार्यस्य व्यवहारस्य आचरणस्य वा मेलनं यदि स्यात् तदा तस्य वशगाः भवन्ति सर्वे, जनप्रियत्वं सर्वजनग्राह्यत्वञ्च वर्द्धते। मधुरव्यवहारे मधुरवचने कार्पण्यं त्यक्तव्यमित्याशयः नीतिश्लोकेनापि चर्च्चितः– 'प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः। तस्मात्तदेव वक्तव्यं वचने का दरिद्रता' इति। परन्तु अप्रियं सत्यं न वक्तव्यमिति नीतिः कवीनाम्– 'सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्' चेति। एते सर्वे ह्यस्माकं दैनन्दिनजीवने घटितानां घटमानानां घटितव्यनाञ्च घटनां निदर्शयन्ति प्रदर्शयन्ति स्मारयन्ति प्रेरयन्ति च सन्मार्गात् प्रति इति शम्।

**सन्दर्भनिर्देशाः**

१. संस्कृतसाहित्येतिहास :– आचार्य लोकमणि दाहाल, पृ. ३०४.
२. उक्तग्रन्थः, पृ. ३०४.
३. उक्तग्रन्थः, पृ. ३०४.
४. सम्पुर्ण–चाणक्यनीतिः– रूपान्तरणे डा० महेन्द्र मित्तल (चा. नी. १.९)
५. चा. नी., १.८
६. उक्तग्रन्थः, १.१२
७. उक्तग्रन्थः, १.११
८. उक्तग्रन्थः, २.६


ISSN : 2454-2881

९. उक्तग्रन्थः, ३.१
१०. ईशोपनिषद्, २
११. श्रीमद्भगद्गीता, २.४७
१२. उक्तग्रन्थः, १८.४६
१३. भर्तृहरिनीतिशतकम्, २७
१४. तैत्तिरीयोपनिषद, १.८.१
१५. चा.नी., ५.३
१६. ऐ. ब्रा., ३३.३
१७. चा. नी., ६.४
१८. उक्तग्रन्थः, १४.३
१९. सुभाषितावलिः (वल्लभदेवस्य), श्लोकसंख्या- २८०४

# मनोरञ्जनशास्त्रिणः पताकाम्नाये दार्शनिकतत्त्वम्

ड॰ रातुलबुजरबरुवा

पुराकालिके संस्कृतवाङमये बहुधा चर्चिते प्रागज्योतिष-कामरूपवेत्याख्ये सुप्रसिद्धे उत्तरपूर्वीयभूखण्डे असमप्रदेशः अन्यतमः। प्राचीनसंस्कृतकाव्यपरम्परायाः समान्तरालेन असमप्रदेशस्य अर्वाचीनसाहित्यमपि संस्कृतसाहित्यभण्डारं समृद्धं करोति। असमप्रदेशे मनोरञ्जनशास्त्रि-विश्वनारायणशास्त्रि-भवदेवभागवति-वटुनाथचक्रवर्ति-वैकुण्ठनाथचक्रवर्तिप्रभृतयः ये पण्डितप्रवराः आधुनिकसंस्कृतकाव्यसृष्टिपरम्परायाम् अवदानं संयोजयन्ति तेषु मनोरञ्जनशास्त्रिमहोदय अन्यतमोऽस्ति। १९११ तमांगलाब्दे असमप्रदेशस्य दरङ्मण्डलान्तर्गतभेरुवेति ग्रामे मनोरञ्जनशास्त्रिणो जन्म अभवत्। स्मृति- मीमांसा-वेदान्त-व्याकरणप्रभृतिषु शास्त्रेषु सिद्धहस्तः शास्त्रिमहाभागः असमप्रदेशस्य नलबारीमण्डले स्थिते नलबारी-संस्कृतमहाविद्यालये अध्यक्षपदम् अलंकरोति स्म। राष्ट्रपतिपुरस्कारभूषितस्य शास्त्रिणः १९८८ आंगलाब्दे देहान्तरप्राप्तिः सञ्जाता। अनेन पण्डितप्रवरेण विभिन्नविषयेषु महत्त्वपूर्णाः बहवो ग्रन्थाः लिखिताः। अस्य प्रकाशितकृतयः सन्ति - साहित्यदर्शन, असमर वैष्णव दर्शनर रूपरेखा, कुमारिलभट्टपाद आरु आचार्य धर्मकीर्ति, पुरणि असमर धर्म आरु दर्शन, वाक्यार्थवोध, पताका-प्रकाश, पताकाम्नायः, उतंङ्कभैक्षम्, प्रकामकामरूपम्, केतकीकाव्यं चेति।

मनोरञ्जनशास्त्रिणः 'पताकाम्नायः' इति नामधेयं खण्डकाव्यं १९६६ आंगलाब्दे प्रकाशितमभवत्। पताकाम्नायः भागद्वये विभक्तोऽस्ति - पूर्वार्द्धमुत्तरार्द्धञ्च। भारतवर्षस्य सर्वजनसमादृतस्य राष्ट्रध्वजस्य राष्ट्रियचिह्नस्य च दार्शनिकतत्वाश्रितमेतद् काव्यं रचितमभवत्। काव्यस्य पूर्वार्द्धे शतसंख्यकश्लोकेषु राष्ट्रियचिह्नस्य विविधप्रसंगेषु तात्पर्यं वर्णितम्, उत्तरार्द्धे एकसप्ततिश्लोकेषु राष्ट्रध्वजस्य तात्पर्यमुपस्थापितम्। खण्डकाव्येऽस्मिन् शास्त्रिणः भारतीयदर्शनस्य ज्ञानवैभवं प्रकाशितं जायते। काव्येऽस्मिन् आचार्यमनोरञ्जन-शास्त्रिकृता जनमनोरञ्जन्याख्या स्वकृता संक्षिप्ता व्याख्या सन्निविष्टा भवति।

पताकाम्नाये शास्त्रिणः भारतीयदर्शनस्य ज्ञानवैभवं दृश्यते। पताकास्थितैरवयवैः प्रकाशितानर्थान्


ISSN : 2454-2881

उल्लिख्य तस्याः सांख्यदर्शनानुसारं स्वरूपं शास्त्रिमहोदयो विचारयति। पताकागतः स्तम्भस्तु जीवात्मरूपः पुरुषः। पताकायाः वाससं (वस्त्रं वा) प्रधानं प्रकृतियुतं वा, स्तम्भवस्त्रयोः संयोगसाधनरूपरज्जु प्रकृतिपुरुषयोः सम्बन्धसूचिकास्ति। उच्यते हि कविना –

कीलकं पुरुषं विद्यात् प्रधानं वाससं तयोः ।।
सम्बन्धहेतुं तद्रज्जुं येन सर्गः प्रवर्त्तते ॥[१]

सांख्यदर्शनेऽपि प्रकृतिपुरुषयोः संसर्गेण सृष्टिप्रक्रिया उल्लिखिता अस्ति। पताकाव्यञ्जितार्थव्याख्यानावसरे तेन पताकास्थितस्य चक्रस्य व्याख्यानं सांख्य–वैशेषिकदर्शनानुसारं प्रदत्तम्। चतुर्विंशति अरास्तु वस्तुतस्तु प्राणाः पञ्च (प्राण–अपान–व्यान–उदान–समान), पञ्चतन्मात्राणि (शब्द–स्पर्श–रूप–रस–गन्ध), पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, अन्तःकरणानि यथा मनो बुद्धि-चित्ताहंकाराः इति मिलित्वा चतुर्विंशति अराः। चतुर्विंशति–अरानां तात्पर्यं प्रकटयन् कविराह –

अरास्तु प्राणास्तन्मात्र –ज्ञानकर्मेन्द्रियाणि च।
अन्तःकरणयुक्तानि चतुर्विंशतिसंख्यया ॥[२]

मायाश्रयं परमेश्वरं राष्ट्रिय–ध्वजस्य कीलकेन सङ्केतितं भवति। रज्ज्वा स्तम्भः वस्त्रं च यथा ग्रथितो भवति तथा कार्यकारणसम्बन्धेन जगत्प्रक्रिया परिचालिताऽस्ति।

मायिनं कीलकं विद्यान्मायां तु वसनाकृतिम्।
कार्यकारणभावात्मा रज्जुरन्यद्यथोदितम् ॥[३]

राष्ट्रध्वजस्य वर्णत्रयं सांख्यदर्शनस्य प्रकृतेः सत्व–रज–तमादिगुणत्रयमेव व्यञ्जितम्–

सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः।
गुरु वरुणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥[४]

श्वेताश्वतरोपनिषदि उक्तमस्ति –

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥[५]

राष्ट्रीयमुद्रायां सिंहानामध नाभिनेमिसमन्वितं चक्रमेकं वर्तते। चक्रस्य मध्यस्थितकेन्द्रमेव नाभिः, बर्हिस्थितावरणं च नेमिरूपेण कल्पितमस्ति। चक्रस्य ब्रह्ममयत्वम् उपस्थाप्य कविना प्रकाशितं यत् कालरूपिण्या नेम्या ब्रह्मस्वरूपिण्या नाभ्या च चक्रमिदं सदैव एकरूपं धार्यते। शास्त्रिमहोदयेन वैशेषिकदर्शनस्य सप्तपदार्थान् स्वीकृत्य राष्ट्रीयमुद्रया संकेतितं वैशेषिकतत्वमुपस्थापितम्। भाषापरिच्छेदेऽपि उक्तम्–

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः।।[६]

भाषापरिच्छेददिशा सप्तपदार्थाः राष्ट्रीयप्रतीकस्य चक्रस्यावयवत्वेन कल्प्यते। तथैव द्रव्यं चक्रस्य नाभिरूपेण उपस्थापितम्। पुनश्च चतुर्विंशतिसंख्यकाः गुणाः अराः,[७] समवाय-सामान्य- विशेषा इति पदार्थत्रयं चक्रस्य नेमिरूपं परिवेष्टनम्, चक्रान्तर्गतरिक्तस्थानमेव अभावरूपेण कल्पितम्।

वैशेषिकनये चक्रं द्रव्यनाभं गुणारकम्।
समवायक-सामान्य-विशेषपरिवेष्टनम्॥
अभावरन्ध्रकं कर्मभ्रमिकं जगदात्मकम्।
धर्मेण विधृतं तत्तु ज्ञानसाधनमुत्तमम्॥[८]

चक्रस्य तात्पर्यविचारप्रसङ्गे कविना स्वकीयप्रतिभया जैनमतस्यालोचनं कृतम्[९]। जैनदर्शनानुसारं मोक्षस्तु सम्यग्दर्शनज्ञानचारित्रात्मकः। सम्यग्दर्शनस्य सम्यग्ज्ञानस्य सम्यग्चारित्रस्य च युगपदवस्थानेन मुक्तिमार्गो भवति। सर्वदर्शनसंग्रहे माधावाचार्येण सम्यग्दर्शनप्रसङ्गे एवमेव भणितम्-

रुचिर्जिनोक्ततत्त्वेषु सम्यकश्रद्धानमुच्यते।
जायते तन्निसर्गेण गुरोरधिगमने वा।।[१०]

सम्यग्ज्ञानेनैव जीवः सत्यमसत्यं विचारयितुं शकयते। अवस्थितानां तत्त्वानां पदार्थानां वा तदनुरूपः यः बोधः संक्षेपेण विस्तरेण वा भवतु तज्ज्ञानं सम्यग्ज्ञानं स्यात्-

यथावस्थिततत्वानां संक्षेपाद्विस्तरेण वा।
योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिणः।।[११]

कविना उक्तं यत् सम्यग्दर्शन-सम्यग्ज्ञान- सम्यग-चारित्रञ्च चक्रस्य नाभिस्वरूपाः। केचन जैनदर्शनस्य सप्ततत्वानि स्वीकुर्वन्ति- जीवाजीवास्त्रवबन्धसम्वर-निर्जरमोक्षास्तत्त्वानि[१२] कवे आशयः यत् एते सप्तपदार्थाः चक्रस्य नेमिभूताः।

प्रत्यक्ष-अनुमान-उपमान-शब्दाः चत्वारि प्रमाणानि, वात्स्यायननिर्दिष्टाः द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायादि षड् प्रमेयान् न्यायदर्शनसम्मताः संशय-प्रयोजनादिचतुर्दशपदार्थान् च मिलित्वा चक्रस्य चतुर्विंशति अराः भवन्ति। राष्ट्रीयमुद्रायां निहिता चक्रान्तर्गता नाभिः प्रमातृरूपेण नेमिः च प्रमितिरूपेण व्यञ्जिते स्तः। तथा हि उच्यते -

प्रमातृनाभिकं नयनये यमितिनेमिकम्।
इतरैर्धटितारं तत्चक्रं तत्वमयं महत्॥[१३]


ISSN : 2454-2881

वृषभाश्वयोः समाहारः योगक्षेमयोः प्रत्यायकौ भवतः। अप्राप्तस्य वस्तुनः प्राप्तिः योग इत्युच्यते, प्राप्तस्य वस्तुनो रक्षणं क्षेमशब्दवाच्यम्। यजुर्वेदानुसारं योगक्षेमाभ्यां हि राष्ट्रं समृद्धं भवति।[१४] पुनश्च वृषभाश्वयोः युगपत् स्थितिरेव ईशोपनिषदि प्रतिपादिता त्यागपूर्वकभोगसाधनस्य सूचको भवति-[१५] ''त्यागात्मा वृषभो ज्ञेयो भोगात्माश्वः प्रतीयताम्''। ईशोपनिषदि प्रोक्तम्-तेन त्यक्तेन भुञ्जीथा।[१६] भारतवर्षस्य मुद्रायाम् अङ्कितानां चतुर्णां सिंहानां संकेतितमर्थमस्ति -

स्वातन्त्र्यमभयं वीर्यं शौर्यं चेति चतुष्टयम्।
संहतैर्हरिभिर्ज्ञेयं स्वतस्तद्गुणवत्वतः॥[१७]

अर्थात् मुद्राङ्किताः सिंहाः किल स्वातन्त्र्यमभयं-वीर्यं पराक्रममिति चतुष्टयस्य हेतवः भवन्ति। एते गुणाः युगपत् स्थित्वा भारतवासिनां साम्य-मैत्री-प्रीतिश्च सूचयन्ति इति सङ्केतितार्थः। प्रतीके अङ्किते 'सत्यमेव जयते' इति उपनिषद्वाक्येन[१८] देशवासिनां सत्यप्रतिष्ठत्वमेव ध्वनितं भवति। पताकाम्नाये उक्तमस्ति-

तदधश्चाङ्कितं श्रौतं सत्यस्य जयघोषणम्।
येन सत्यप्रतिष्ठत्वं राष्ट्रस्याङ्गीकृतं भवेत्॥[१९]

वृषभाश्वाभ्यां प्रतिपादितं राष्ट्रवासिनां कर्तव्यं कल्प्यमानः कविना उक्तं यत् राष्ट्रियचिह्ने निहितस्य अश्वस्य लोकसेवाकार्यदर्शनात् तेन प्राणिसेवा प्रतीयते। तद्वत् वृषभस्य च स्थिरस्वभावतया तेन संयमः सूचनीयः। किञ्च अशोकस्य धर्मचक्रं तु गान्धिदर्शनस्य सूत्रसाधनं चर्खायन्त्रं व्यंज्यते।

सेवाश्वमूर्त्तिर्विज्ञेया संयमो वृषरूपधृक्।
ताभ्यां प्रवर्त्तितं चक्रं चरखाख्यं सूत्रसाधनम्।[२०]

भारतवर्षस्य राष्ट्रियपताकां प्रतीकं च समाश्रित्य विभिन्नछन्दसां सुचारुप्रयोगेन काव्यमिदं विरचितमस्ति। काव्यस्यास्य भाषा सरला, शैली च अतीव रमणीया, स्वदेशविषयकरतिभावाश्रितपद्यानि पाठकमनांसि रञ्जयन्ति। अलंकारशास्त्रीयरित्या प्रतिपाद्यविषयस्य उपस्थापनं कृत्वा आधुनिकसंस्कृतसाहित्यजगति एतत् काव्यम् उल्लेखनीयं स्थानम् अधिकरोति। असमप्रदेशे अर्वाचीनसंस्कृतसाहित्यरचनापरिसरे शास्त्रिणः नाम सुतरामेव देदीप्यते इति वक्तुं शक्यते।

**सन्दर्भासूत्राणि-**

१. पताका, २.३
२. उक्तग्रन्थः, १.५९.

३. उक्तग्रन्थः, २.१०
४. सांख्यकारिका, १३
५. श्वेताश्वतरः, ४.५
६. भाषापरिच्छेदः, १.२
७. रूपरसगन्धस्पर्शसंख्यापरिमाणपृथकत्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धि-सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुशितिगुणाः, तर्कसंग्रहः, प्रत्यक्षखण्डः, पृ.२४
८. पताका, १.८२-८३
९. उक्तग्रन्थः, १.८७
१०. स. स., पृ. ११८
११. तत्रैव, पृ. १११
१२. तत्रैव, पृ. १३५
१३. तत्रैव, १.८४
१४. योगक्षेमो नः कल्पतामि - यजुर्वेदः, २२.२२
१५. पताका, १.३४
१६. ईशोपनिषद्, १
१७. पताका, १.८
१८. सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः ।
येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत् सत्यस्य परमं निधानम् ॥ - मु.उ., ३.१.६
१९. पताका, १.७
२०. उक्तग्रन्थः, १.९३

********

ग्रन्थपञ्जी

१. तर्कसंग्रहः, कृष्णबल्लभाचार्यः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१७
२. पताकाम्नायः, प्रकाशकः- अभिरामशर्मा, १९६६
३. भाषापरिच्छेदः, पञ्चाननभट्टाचार्यः, श्रीसतीनाथभट्टाचार्येण प्रकाशितम्, कलिकाता,
४. सर्वदर्शनसंग्रहः, उमाशंकरशर्मा, चौखम्बा विद्याभवन, वाराणसी, २०१९

# प्राचीनकामरूपीयलिपिषु पौराणिकाभिषङ्गाः- समीक्षणमेकम्

ड० रुणिमा शर्मा

**भूमिका**

साहित्यं समाजस्य प्रतिफलनम्। देशकालस्थानभिन्नतया यद्यपि स्वकीयवैशिष्ट्यसम्पृक्तं साहित्यं समुपलब्धं भवति तथापीदं शाश्वतिकं सर्वकालिकमभिमतं यत् साहित्ये समाजस्य प्रत्यक्षतया अन्यथा वा समाजस्य प्रतिविम्बनं प्राप्यत एव। समाजस्यातीतानुसन्धाने तदानीन्तनसमाजस्य लिपिसाहित्यस्य महती भूमिका विद्यते। अस्माकम् समाजस्याप्यतीतानुसन्धाने लिपिसाहित्यं प्रामाणिकं तथ्यं भवति। प्राचीनकामरूपस्य लिपयः ताम्रलिपिशिलालिपिमृन्मयलिपिस्तम्भलिपिरूपेण समुपलभ्यन्ते। इदानीं पर्यन्तमसमराज्ये प्रागाहोमकालीनस्याहोमकालस्य च सप्तविंशतिसंखकाः (२७) लिपयः समुपलभ्यन्ते। असमराज्ये वृहदाकारे शिलाखण्डे लिपिवद्धाः लिपयः पञ्चस्थाने प्राप्यन्ते यथा- कामाख्यालिपिः, आमवारीलिपिः, वरगङ्गालिपिः, तेजपुरलिपिः कानाइवरशीलिपिश्च। क्षुद्राकारलिपिः यथा- देओपानी विष्णुमूर्त्तिः, देउपानी (हरिहरमूर्तिः) शिलिमपुरलिपिश्च। गाछतललिपिः स्तम्भलिपिरूपेण प्राप्यते। नालन्दायां भास्करवर्णणः मृन्मयमोहरत्रयं प्राप्यते। अन्याः च ताम्रलिपिरूपेण लिपयः प्राप्यन्ते।

**विषयस्योद्देश्यः**

(१) लिपिषु सम्पृक्ताः महाकाव्यपुराणादीनां समुल्लेखनस्यान्वेषणम्।

(२) पौराणिकाख्यानानि पात्राणि चान्वेषणं क्रियन्ते।

(३) पौराणिकाभिषङ्गानां वर्णनया प्रतिफलिताः दिशः।

**अन्वेषणपद्धतयः**

विषयस्यान्वेषणपरिक्रमायां मुख्यतया वर्णनात्मकशैली गृह्यते। स्थाने स्थाने विश्लेषणात्मकपद्धत्याऽपि सहायः स्वीक्रियते। अन्वेषणपरिक्रमायां प्राधान्येन ड० मुकुन्द माधव शर्मणा सम्पादितः "Inscriptions of Ancient Assam" इति ग्रन्थः, ड० डिम्बेश्वर शर्मणा सम्पादितः Kāmarūpaśāsanāvalī इति ग्रन्थः मुख्यतया भित्तिरूपेण गृह्येते।

**अध्ययनस्य पश्चादभूमिः**

प्राचीनकामरूपस्य नृपतयः प्राय एव भूमिदानकार्ये ताम्रलिपिमुदघोषितवन्तः। प्राय एव लिपिषु लिपिदातुः पूर्वपुरूषाणां संकीर्त्तनेन प्रासङ्गिकस्य नृपतेः वर्णना प्राप्यते। तासु वर्णनासु नृपतीनां वर्णनायां पौराणिकाख्यानानां समुल्लेखेनालङ्कारादीनां काव्योपादानामुपरमापनेन प्रायः सर्वाः लिपयः उत्कृष्टसाहित्यरूपेण समुपलभ्यन्ते। विशेषतः कीर्तिमतां नृपतीनां तदीयानां महिषीणां वर्णने भारतीयैतिह्यवाहकानां वेदमहाकाव्यपुराणादीनां सततं समुल्लेखनं दरीदृश्यते। एवं पौराणिकप्रसिध्दशास्त्राणां प्रासङ्गिकोपस्थापनरीत्याः पर्यवेक्षणात् प्राचीनकामररूपे संस्कृतमाहित्यचर्चायाः परम्परावज्ञातुं शक्यते। अतः शोधपत्रेऽस्मिन् प्राचीनकामरूपीयलिपिषु पौराणिकाख्यानानां समुल्लेखनस्यानुसन्धानं कर्तुं विनम्रतया विधित्सा विद्यते।

ऐतिहासिकतथ्यानामनुसन्धाने लिपिसाहित्यस्य महती भूमिका विद्यते। प्राचीनकामरूपस्य लिपयः राजनैतिकसाहित्यिकसामाजिकैतिहासिकसांस्कृतिकादिसम्पभ्दिः समृध्दाः। काव्यसम्पदा प्राचुर्यमण्डिताः ताः लिपयः प्राचीनकामरूपस्य विविधदिशां प्रामाणिकतथ्यस्वरूपाः। अतः तेषामनुसन्धानात् प्राचीनकामरूपस्य तथ्यसमृध्दं चित्रं प्राप्तुं शक्यते। लिपिकाराणां वर्णनचातुर्यमाध्यमेन तदानीन्तनसमाजस्य जनानां भावादर्शः ज्ञातुं शक्यते। समाजस्थितानां लोकानां मनसि विद्यमाना ऐतिह्यप्रीतिः प्रतिफलिता भवति। वर्णनायां सततं पौराणिकाभिषङ्गः कथं चित्रीयते तदेव विचार्यते।

वैदिकसाहित्य एव भारतीयतिह्यस्य मूलं प्रतिस्थापितं विद्यते। वैदिकसाहित्यं विना भारतीयैतिह्यस्यानुसन्धानमकल्पनीयभसम्भवञ्च। प्राचीनकामरूपस्य समाजः वैदिकाचारधर्मदर्शनादिभिः सम्पृक्त आसीत। प्रायः सर्वासु वर्णनासु वैदिकधर्मदर्शनाचारादीनां प्रभावः सुस्पष्टः समुज्ज्वलश्च। नृपतीनां प्रजानां वा वर्णने वैदिकपरम्परायाः समुज्ज्वलः प्रभावः सततं सुलभो भवति। यत प्राचीनकामरूपीयसमाजस्य अन्यतमं समुल्लेखनीयं वैशिष्ट्यमिति वक्तुं शक्यते।

प्राचीनकामरूपीयलिपीनां प्रायः बहुषु क्षेत्रेषु वेदपुराणादीनां सुप्रसिध्दानामाख्यानानां चरित्राणाञ्च सम्पृक्तवर्णना प्राप्यते। उदाहरणरूपेण भास्करवर्मणः डुबि ताम्रलिप्यां सुस्यिरवर्मणः प्रादुर्भाववर्णनायां वेदपुराणसम्वन्धीयविषयानां काव्यिकवर्णना समुपलभ्यते। बेदेषु यज्ञेषु अग्निरिव, शास्त्रज्ञानेन संस्कार इव, सज्जनसङ्गत्या धर्मानुभव इव भुमण्डले नृपतेः जन्ममभवत। तेन सुस्थिरवर्मणा कार्तिकेयेन गौरी इव, इन्द्रेण अदितीव, कृष्णेण दैवकीव पुर्णचन्द्र सुस्थिरवर्मणा स्थिरवर्मानृपतेः पत्नी चिरं नन्दिता आसीत्।[१] अत्र सुस्पष्टतया वेदपुराणान्तर्गताख्यानानां चरित्राणां सम्पृक्तवर्णना समुपलभ्यते। एवम् ईदृशी रीतिः प्राचीनकामरूपीयलिपिषु बहुलतया प्राप्यते। संस्कृतसाहित्ये वेदपुराणेतिहासान्तर्गतवर्णना बहुषु क्षेत्रेषु


ISSN : 2454-2881

सम्पृक्ततया समुपलभ्यते न तु पृथकरूपेण। वेदान्तर्गतविषयानां पुगणेतिहासादिभिः विस्तृतिः शास्त्रवाक्येणैव समर्थ्यते-

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति।।[२]

तथाहि प्राचीनकामरूपीयलिपिषु वेदपुराणेतिहासादीनां काव्यिकसम्पदा समुल्लेखनं लिपिकाराणां शास्त्रपरिचितिः प्रकटीक्रियते।

**विश्लेषणम्**

लिपिषु पौराणिकाभिषङ्गवर्णनान्वेषणे निम्नोक्ताः विन्दवः दृष्टिपथि आनेतुं शक्यन्ते-

**महाकाव्यसम्बन्धीयं समुल्लेखनम्**

रामायणं महाभारतञ्चेति महाकाव्यद्वयं भारतीयसाहित्यस्य जनजीवनस्य चानन्यतुल्यं महाकाव्यद्वयम्। संस्कृतसाहित्ये एतदवलोक्यते यत् प्रायः बुहुनि पात्राणि आख्यानानि वा महाकाव्यद्वये पुराणादिषु वा वर्णितानि भवन्ति। अतः तानि महाकाव्यसम्बन्धीयानि पुराणान्तर्गतानि वा पृथकतया दर्शयितुं सुस्पष्टं न भवन्ति। वस्तुतस्तु तानि महाकाव्यद्वये पुराणादिषु वा सम्पृक्ततया चित्रितानि विद्यन्ते कथावस्तुना अपृथकतया। अतः यद्यपि कतिपयानि पात्राणि आख्यानानि वा पृथकरुपेण उपस्थाप्यन्ते वास्तविकतया तु तानि महाकाव्यान्तगर्तानि पुराणान्त्रर्गतानि वा भवितुं शक्यन्ते। महाकाव्यसम्वन्धीयायां परिक्रमायां सर्वप्रथमं रामायणमेव गृह्यते-

**रामायणम्**

रामायणं भारतीयसाहित्यस्य न केवलमादिकाव्यंमपि तु भारतीयसाहित्यस्य जनजीवनस्य वा समादरणीयमादर्शस्थानीयं महाकाव्यम्। अतः रामायणस्य पात्राणि साहित्ये जनजीवने वा सर्वदा प्रातःस्मरणीयानि विद्यन्ते। प्राचीनकामरूपस्य साहित्ये समाजे वा रामायणस्य प्रभूतं सम्मानं दरीदृश्यते। प्राचीनकामरूपस्य लिपिराशिष्वपि रामायणगतानांमार्दशपात्राणां चित्रणं समवलोक्यते। उदाहरणरूपेण-भास्करवर्मणः पूर्वपुरुषस्य श्रीस्थिरवर्मानाम्नः नृपतेः वर्णनायां लिपिकारेण वर्णितं यत् चन्द्रमुखवर्मणः पुत्रेण श्रीस्थिरवर्मणा रामेणैव पुरा स्वर्गे राजा दशरथ इव लोकान्तरगतोऽपि सन् नन्दितोऽभवत्।

स पुत्रेण तेन मुमुदे लोकान्तरगतोऽपि सन्।
रामेणेव पुरा राजा स्वर्गे दशरथो नृपः।।[३]

धर्मपालस्य शुभङ्करपाटक ताम्रलिप्यां वर्ण्यते भुमिदानस्य प्रसङ्गे यत् भूमिग्रहीतृणां ब्राह्मणानां मध्ये रामचन्द्र इव रामदेवनामा ब्राह्मणः आसीत्।[४]

गोपालवर्मणः शासनकाले धरित्री दशरथे स्वर्गे गते रावणशत्रोः रामस्य सुशासनकालं स्मृतवती। एवं रामायणीयादर्शस्य प्रतिफलनं प्राचीनकामरूपस्य समाजे साहित्ये च ज्ञातुं शक्यते।

**महाभारतम्-**

महाभारतस्य स्थानमपि रामायणात् न्युनमिति वक्तुं न शक्यते। रामायणवत् महाभारतमपि सश्रध्दं समाद्रियते, हृदि गृह्यते। तथाहि महाभारतीयमुख्यपात्राणां समुल्लेखनं महाभारतान्तर्गतानामाख्यानानां संकीर्तनं स्थाने स्थाने वर्ण्यते प्राचीनकामरूपीयलिपिसाहित्ये। लिपिषु नृपतीनां महिषीणां वा वर्णने महाभारतीयचरित्राणां समुल्लेखनया कथावस्तु वर्ण्यते। उदाहरणरूपेण नृपते हर्जरवर्मणः वर्णनायां प्राप्यते यत् स एक एव नृपतिः धर्मप्रवादे युधिष्ठिर इव शत्रषु भीम इव, युध्दे जिष्णु इव आसीत्।[६]

उल्लेखनीय यत् श्लोकेऽस्मिन् श्लेषःउल्लेखालङ्कारश्च प्राप्येते। वनमालवर्मणः वर्णनायां व्यातिरेकालङ्कारव्याजेन युथिष्ठिरकर्णभीमादीनां वर्णना क्रियते–

सत्यगाम्भीर्य्यतुङ्गत्वप्रतापत्यागविक्रमैः।
योजयध्दर्मजाब्ध्याद्रिभानुकर्णमरुत्सुतान्।।[७]

महाभारतीयचरित्राणां प्रसिद्धिः शाश्वतिकी। अतः नृपतेः श्रीरत्नपालस्य वर्णनायां लिपिकारेण अर्जुनभीमकृतान्तादीनां प्रतिफलनं चित्रीयते-

यश्चार्जुनो यशसि भीमसेनो युधि कृतान्तः।
क्रुधि दावानलो विपक्षवीरुधि शशधरो विद्यानभसि।।[८]

हर्जरवर्मणः वर्णनाया कविना चित्रीयते यत् कुन्त्याः गर्भे युधिष्ठिरः, सुभद्रायाः गर्भे अभिमन्यु इव श्रीजोबदेव्याः गर्भे सिंहविक्रमस्य श्रीहर्जरदेवस्य जन्ममभवत्।[९]

एवं महाभारतीयचरित्राणांमादर्शानुप्राणितस्य प्राचीनकामरूपीयसमाजस्य चित्रं काव्यिकवर्णनया लिपिसाहित्ये समुपलभ्यते।

**पौराणिकाख्यानम्**

प्राचीनकामरूपीयलिपिषु पौराणिकाख्यानानि विशेषतः नृपतीनां वर्णनप्रसङ्गे प्राप्यन्ते। लिपिषु वर्णितात्याख्यानानि चित्रितुं शक्यते यथा-

**विष्णोः वराहवतारग्रहणं नरकोपाख्यानमदितेः कुण्डलापहरणञ्च**

महाभारतपुराणादिषु नरकोपाख्यानमेकं सुप्रसिद्धमाख्यानम्। तस्मिन्नेवप्रसङ्गे नरकेन देवमातुरदितेः कुण्डलापहरणकथा वर्णिता प्राप्यते। इदमाख्यानं महाभारते,[१०] हरिवंशे,[११] विष्णुपुराणे,[१२] भागवतपुराणे,[१३] अग्निपुराणे,[१४] कालिकापुराणे,[१५] योगिनीतन्त्रे[१६] च सुविस्तृतरूपेण वर्णितं प्राप्यते। पुराणादिषु


ISSN : 2454-2881

सुप्रसिद्धमिदमाख्यानं कामरूपीयनृपतिभिः सम्बन्धयुक्तं प्राप्यते। प्राचीनकामरूपीयनृपतयः नरकः तेषां पुर्वपुरुष इति मन्यते। अतः ते भौमवंशीया इत्यनेन सुप्रसिद्धाः। तथाहि प्रायः बहुषु लिपिषु नरकोपाख्यानस्य समुल्लेखनं काव्यिकवर्णनया प्राप्यते।

प्राचीनकामरूपस्य भास्करवर्मणः डुबितामलिप्याम्,[१७] भास्करवर्मणः निधानपुरताम्रलिप्याम्,[१८] वनमालदेवस्य तेजपुरताम्रलिप्याम्,[१९] वनमालस्य तेजपुर्वतीयाताम्रलिपि इत्यत्र,[२०] वलवर्मणः (तृतीयस्य) उत्तरवरविलताम्रलिप्याम्,[२१] वलवर्मणः (तृतीयस्य) नगाउ ताम्रलिप्याम्,[२२] रत्नपालस्य वरगाउताम्रलिप्याम्,[२३] इन्द्रपालस्य गौहाटी ताम्रलिप्याम,[२४] इन्द्रापालस्य गुवाकुछिताम्रलिप्याम्,[२५] गोपाल वर्मणः गाछतलताम्रलिप्याम्,[२६] धर्मपालस्य खनामुखताम्रलिप्याम्,[२७] धर्मपालस्य शुभंकरपाटकताम्रलिप्याम्,[२८] धर्मपालस्य पुष्पभद्राताम्रलिप्याञ्च,[२९] नरकास्याख्यानं समुल्लेखितं वर्तते। एवं द्वादशसंख्यकताम्रलिप्यामदिंमाख्यान काव्यिकरीत्या समुपस्थाप्यते। यदा यदा भूतले सज्जनानां विपत्तिः भवति तदा एव भगवान् विभिन्नावतारं गृहीत्वा सन्तं रक्षति। हिरणाक्षदैत्यकवलात् पृथिवीरक्षणार्थं विष्णुना वराहावतारः स्वीकृत आसीत। पुराणेषु इदमाख्यानं बहुवर्णितं परिलक्ष्यते। पुराणेषु भागवतपुराणे,[३०] देवीभागवतपुराणे,[३१] अग्निपुराणे,[३२] पद्मपुराणे[३३] च विष्णोः वराहावतारः वर्ण्यते।

नरकाख्यानं पुराणेषु बहुचर्चितं विद्यते। हरिवंशे विष्णोः वराहवतारकाले पृथिव्याः गर्भे नरकस्य जन्मम, तस्य प्रागज्योतिषाधिपतित्वं, देवमातृरदितेः कुण्डलापहरणञ्च वर्णितं भवति। अत्र श्रीकृष्णस्य हस्ते नरकस्य निधनं वर्णितं प्राप्यते। विष्णुपुराणे नरकेन देवमातुः कुण्डलापहरणं, वरुणस्य छत्रापहरणञ्च वर्णितं प्राप्यन्ते। कालिकापुराणे नरकनृत्तान्तं सुविस्तृतरूपेण प्राप्यते। भागवतादिषु वर्णितं वृत्तान्तमेवापर वृत्तान्तेन वर्ण्यते। कालिकापुराणे नरकस्य जीवनमन्येनाख्यानेन संयुक्तं वर्ण्यते। प्राचीनकामरूपीयलिपिषु नरकाख्यानं दरीदृश्यत एव। नृपतीनां पूर्वपुरुषस्य कथने नरकास्यार्विभावः तेन देवमातुरदितेः कुण्डलापहरणवृत्तान्तं काव्यिकसम्पदा प्राप्यन्ते।

उदाहरणरूपेण भास्करवर्मणः डुविताम्रलिप्यां श्लोकद्वये विष्णोः वराहावतारं वर्णयन् तस्य पुत्रस्य नरकस्योल्लेखनं कृत्वा नरकपुत्रभगदत्तस्य वर्णना प्राप्यते।[३४]

एवं प्रायः सर्वेषु समुल्लेखनेषु सादृश्यं समवलोक्यते। प्रसङ्गक्रमेण समुल्लेखनीयं यत् महाभारतस्य पर्वद्वये नरकवृत्तान्तं वर्णितं प्राप्यते। उद्योगर्वणि प्रागज्योतिषाधिपतेः भौमनरपतेः नरकस्य वर्णना प्राप्यते। तत्र नरकेन देवमातुरदितेः कुण्डलापहरणं सहस्राधिकानां युक्तीनामवरोधनं ततः श्रीकृष्णस्य हस्ते नरकस्य निधनादिकं वर्णितं विद्यते। उल्लेखनीयं यत् नरकः भगवतः विष्णोः पुत्ररूपेण वर्णने महाभारते तथ्यं न प्राप्यते, सन्दर्भेऽस्मिन् महाभारतं मौनं प्राप्यते परन्तु परवर्तीकालस्य पुराणेष्विदं वृत्तान्तं बहुवर्णितं प्राप्यते।

ISSN : 2454-2881 

परन्तु महाभारतस्य एकस्मिन् स्थाने पृथिवीदेव्याः प्रार्थनानुसारं विष्णुना पृथिव्याः पुत्रस्य नरकस्य रक्षणार्थं वैष्णवास्त्रं प्रदत्तम्। नरकतः वैष्णवास्त्रं भगदत्तेन प्राप्तमिति वर्णितं प्राप्यते। पुनश्च एतदवलोक्यते यत् प्राचीनकामरूपीयलिपिषु नरेकेन देवसिद्धासुरादीनां कन्यानामवरोधस्य समुल्लेखनं न प्राप्यते। परन्तु इदमुल्लेखनं पुराणेषु वर्णितं प्राप्यते। कामरूपीयलिपिषु नरकेन युवतीनामपहरणमवरोधनञ्च न वर्णितं प्राप्यते।

प्राचीनकामरूपीयलिपिषु यद्यपि विष्णोः वराहावतारः बहुधा संकीर्त्यते परन्तु केवलमेकस्यामेव लिप्यां प्रथममङ्गलाचरणश्लोकरूपेण विष्णोः वराहावतारस्य स्तुतिः समवलोक्यते। धर्मपालस्य पुष्पभद्रालिप्यां वराहावतारधारी विष्णुः स्तूयते काव्यिकरीत्या सुन्दरचित्रणेन।[३५] समुल्लेखनीयं यत् अस्मात् विष्णोः स्मरणात् प्राचीनकामरूपीयसमाजे वैष्णवधर्मस्य प्रभावस्याभासः सुस्पष्टो भवति। श्रीमन्तशङ्करदेवस्य नववैष्णवधारायाः पूर्वाभासरूपेणायं श्लोकः स्वीकर्तुं शक्यते।

**परशुरामोपाख्यानम्**

प्राचीनकामरूपीयलिपिषु महता गौरवेन ब्रह्मपुत्रनदस्य संकीर्तनं समवलोक्यते। पुराणेषु ब्रह्मपुत्रेण सह परशुरामस्य संयोगः वर्ण्यते। परशुरामस्याख्यानं कालिकापुराणे सुविस्तृततया विद्यते।[३६] एवं ब्रह्मवैवर्त्तपुराणेऽपि परशुरामोपाख्यानं वर्णितं प्राप्यते।[३७] प्राचीनकामरूपीयलिपिषु एकस्मिन् स्थाने परशुरामस्य समुल्लेखनेनन सह लौहित्यस्य वर्णना प्राप्यते।[३८] कालिकापुराणे ब्रह्मपुत्रस्य जन्मवृत्तान्तं प्राप्यते। परशुरामः मातृवधस्य पापमोचनार्थं ब्रह्मपुत्राख्यं महाकुण्डं पितुर्निदेशात् गत्वा तत्र स्नानादिकं कृत्वा परशुना ब्रह्मपुत्रं भुतले अवतारयत लोकहितार्थम्।[३९] कालिकापुराणे प्रोक्तमस्ति यत् ब्रह्मकुण्डतः ब्रह्मपुत्रनदः प्रवाहितो भुत्वा लोहितसरोवरे पतितो भवति। ततः परशुरामेण कुठारेण कामरूपपीठमध्ये प्रवाहितमकारयत्। ब्रह्मणा तस्य नाम लोहितपङ्ककं कृतम्। लोहितात् सरोवरात् निःसृतत्वात् लोहिताख्यः ततोऽभवत्।[४०]

इन्द्रपालनृपतेरस्यां लिप्यामेव सर्वप्रथमतया समुल्लिख्यते यत् परशुरामस्य कुठारस्य प्रक्षालनात् अयं लोहित्याख्यां प्राप्नोति यतः परशुरामेण विदारितानां नृपतीनां रक्तेन (लोहितेन) अस्य पङ्कं रक्तवर्णं जातमिति।[४१] तथाहि लोके ब्रह्मपुत्रः "लोहित, लौहित्य" वा इति नाम्ना प्रसिद्धःजातः। अस्याः लिपेः इदं वर्णनं प्रणिधानीयम्।

अस्यामेव लिप्यां पुनरपि वर्ण्यते यदिन्द्रप्रालनृपतेः पितुः पुरन्दरपालः सुयशस्वी, शुद्धात्मा सुशासक आसीत्। सः परशुरामस्य भुजविक्रमजिते राज्ये पृथिव्या दुर्लभा दुलभाख्यां पत्नी प्राप्तवान्।[४२] एवं परशुरामस्योल्लेखनात् प्राचीनकामरूपीयसमाजस्य पुराणादिशास्त्रपरिचितिः प्रकटिता भवति।


ISSN : 2454-2881

**क्षीरसमुद्रात् चन्द्रस्योद्भवाख्यानम्**

देवासुरैः क्षीरसमुद्रस्य मन्थनकाले महालक्ष्मीकौस्तुभकामधेनुधन्वन्तरिकालकुटामृतादीनां महामुल्यवतां वस्तुनां मध्ये चन्द्र अन्यतम आसीत्। पुराणादिषु इदमाख्यानं बहुवर्णितं प्राप्यते। प्राचीनकामरूपीयसमाजः अनेनाख्यानेन सुपरिचित आसीत्। अतः सुयोग्यानां नृपतीनां वर्णने अस्य समुल्लेखनं प्राप्यते। उदाहरणरूपेण परिदृश्यते भास्करवर्मणः पूर्वपुरुषश्रीमृगाङ्कस्य वर्णनप्रसङ्गे समुपलभ्यते यत् अतलस्पर्शादशेषरत्नानामाकरात् क्षीरसमुद्रात् यथैव चन्द्रस्य समुभ्दवोऽभवत् तद्वत गम्भीरमुर्त्तेः रत्नवतः श्रीमतः स्थितिवर्माख्यातनृपतेः श्रीमृगाङ्कस्य जन्माभवत्।[४३] राज्ञः श्रीवनमालदेवतः क्षीरसमुद्रात् चन्द्र इव श्रीजयमालदेवस्योभ्दवोऽभवत् यस्य कुन्देन्दुसमप्रभाणि यशांसि अद्यापि भ्रमति।[४४]

**पृथुनृपतेराख्यानम्**

प्राचीनभारतवर्षस्य नृपतिषु पृथुः सुप्रसिध्दनृपति आसीत्। पृथोः शासनादेव भुमिदेवी पृथिवीसंज्ञां प्राप्तवान्। नृपतिपृथोः वृत्तान्तं विष्णुपुराणे विस्तृततया वर्णितं प्राप्यते।[४५] प्राचीनकामरूपीयलिपिषु पृथुनृपतेः वर्णना प्राप्यते। इन्द्रपालनृपतिः विनयी विक्रमशाली आसीत्। तस्य शासने चतुराश्रमस्य चतुर्वणस्य च सुश्रृङ्खलिता व्यवस्था आसीत्। अतः सन्तुष्टा पृथिवी पृथोः शासनकालवत् कामदुधा नन्दिनी अभवत्।

**शिविनृपतेराख्यानम्**

भारतवर्षस्य सुप्रसिध्दनृपतिषु राजाशिविरन्यतमः। शिविनृपतेराख्यानं महाभारते महता गौरवेण संकीर्त्यते।[४६] देवतानां परीक्षायां शिविः धन्योऽभवत् किञ्च शरणागतस्य कपोतस्य कृते आत्मवलिदानं कर्तुमुद्यतोऽभवत् राजा शिविः। प्राचीनकामरूपीयसमाजः शिविनृपतेः कार्यैः परिचित आसीत्। अतः नृपतेः भास्करवर्मणः वर्णनायां लिपिकारः वर्णयति यत् भास्करवर्मा परोपकारविषये राजाशिविरिवासीत्।[४७]

**बाणोपाख्यानम्**

बाणासुरस्याख्यानं महाभारतपुराणेषु बर्णितं प्राप्यते।[४८] कृष्णेन सह बाणासुरस्य तुमुलं युध्दमभवत्। शोणितपुरस्य नृपतेः कन्यया उषयाः सह श्रीकृष्णस्य पौत्रस्यानिरुद्धस्य गान्धर्वविवाहोऽभवत्। शोणितपुरेऽवरुद्धस्यानिरुद्धस्योद्धरणार्थ श्रीकृष्णवलरामयोः बाणासुरेण सह प्रचण्डं युध्दमभवत्। लिपिकारेण तयोः वीरत्वं वर्णयन् बाणासुरेण सह वलरामकृष्णयोः युध्दमिव कुमारद्धयस्य गौडाधिपतिना सह युध्दस्य तुलना कृता।[४९]

**पौराणिक-चरित्राणामुल्लेखनम्**

लिपिषु नृपतीनां महिषीणां वा वर्णने प्रायः सर्वत्र एव पोराणिकचरित्राणां समुल्लेखनं दरीदृश्यते। पौराणिकचरित्राणां महत्वेनानुप्राणितैः लिपिकारैः प्रायः सर्वासु वर्णनासु शास्त्रोक्तचरित्राणां वर्णनया लिपय

ISSN : 2454-2881

उपस्थापिताः परिलक्ष्यन्ते। लिपिषु चित्रितानि पोराणिकपात्राणि प्राप्यन्ते यथा–

**नृपतीनां वर्णने**

बास्करवर्मणः डुवितामलिप्यां भास्करवर्मणः पूर्वपुरुषाणां वर्णनायां पौराणिकपात्राणां प्राचुर्यं समवलोक्यते। पुष्यवर्मणः वर्णनायां समुपलभ्यते यत् तस्यान्वये चन्द्रतुल्येषु नृपतिषु स्वर्गगतेषु इन्द्रतुल्यः कीर्तिमान् पुष्यवर्मा राजा भवति। चञ्चलाऽपि लक्ष्मीः द्वितीयविष्णुमिव तं प्राप्य निराकुला भवति[५०] गणपतितुल्यः गणेन्द्रवर्मा जनकस्य शक्तेः समकक्षः आसीत्। तस्य पुत्रः महेन्द्रवर्मा इन्द्रतुल्य आसीत्। इन्द्रस्य पत्नी शची इव सुव्रतां पत्नीरूपेण गृहीतवान्। अदितेः गर्भे चक्रपाणिः नारायण इव नारायणवर्मा प्रजानामधीश्वरोऽभवत्। एष नारायणवर्मा पार्वत्याः पुत्रेण कार्त्तिकेयेन तुल्यते।[५१] सुस्थितवर्मणः पुत्रद्वयं कार्त्तिकेयेन गणेशेन च तुल्येते। तत्र काव्यिकशोभया प्राचुर्यमाण्डिता वर्णना प्राप्यते।[५२] गौड़नृपतेः समाराङ्गनं गतवन्तौ कुमारौ सुप्रतिष्ठितवर्मा भास्करवर्मा च। लिपिकारेण तौ वलाच्युताविव – इति वर्ण्यते।[५३]

एवमुदाहरणरूपेण-- भास्करवर्मणः डुवितामलिप्यामेव दृश्यते यत् लिपिकारेण प्रायः प्रत्येकनृपतेः वर्णनायां भारतीयैतिह्यवाहकानां सुप्रसिद्धचरित्राणा समुल्लेखनं क्रियते। राज्यस्य शासनभारं वहन्तं नृपतिं वनमालदेवं सुप्रसिद्धेन नृपतिना नहुषेण तुल्यते। एवमन्यत्रापि न्युनाधिक्यतया परिलक्ष्यते इदं वैशिष्टम्।

**महिषीणां वर्णने**

लिपिषु नृपतीनां वर्णने तदीयानां महिषीणामपि वर्णना काव्यिकशोभया वर्णिता समवलोक्यते। महिषीणां वर्णनप्रसङ्गे प्रायः विष्णुपत्नी लक्ष्मीदेवकीपार्वतीरोहिण्यादीनां समुल्लेखनेन समृद्धा वर्णना समुपलभ्यते।

भास्करवर्मणः डुवितामलिप्यां प्राप्यते यत् नारायणस्य पत्नी लक्ष्मी इव देवमतिः नारायणवर्मणः पत्नीत्वं गृहीतवान्।[५४] श्रीस्थिरवर्मणः पत्नी स्वपुत्रेण कार्तिकेयेन गौरी इव, इन्द्रेण अदिति इव, श्रीकृष्णेन देवकीव सुस्थितवर्मणा सर्वदा सुखी आसीत्।[५५] इन्द्रपालस्य गुवाकुचितामलिप्यां वर्ण्यते यत् देवक्याः गर्भे वसुदेवेन यथा कृष्णं प्रदत्तवान् तद्वत् ब्राह्मणः वसुदेवः तस्य पत्न्यामनुराधायां देवदेवनामकं पुत्रमददात्।[५६]

एवं नारीणां वर्णने लिपिकाराः अतीव काव्यिकसौन्दर्येण समृध्दां वर्णनां चित्रयन्ति। उदाहरणरूपेण प्राप्यते यथा– नृपतेः हर्षपालस्य रत्नानाम्नी पत्नी आसीत्। या महादेवस्य पार्वती इव सतीनामुत्तमा आत्मानुरूपकुलजा परमपवित्रकीर्तिसम्पन्ना शितकिरणादिव निर्मिताऽसीत्।[५७] वसिष्ठमुनेः पत्नी अरुन्धती पतिव्रता नारीरूपेण महाकाव्यद्वये पुराणेषु च बहुधा कीर्तिता विद्यते। प्राचीनकामरूपीयलिपिषु एकस्मिन् स्थाने वसिष्ठपत्न्याः समुल्लेखनं प्राप्यते।[५८]

विष्णोः पत्नी लक्ष्मीः महाकाव्यपुराणादिषु बहुमानिता देवी। देवीलक्ष्मी विष्णोः आदर्शपत्नी।


ISSN : 2454-2881

प्राचीनकामरूपीयलिपिषु प्राय एव महिष्यः लक्ष्मीरूपेण चित्रीयन्ते। लक्ष्मीवतानां नृपतीनां समृद्धिः कीर्त्यते। तथाहि हर्जरवर्मणः वर्णनायां कविना कल्पयते यत् देवी लक्ष्मीः गोपीजनानन्दितं विष्णोः वक्षःस्थलं विहाय भुतले श्रीहर्जरनृपतेः महिषीरूपेण शोभिताऽभवत्। सकलनारीणां सौन्दर्यं गृहीत्वा इहागत्य सा वर्णाद्यशेषगुणैः चक्रपाणितुल्यस्य हर्जरनृपतेः पत्नी भूत्वा भूतले लज्जिता नानुभवति।[५९]

प्रजापतेः दक्षस्य सप्तविंशतिसंख्यकाः कन्याः चन्द्रस्य पत्न्य आसन्। तासु रोहिणीं प्रति चन्द्रस्य अधिकः स्नेह आसीत्। पुराणेषु इदमाख्यानं बहुवर्णितं विद्यते। प्राचीनकामरूपीयलिपिषु महिषीणां वर्णनप्रसङ्गे रोहिणीचन्द्रयोः समुल्लेखनं परिलक्ष्यते। पुराणादिषु बहुचर्चितौ दम्पती इन्द्रस्य शचीव, शिवस्य पार्वतीव, मदनस्य रतीव नारायणस्य लक्ष्मी इव, चन्द्रस्य रोहिणीव तस्य पुरन्दरपालस्य दुलभानाम्नी सुयोग्या पत्नी आसीत्। ब्राह्मणभरतस्य पाउका इति नाम्नी पत्नी आसीत् या चन्द्रस्य पत्नी रोहिणीव, शम्भोः पत्नी पार्वतीव सहधर्मचारिणी आसीत्।

**मुख्यसिद्धान्ताः**

प्राचीनकामरूपीयलिपीनाम् अध्ययनात् पौराणिकाभिषङ्गाणामन्वेषणात् कतिपयाः मुख्यसिद्धान्ताः प्राप्यन्ते–

१) काव्यिकसौष्ठववर्द्धने पौराणिकाभिषङ्गानां महती भुमिका विद्यते।

२) नारीपुरुषयोः सामाजिकमर्यादाचित्रणं प्राप्यते।

३) प्राचीनकामरूपीयसमाजे संस्कृतसाहित्यचर्चायाः परम्परावगम्यते।

४) ऐतिहासिकसामाजिकसांस्कृतिकसाहित्यिकतथ्यानामाकररूपेणापि पौराणिकाभिषङ्गस्य महती भूमिका स्वीक्रियते।

पौराणिकाभिषङ्गानां सुषमप्रयोगात् लिपिषु काव्यिकसौन्दर्यं बृध्दिमेति। शब्दालङ्कारार्थलंकादीनां प्रयोगे पौराणिकाभिषङ्गः सुसहायको भवति। उदाहरणरूपेण प्राप्यते यथा–

धर्मप्रवादेषु युधिष्ठिरो यो भीमोरिवर्गे समरेषु जिष्णुः।
एकोप्यनेकैरिति सङ्गतो यो निःशेषकुन्तीतनयत्वमेतः।[६०]

श्लोकेऽस्मिन् श्लेषालंकारः उल्लेखालंकारश्च शोभेते। अत्र युधिष्ठिरभीमजिष्णुशब्देषु श्लेषालंकारः विद्यते। पुनश्च विषयभेदादुल्लेखालंकारः शोभते। कुतः एकस्य नृपते अनेकोल्लेखादुल्लेखालंकारः प्राप्यते। अनेन काव्यसौन्दर्यं सहृदयचित्तहारकं भवति। एवमन्यत्रापि सुन्दरमुदाहरणं समुपलभ्यते।

पौराणिकाभिषङ्गानां समुल्लेखनात् नारीपुरुषयोः सामाजिकमर्यादाया आभासोऽवगम्यते। नृपतयः

प्राय एव इन्द्रतुल्य इति वर्ण्यन्ते। कदाचित् ते विष्णुना, शिवेन, कृष्णेन च तुल्यन्ते। युधिष्ठिरपृथुशिविरादयः प्रसिध्दाः नृपतयः तेषामादर्शरूपेण वर्णिताः।

लक्ष्मी, गोरी, अदितिः शची, सीता, कुन्ती, चेति भारतीयैतिह्यस्य आदर्शाः नार्य्यः महिषीणां वर्णने चित्रीयन्ते। अनेन नारीणां सामाजिकस्थितिः सम्मानीया आसीदिति वक्तुं शक्यते। अनेन पौराणिकचरित्रादीन् प्रति तेषामादर्श प्रति च समाजस्य श्रद्धासीदिति प्रकटिता भवति।

प्राचीनकामरूपीयसमाजे राजगृहतः सामान्यजननामपि सर्वेषां वेदमहाकाव्यपुराणादीन् प्रति विश्वासः श्रद्धा आसीत्। अतः प्रायः सर्वासु वर्णनासु वेदमहाकाव्यपुराणादीनां समुल्लेखनं दरीदृश्यते। तेषामनुकरणीयचरित्राणां गुणैरनुप्राणितः भावादर्शः एव समाजे फलदायको भवतीति लिपिकाराणां धाराणा आसीत्। अतः लिपिषु काव्यिकरीत्या एतादृशः भावादर्शः प्रतिपादितः परिदृश्यते।

एवमिदं सुष्पष्टं भवति यत् लिपिषु प्रतिपादिताः पौराणिकाभिषङ्गाः प्रत्यक्षतया अन्यथा वा प्राचीनकामरूपीयसमाजे संस्कृतसाहित्यचर्चायाः परम्परायाःप्रमाणं भवति यदैतिहासिक-सामाजिकसांस्कृतिकसाहित्यिकादीनां तथ्यानामव्ययकोषरूपेण ग्रहीतुं शक्यते।

**उपसंहार :**

सर्वशेषे लक्ष्यते यत् प्राचीनकामरूपीयलिपिषु पौराणिकाभिषङ्गानामुपस्थापनात् वर्णनीयकथावस्तु न केवलं काव्यिकसम्पदासमृध्दं भवति अपि तु ताः लिपयः विविधदिशां प्रामाणिकतथ्यस्वरूपाः भवन्ति। मुख्यतया तु तदानीन्तनसमाजस्य भावादर्शः सुस्पष्टतया प्रतिफलितो भवति। भारतवर्षस्य पुर्वप्रान्तीयकामरूपप्रदेशे संस्कृतसाहित्यस्य अन्तःप्रवाहिनी धारा अस्मात् पर्यवेक्षणात् सम्यकतयाऽवगम्यते। इति शम्।

**पादटीका-**

१. The Dubi C.P. Grants of Bhaskaravarma, V. 52-53
२. महाभारतम् (१.१.२६९), शिवपुराणम् (५.१.३५)
३. The Dubi C.P. Grants of Bhaskaravarman, V. 38
४. The Subhankarapataka copper plates, V. 17
५. The Gachtal C.P. of Gopal Barman, V. 24
६. The Tezpur plate of Vanamalavarmadeva, V. 12


ISSN : 2454-2881

७. तत्रैव V. 26
८. The Bargaon Grant of Rantnapala prose line 48-49
९. Hayunthal C.P. of Harzarvarman, V. 11
१०. महाभारतम् ३.१४२
११. हरिवंशम्, विष्णुपर्व, अध्याय- ६३-६४
१२. विष्णुपुराणम्, ५-२९
१३. भागवतपुराणम्, १०.५९
१४. अग्निपुराणम्, अध्याय- ५
१५. कालिकापुराणम्, अः- ३६-४०
१६. योगिनीतन्त्रम्, १-१२
१७. The Dubi C.P. Grants of Bhaskaravarman, V. 2-3
१८. Nidhanpur C.P. of Bhaskaravarman, V. 4
१९. Tezpur C.P. of Vanmalavarmadeva, V. 3-4
२०. The Parbatiya C.P. of Vanamalavarmadeva, V. 3-4
२१. Uttar Barbil C.P. of Balabarman III, V. 3-4
२२. The Nowgaon C.P. of Balabarman III, V. 3-4
२३. The Bargaon C.P. of Ratnapala, V. 3-6
२४. The Guwahati C.P. of Indrapala, V. 5
२५. The Guwakuchi C.P. of Indrapala, V. 4-5
२६. The Gachtal C.P. of Gopal Barman, V. 24
२७. The Khanamukh C.P. of Dharmapala, V. 2
२८. The Subhankarapataka C.P. of Dharmapala, V. 2
२९. The Puspabhadra C.P. of Dharmapala, V. 2
३०. भागवतपुराणम्, स्कन्ध- ३
३१. देवीभागवतपुराणम्, ४.९
३२. अग्निपुराणम्, अः-५
३३. पद्मपुराणम्, २.९१
३४. The Dubi C.P. of Grants of Bhaskaravarman, V. 2-3

३५. The Puspabhadra C.P. of Dharmapala, V. 1
३६. कालिकापुराणम्, अ: - ८३
३७. ब्रह्मवैवर्त्तपुराणम्, २.२७.३३
३८. The Guwahati C.P. of Indrapala, V. 3
३९. कालिकापुराणम्, ८२.४२.४३
४०. तस्य नाम स्वयञ्चक्रे विधिलोहितगङ्गकम्।
लोहितात् सरसो जातो लोहिताख्यस्यतोऽभवत्।।- कालिकापुराणम्, ८२.३३
४१. The Guwahati C.P. of Indrapala, V. 3
४२. तत्रैव, V. 13
४३. Nidhanpur C.P. of Bhaskaravarman, V. 17
४४. The Nowgaon C.P. of Balabarman III, V. 15
४५. विष्णुपुराणम्, १-१३
४६. महाभारतम्, ३-१९७
४७. Nidhanpur C.P. of Bhaskaravarman, prose line 41
४८. महाभारतम् (२३८), भागवतपुराणम् १०.६१.६३, विष्णुपुराणम्, ५.३२.३३
४९. The Dubi C.P. of Bhaskaravarman, V. 69
५०. तत्रैव, V. 6-7
५१. तत्रैव, V. 28-29
५२. तत्रैव, V. 62
५३. तत्रैव, V. 68
५४. तत्रैव, V. 27
५५. तत्रैव, V. 53
५६. The Guwakuchi C.P. of Indrapala, V. 24
५७. The Subhankarapataka C.P. of Dharmapala, V. 11
५८. The Guwakuchi C.P. of Indrapala, V. 23
५९. Tezpur C.P. of Vanamalavarmadeva, V. 13-14
६०. तत्रैव, V. 12


ISSN : 2454-2881

# ऋग्वेदस्य इन्द्रसूक्तानि : नायकत्वभावस्य प्रतिफलनानि

ड° जगदीश शर्मा

इन्द्रः वैदिककालीनः अन्यतमः श्रेष्ठतमः देवः। सः अस्ति देवानां नेता त्रिभूवनस्य नायकः। इन्द्रसूक्तैव सामूहिकः नेतृत्वभावनायाः प्रतिफलनं प्रथमतया परिदृश्यमानो भवति। ऋग्वेदे प्रायः द्विशतेषु सूक्तेषु अस्य देवस्य स्तुतिगिर्वाणः प्राप्यन्ते। इन्द्रशब्दस्य निर्वचनम् आचार्येन यास्केन एवं प्रकारेण उक्तम् - 'इन्द्र इरां दृणातीति वा। इरां ददातीति वा। इरां दधातीति वा। इरां दारयत इति वा। इरां धारयत इति वा। इन्दवे द्रवतीति वा। इन्दौ रमत इति वा। इन्धे भूतानीति वा। इदं करणादित्याग्रयणः। इदं दर्शनादित्यौपमन्यवः। इन्दतेर्वैश्वर्यकर्मणः। इन्दञ्छत्रुणां दारयिता वा। द्रावयिता वा। आदरयिता यज्वनाम्।'[१]

नायकरूपेण इन्द्रस्य कीर्तनं बहुधा परिफुटम् ऋग्वेदे। यत्र यदा वा नायकत्वभावस्य प्रयोजनं भवति, तत्रैव इन्द्रदेवस्य गुणानुकीर्तनं दरीदृश्यमानो भवति। इन्द्रदेवस्य कल्पना संघठनभावस्य नेतृत्वभावस्य च पराकाष्ठा अस्ति इति वक्तुं शक्यते। मन्त्रे उल्लेखं वर्तते यत् द्युलोक-अन्तरिक्षपार्थिवलोकत्रयं मिलित्वा अपि इन्द्रस्य महानता प्राप्तुं न समर्थो भवति। स्वकीयतेजसा तेन सर्वदेवान् अभिभूतवान् इति। इन्द्रसूक्ते प्राप्यते (२.१२) यत् इन्द्रः कम्पमाना पृथिवीं दृढमकरोत्। इतस्ततश्चरितान् पक्षयुक्तान् पर्वतान् स्वे स्वे स्थाने स्थापितवान्। अपि च इन्द्रः उरुत्तमम् अन्तरिक्षं विस्तीर्णं चकारः। वीर्यत्वत्वकर्मरूपेण इन्द्रेण अनेकान् असुरान् विनाशं कृतम्। पृथिव्यां जलप्रेरणार्थं तेन अहि इत्युक्ते मेघं हत्वा सर्पणशीला अपः प्रेरणं कृतम्। एतत् कर्म नायकोचितः अस्ति इति सर्वथा प्रशंसनीयरूपेण ऋग्वेदे उपलभ्यते।

ऋग्वेदस्य द्वितीयमण्डले उपलभ्यमाने द्वादशसूक्ते इन्द्रदेवसम्बन्धे सायणेन उक्तं यत् - 'इन्द्रः जातएव जायमान एव सन् प्रथमः देवानां प्रधानभूतः मनस्वान् मनस्विनामग्रगण्यः देवः द्योतमानः सन् क्रतुना वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा देवान् सर्वान् यागदेवान् पर्यभूषत् रक्षकत्वेन पर्यग्रहीत्।

समाजभूतानां जनानां व्यवस्थायां नेता इति शब्दः बहुलांशे व्यवहृतः। समाजसंघटनस्य सामाजिकानां प्रतिपालनाय नेतृत्वानाम् अवधारणा जाता। नेतृत्वानामभावे समाजस्य सुष्ठु परिचालनं सम्भवो न भवति। 'यथा राजा तथा प्रजा' इति वचनानुसारं सुयोग्याः नेतारः सुशक्त-समाजस्य निर्माणं कर्तुं समर्थाः भवन्ति।

अत एव नेतृत्वस्य धारणा अतीव मनोहारिणी रूपेणैव प्राचीनशास्त्रेषु परिदृश्यमाना भवन्ति।

नेतृत्वस्य अवधारणा वैदिककालादेव प्राप्यते। वैदिकमन्त्रेषु सर्वत्र नेतृत्वस्य धारणा विशालायतनाय प्राप्यते। देवता-प्रधाना मन्त्राः, अतएव दैविक-सत्त्वायां नेतृत्वभावना अन्तर्हिता इति वैदिक-मन्त्रेषु दृश्यते। ऋग्वेदस्य प्रथमसूक्ते अग्निनामके सूक्ते नेतृत्वस्य धारणा अस्माभिः द्रष्टुं शक्यते। अग्निशब्दस्य निर्वचनप्रसङ्गे आचार्येन यास्केन उक्तं यत् - 'अग्रणीर्भवति इति अग्निः'। अग्रणी इति शब्देन अग्निदेवं नेतारूपेण उपस्थापितो यास्केन। देवासुराणां युद्धे देवसेनाम् अग्रे नयति अग्निः। तस्मात् अग्निः पदवाच्यो भवति इति यास्कः। अर्थात् अग्निः नेता भूत्वा देवानां नेतृत्वं चकार।

ऋषिः यस्यां कस्याञ्चिद् देवतायाम् आर्थपत्यम् अर्थस्वामित्वं वा इच्छन् स्तुतिं प्रयुङ्क्ते तदैवतः स मन्त्रो भवति। यस्य देवस्य स्तुतिर्मन्त्रैः क्रियते, तमेव देवं स्तुतिकाले सर्वाधिकव्यापकं जगतः स्रष्टारं तथा लोकपकारिणं मन्यते। वरुणस्य सूक्तेषु सैव सर्वेषां देवानां मध्ये महान् तथा सर्वापेक्षया महत्त्वशाली अमन्यत। वरुणस्य शासने स्थित्वा स्वस्वनिश्चितकार्यस्य निर्वाहं कुर्वन्ति। स्तुतिसमये इन्द्र एव सर्वश्रेष्ठो देवो इत्यभ्युपगम्यते।

वेदेषु राजा, सम्राट्, नेता, गोपा, गणपतिः, अधिपतिः, पति इत्यादयः शब्दा नेतृत्वार्थे प्रयुज्यन्ते। अनेन एतद् ज्ञायते यद् वैदिककालीन् समाजे नेतृत्वस्य अवधारणा प्रादुर्भूता जाता। बृहद्देवताग्रन्थे उल्लेखमस्ति यत् प्रजापतिः सर्वासां देवानां नायकः। तस्य अष्टप्रकारकानि नामानि सन्ति, ये खलु नेतृत्वपरकाः भवन्ति। तानि नामानि यथा-प्रजापतिः, सत्पतिः, कः, कामः, सदसस्पतिः, इडस्पति, वाचस्पति तथा च ब्रह्मणस्पति।[२]

वेदे इन्द्रदेवं नेतृत्वाभिमानी देवतारूपेण उपलब्धमानो भवति। ऋग्वेदस्य मन्त्रे उपलभ्यते यत् यो जायमान एव सन् देवानां प्रधानभूतः मनस्विनामग्रगण्यः द्योतमानः सन् वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा देवान् सर्वान् रक्षकत्वेन पर्यग्रहीत्। सेनालक्षणस्य बलस्य महत्त्वेन युक्तः सः इन्द्रः। सः इन्द्रः धनानां प्रेरयिता ब्रह्मणः च। अभिषुतसोमस्य यजमानस्य च रक्षिता एव वर्तते। तस्य अनुशासने जनपदाः वर्तन्ते सर्वे रथाः वर्तन्ते। इन्द्रः सर्वस्य जगतः प्रतिनिधिः बभूव, अच्युतानां पर्वतादीनां च्यावयिता वर्तते। सः इन्द्रः सप्त सर्पणस्वभावान् सिन्धून् सरणाय अवासृजत्। वज्रबाहुः भूत्वा दिवम् आरोहन्तं रौहिणम् असुरं जघान।

इन्द्रशब्दस्य निर्वचनप्रसङ्गे आचार्ययास्केन अभिहितं यत् इन्द्र इरां दृणाति इति वा, इरां ददाति इति वा, इरां दधाति इति वा, इरां दारयते इति वा, इरां धारयते इति वा। इन्द्रः शत्रूणां दारयिता वा, द्रावयिता वा, आदरयिता च यज्वानाम्।[३] आचार्यसायणमतेन इराशब्दस्य अर्थो भवति अन्नम्। अतएव यः खलु अन्नं


ISSN : 2454-2881

धारयति, ददाति, दृणाति वा सः खलु पालकः नायकः भवितुमर्हति।

वेदेषु इन्द्रसूक्तेषु सर्वत्र इन्द्रदेवं नेता राजारूपेण उपस्थापितम्। सः खलु इन्द्रः सोमाभिषवं कुर्वन्तं यजमानं रक्षति, स्वरक्षायै शस्त्राणि स्तोत्रं कुर्वाणं रक्षति। इन्द्रः सोमाभिषवं कुर्वते पुरोडाशादिहवींषि पचते यजमानाय बाजं बलं वा प्रापयति। वज्रयुक्तः इन्द्रः मुख्यानि यानि नेतृत्वप्रभावानि पराक्रमयुक्तानि कर्माणि चकार तेषां कर्माणामपि उल्लेखम् ऋग्वेदस्य मन्त्रेषु एव उपलभ्यते। प्रजानां उपकाराय तेन इन्द्रेन मेघं भिन्नं कृतम्, येन पृथिवीमध्ये जलानां वारिधारामभवत् कृषिकार्यं च प्रचलितं अभवत्। अन्नं विना प्राणीणः पृथिव्याम् जीवितं न शक्नुवन्तः। अतएव इन्द्रस्य प्रभावात् एव न केवलं मानवाः सर्वे जायमानाः सुखेन कार्यनिर्वाहं कर्तुं समर्थाः भवन्ति। अहिरूपं मेघं वृत्रं वा हत्वा इन्द्रः मेघभूतानि जलानि भूमौ पातितवान्। अपि च स इन्द्रः पर्वतानां संबन्धिनीः प्रवहणशीलाः नदीः कूलद्वयकर्षणेन प्रवाहितवान्।

शुक्रयजुर्वेदे[४] नेतृनां विभागरूपेण केषाञ्चनानां विभागानां नामानि उपलभ्यन्ते। तानि यथा- दिशम् पतिः पशूनां पतिः, पथीनाम् पतिः, पुष्टानां पतिः, अन्नानां पतिः, क्षेत्राणां पतिः, वनानां पतिः, स्थपतिः, वृक्षाणां पतिः, औषधीनां पतिः, कक्षाणां पतिः, सत्वनां पतिः, आव्यधिनीनां पतिः, स्तेनानां पतिः, अरण्यानां पतिः, स्तायूनां पतिः, तस्कराणां पतिः, मुष्णतां पतिः, विकृन्तानां पतिः, कुलुञ्चानां पतिः, सथापतिः, अश्वपतिः, गणपतिः, व्रातपतिः, गृत्सपतिः, श्वपतिः इत्यादयः।

अन्यत्रापि शुक्लयजुर्वेदे उपलभ्यते यत् जनानां मुख्यं गणपति इति उच्यते। स गणयतिः प्रजानां उपरि अत्यन्त रूचिपूर्णं व्यवहारं करोति, प्रजान् धनलाभाय पथनिर्देशनां अपि करोति-

गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे।

निधीनां त्वा निधिपतिं हवामहे।।[५]

वैदिकवाङ्मये देववरुणमपि नेतारूपेण राजारूपेण वा उपस्थापितम्। मानवानां देवानां च वरुणः राजा आसीत्- ''त्वं विश्वेषां वरुणासि राजा। त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः[६] समस्तानां संसाराणां समग्रानां सत्वानां वरुणः सर्वतन्त्रस्वतन्त्रः शासकः आसीत्। वेदेषु बहुवारं वरुणं राजा इति शब्देन अभिधीयते- 'अबुध्ने राजा वरुणो वनस्य', 'उरुं हि राजा वरुणश्चकार'।[७]

वेदे यमदेवमपि अधिपति राजा इत्यादि शब्दैः अभिहितम्। मनुष्यानां यमः राजा आसीत्- 'जनानां यमं राजानं हविषा सपर्यत[८] मनुष्याणां स अधिपति आसीत् इति अपि श्रूयते-'मृत्युः प्रजानामधिपतिः[९] यमः पितृणामधिपतिः स मावतु' इति[१०]

भारतीयचिन्तनस्य तथा च समाजस्य विकासः, राष्ट्रस्य निर्माणम्, राज्यस्य उत्पत्तिः, तस्य संरचना, तस्य प्रकाराः, कार्याणि च इत्यादयः सन्दर्भाः चतुर्षु वेदेषु तदीयेषु ब्राह्मण-ग्रन्थेषु च उपलभ्यन्ते।

वैदिकसाहित्येषु परिवारः, समाजः राज्यं राष्ट्रः इति एतेषाम् उत्पत्तेः विकासस्य च अवधारणा प्रतिभातो भवति। वैदिक-समाजे परिवारः एव मूलस्वरूपः आसीत्। परिवार-परिचालनव्यवस्थाः शासनव्यवस्थायाः आहिंस्वरूपम् आसीत्। परिवार-परिचालन-व्यवस्था मूलतः पितृप्रधानरूपेण अवलोकनं भवति स्म। वैदिक-साहित्येषु परिदृश्यते यत् राजा एव राज्यशासनस्य कर्णधारमासीत्। ऋक्वेदस्य मन्त्रेषु राजा-सम्राट्-प्रजापतिः इत्यादयः शब्दाः परिदृश्यमानाः भवन्ति। वरुणः, इन्द्रः, सोमः प्रभृति देवाः राजानःआसन्। ऋग्वेदस्य सप्तम-मण्डले उल्लेखम् अस्ति यत् राज्ञा सुदासेन सह दश-नृपतयः राज्यशासनं कुर्वन्ति स्म। प्रधान्येन वैदिककालीनराज्येषु ब्राह्मण-पुरोहितः राज्ञः प्रधानमन्त्री आसीत्। ऋग्वेदस्य बृहस्पतिसूक्ते स्पष्टमेव उल्लेखमस्ति यत् यः नृपतिः ब्राह्मण-पुरोहितम् अनुसृत्य राज्य-शासनं करोति, प्रजाः तां अवश्यमेव भजन्ति। देवराजः इन्द्रस्य प्रधानमन्त्री आसीत् बृहस्पतिः देवता। वैदिकयुगात् आरभ्य गुप्तशासनपर्यन्तं प्रधानतः केवलं ब्राह्मणजनाः एव राज्ञः प्रधानमन्त्रीपदम् अलंकुर्वन्ति स्म।

वैदिकदृष्ट्या राष्ट्रशब्दस्य अर्थो भवति 'राजते तत् राष्ट्रम्' इति। स्वकीय गुणवत्त्वया यः सर्वान् आकर्षयति तद् राष्ट्रम्। राष्ट्रम् इत्युक्ते कोऽपि निर्जीवः भूखण्डः नास्ति, अपि तु एका शाश्वतदेवता इति वैदिकाः मन्यन्ते। वैदिक-ऋषयः राष्ट्रम् आध्यात्मिक-स्वरूप-रूपेण स्पष्टीं कुर्वन्ति। ऋग्वेदे देवैः सह प्रजान् एकत्व स्वरूपम् अनुभवति। अत्र उल्लेखमस्ति यत्- ''मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता यथा नः'' इति। ब्रह्मण् एव राष्ट्रस्य आधारीभूतम्, ऋतः, सत्यः, राष्ट्रः इत्यादयः ब्रह्मणि एव आश्रित्य वर्त्तन्ते- 'ऋतं सत्यं तपो राष्ट्रं उच्छिष्टे बल बले' इति ऋक्-मन्त्रः। राष्ट्रस्य उत्पत्तिसम्बन्धेऽपि अथर्ववेदे उपलभ्यते यत्-जनानां कल्याणकामयामानःऋषयः दीक्षापूर्वकं तपः कृतवन्तः। अनेन राष्ट्र-बल-ओजश्च जाताः। राष्ट्रजीवने जनानां महत्त्वम् अतीव प्राधान्येन प्रकाशयति यजुर्वेदः। हस्त-पाद-ग्रीवा-उरु इत्यादिनि अङ्गानि मिलित्वा यथा एकस्य मानवस्य प्रकाशं भवति, तद्वत् भिन्न-रूपाणां जनानां समूहेन एव राष्ट्रस्य निर्माणं भवति, तद्वत् भिन्न-रूपाणां जनानां समूहेन एव राष्ट्रस्य निर्माणं भवति। अथर्ववेदे उपलभ्यते यत्- 'जनं विभ्रती बहुधा विवाचसम्, नाना धर्माणां पृथिवी यथौकसम्' इति।

राष्ट्रस्य विकासः वेदेषु मनोहारीरूपेण उपलभ्यते। शासन-व्यवस्थायाः विकासाय प्रथमतः विवाह-संस्थायाः विकाशं, तत् पश्चात् परिवार-संस्थायाः निर्माणम् अभवत् इति अथर्ववेदे श्रूयते- 'सा उदक्रामत् सा गार्हपत्ये न्यक्रामत्' इति। परिवार-संस्थायाः अनन्तरं यज्ञ-संस्थायाः निर्माणम् अभवत्, यत्र विभिन्नाः परिवाराः एकत्र मिलित्वा कार्यं सम्पादनं कुर्वन्ति। यज्ञ-संस्थातः परं सभा-संस्थायाः विकास अथवत्, यत्र ग्रामसभारूपं सभासंस्थायाः उत्कलनं भवति स्म। सभायाः अनन्तरं आमन्त्रण-परिषद्रूपं समिति-संस्थायाः विकाशः अभवत्। अतः परं राज्य-राष्ट्र-साम्राज्य इत्यादिरूपायाः संस्थायाः प्रचलनम् अभवत्।


ISSN : 2454-2881

शासनपद्धत्यां वैदिककाल: परमकुशलो बभूव। शासनपद्धति: च तदा अनेकविधा प्रचलिता आसीत्। वैदिकयुगे प्रचलिता अनेकविधाभि: शासनपद्धतिभि: अस्माकम् ऐतरेयब्राह्मण-नामकस्य ग्रन्थस्य अध्ययनेन परिचयो मिलति। वैदिककालीक: भिन्ना: शासनपद्धत्या: नामानि यथा-साम्राज्यं, भौज्यं, स्वाराज्यं, वैराज्यं, पारमेष्ठय-राज्यं, महाराज्यं आधिपत्यमय-राज्यं, समन्तपर्यायीराज्यं, सार्वभौमराज्यम्, इत्यादिनि। सम्राट् एव साम्राज्यस्य मुख्य: शासक:। शुक्लयजुर्वेदे उपलभ्यते यत्-'सम्यक्-राजत इति साम्राज्यम्।' यत् राज्यं सर्वत्र सम्यक् राजते प्रकाशते च तत् साम्राज इति। शतपथब्राह्मणनामकग्रन्थे उल्लेखमस्ति यत् राजसूय-नामकवैदिक-यज्ञानुष्ठानेन क्षत्रिय: राजा भवति, अपि च वाजपेयनामक-वैदिक-यज्ञानुष्ठानेन क्षत्रिय: सम्राट् भवति, भौज्यं ब्राह्मणग्रन्थयुगस्य एका शासन-पद्धति: आसीत्। अस्यां पद्धत्यां गणराज्यस्य स्थापना मान्या आसीत्। भौजशासनं गणराज्यस्य विशिष्टप्रकारकं शासनमासीत्। स्वाराज्यस्य राजनैतिकविधानं भौज्यप्रणाल्या सह सम्बन्धम् आसीत्, यस्यां प्रणाल्यां गणानायुप एक: अक्ष्यक्ष: शासनम् अकरोत्। शुक्लयजुर्वेदे अयम् अध्यक्षपादाय गणपति' इति शब्दं प्रयुज्यते- 'गणानां त्वा गणपतिं हवामहे' इति। स्वाराज्यशासनमपि गणतन्त्रीयशासनविधानमस्ति। वेदेषु वैराज्यम्, एका विशिष्टा शासनपद्धति: आसीत्, यस्यां राज्ञो नितान्तम् अभाव आसीत्। वैराज्यस्य अर्थो भवति नृपतिविहीनो देश:। ऐतरेयब्राह्मणग्रन्थानुसारेण वैराज्यपद्धत्या: प्रचलनम् उदीच्यदेशेषु हिमालयाद् अपि अग्रे आसीत्। परमेष्ठी अर्थात् ईश्वरीय सत्त्वाद्वारा उद्भासित: शासनतन्त्र एव पारमेष्ठयराज्यम्। प्रजापति देवता हि परमेष्ठी। अतएव अस्या: शासनप्रणाल्या: प्रजापति: एव मुख्य: शासक:। प्रजापति-शब्दस्य अर्थो भवति प्रजानां पालक: रक्षक: वा। अनेन प्रकारेण वैदिकयुगे गणतन्त्र-राजतन्त्रयो: उभयो: प्रकारकयो: शासनविधानस्य दृष्टान्तं मिलति।

वैदिक आर्य: शासनदृष्ट्यापि एकस्य सुव्यवस्थितराज्यस्य अधीन आसीत्। राजान: प्रजावत्सला आसन्। प्रजा राष्ट्रे राजनि च भक्तिभावं प्रदर्शयति स्म। राजा प्रजाभ्य: सुलभरूपा नदीवत् भवति- 'राजा राष्ट्राणां पेशो नदीनाम् अनुत्तमम् अस्मै क्षत्रम्' इति ऋग्वेदस्य मन्त्र:। अथर्ववेदे प्रजा: राजानम् आहवानं कुर्वन्ति यत् राष्ट्रस्य सर्वश्रेष्ठम् आसनं गृहीत्वा राजा प्रजा: सम्यक्रूपेण पालयतु इति- 'त्वा विशो वृणतां राज्याय वर्ष्मन् राष्ट्रस्य कुकुदि श्रयस्व' इति। राजा राष्ट्रस्य शासनं गृहीत्वा स्वकीय तेजसा प्रजापति भूत्वा प्रजाकल्यानार्थं राष्ट्रे विराजतु इति अपि प्रार्थना वेदेषु श्रूयते। वैदिक-ऋषय: सर्वदा एव राष्ट्रस्य सर्वोन्नतिं कामयामान: मन्त्रै: स्तूयन्ते यथा- 'इदं राष्ट्रं पिपृहि सौभाग्याय' इति।

सन्दर्भसूत्राणि-

१. नि.,१०.८
२. बृ.दे., ३.७०-७१
३. नि., १०.८
४. शु. य., १६.१७
५. तत्रैव, २३.१९
६. ऋ., २.२७.१०
७. ऋ,१.२४. ७.८
८. अथर्व., १८.३.१३
९. तत्रैव, ५.२४.१३
१० तत्रैव, ५.२४.१४


ISSN : 2454-2881

# वेदान्तदर्शनभेदस्वरूपविमर्शः

ड॰ गोविन्दशर्मा

वेदप्रामाण्यं स्वीकुर्वन्तीति वैदिकदर्शनं न्यावैशेषिकसांख्ययोगमीमांसाभेदेन षटसंख्यकाः भवन्ति। तत्र मीमांसाशब्दस्य पूर्वोत्तरमीमांसायां प्रयुक्तत्वात् जैमिनीय-पूर्वमीमांसा कर्मप्रतिपादिका, व्यासकृतोजरमीमांसा ज्ञानप्रतिपादका विद्यते इति जगति ख्याता। तन्न उत्तरमीमांसायाः नामान्तरं विद्यते वेदान्तः। वेदानामन्तो वेदान्तः। विद् धातोः घञ् प्रत्यये वेदशब्दस्य निष्पत्तिर्जायते। विध्दातोरर्थः वैयाकरणसिध्दान्तकौमुद्यां यथा-

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नमूशे क्रमात्।।[१]

न्यायनये वेदस्य ईश्वरकर्तृत्वात् पौरूषेयत्वेऽपि वेदान्तमते निरपेक्षोऽयं वेदोऽपौरुषेयः परमात्मनो निःश्वासभूत इति प्रतिपादितम्। यथा- 'स यथार्दैधाग्रेरभ्याहितात्पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्वससितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासं पुराणं विद्या उपनिषद श्लोकाः सूत्रण्यनुव्याख्यानानस्यैवैतानि निःश्वसितानि[२] इति बृहदारण्यकोपकनिषदि। कोषग्रन्थे अन्तः शब्दस्यार्थः एवं प्रतिपाद्यते यथा-निश्चयः, निर्णयः, पश्लानामन्तिमनिश्चयः, अन्तिमभागश्चेति।[३] श्रीवामनशिवरामाप्टेमहोदयानां मते यः सिध्दान्तः वेदानामन्तिमध्ये यस्य तथा तस्य कार्यक्षेत्राणां च शिक्षां ददाति, सः एव वेदान्तः।[४] उपर्युक्तसन्दर्भानुसारं वेदान्तविद्याया वेदान्तस्यान्तिमध्येयविषयकज्ञानस्य प्राप्तिर्भवतीतिशास्त्रणां डिण्डिम्घोषः। वेदान्तानामन्तिमलक्ष्यं ब्रह्मतत्त्वस्य प्राप्तिः इति शास्त्रेषूपलभ्यते। अतः श्रुतिस्मृतिग्रन्थानां सिध्दान्तानुसारं वेदस्य मुख्यप्रतिपाद्यविषयः एव निर्विशेषं ब्रह्म! 'तिलेषुतैलवत् वेदे वेदान्तः सुप्रतिष्ठितः'[५] इति श्रुतिवाक्यानुसरणपूर्वकं वेदान्तो वेदस्य सर्वश्रेष्ठ अंशः इत्युच्यते। आचार्यशङ्करेण वक्रोक्त्या वेदान्तशास्त्रस्य संज्ञा एवमुपस्थापिता यथा- सांख्ये ज्ञातव्याः पदार्थाः सांख्यायन्ते यस्मिन् शास्त्रे तत् सांख्यमिति इति[६]। टीकाकारेणानन्दगिरिणाप्युक्तम्-आत्मात्वम्पदार्थस्तत्पदार्थो ब्रह्म तयोरैक्यधीः तदुपयोनिश्चश्रवणादयः पदार्थास्ते सांख्यायन्ते व्युत्पादयन्ते इति तदेव सांख्य वेदान्त इति।[७]

ISSN : 2454-2881

श्रीधरस्वामिना सुबोधिनीटीकायामित्थं प्रतिपादितं यत्-सम्यक् ख्यायते ज्ञायते परमात्मा अनेनेति सांख्यंतत्त्वज्ञानम्। प्रकाशमानः आत्मबोधः साख अयम्, तस्मिन्कृतं कर्म तस्यान्तः समाप्तिरस्मिन्निति कृतान्तः तस्मिन् वेदान्तसिध्दान्त इत्यर्थः इति।[८] एतेभ्यः उपर्युक्तेभ्यः प्रमाणेभ्यः वेदान्तशब्दस्यापि परिभाषा अवधार्यते। पुनश्चचार्यरामानुजो वेदान्तस्य परिभाषामुपस्थापयन् कथयति 'वेदानामिन्द्र यजेत् (शत. ब्रा.) वरुणं यजेत् इत्येवमादीनाम् अन्त फलं फले हि ते सर्वे वेदाः पर्यसन्ति[९] इति।

सकलदर्शनानां लक्ष्यभूतमात्मतत्त्वचिन्तनरूपं वेदान्तदर्शनमिदम् वेदस्य द्वितीयभागे ज्ञानकाण्डे उपनिषद्रूपे विद्यामानानं वचनानां विरोधपरिहारपूर्वकवास्तविकार्थबोधनाय महर्षिण बादारायणेन सूत्ररूपेण संयोजितं दर्शनमिदम्। संहिताब्राह्मणारण्यकोपनिषद्भेदेन चतुर्धा विभक्तस्य वेदस्य योद्रन्तिम उपनिषद्भागस्तमादाय विचारितत्वात् दर्शनस्यास्य वेदान्तदर्शनमिति संज्ञा जाता। पूर्वमीमांसावद् ज्ञानकाण्डस्थवाक्यानां गहनतया विचारितत्वात् उत्तरमीमांसादर्शनमिति च नाम समागतम्।

न्यायसूत्राणां महर्षिवात्यायनकृतं भाष्यं, कणादसूत्राणां प्रशस्तपादविहितं भाष्यं, जैमिनिसूत्राणां शबरस्वामिकृतं भाष्यं, योगसूत्राणां व्यासकृतं भाष्यं प्राचीनं सर्वसम्मतं यथा लभ्यते, न तथा बादरायणसूत्राणां प्राचीनं भाष्यं किञ्चित्। यद्यपि बादरायणस्य साक्षात् शिष्येण बोधायनेन कृतं सुविस्तृतं भाष्यमासीदिति श्रूयते, तथापि तदृशो ग्रन्थोऽधुना न क्वाप्युपलभ्यते। तदन्तरमपि उपवर्षादिभिः प्राचीनैरायार्यैः ब्रह्मसूत्राणामेषां वृत्तयो रचिता आसन्निति शङ्कर-रामानुजादीनां भाष्यालोडनेन ज्ञायते। तथापि कतिपयवाक्यानि विहाय सम्पूर्णः कश्र्चन ग्रन्थो नोपलभ्यते। अत एव अवश्यं ज्ञातव्येऽस्मिन् दर्शने अनन्तरकालिकानां शङ्करभाष्कररामानुजादीनां बहुनामाचार्याणां विविधानि भाष्याणि दृष्ट्वा सामान्यजनानां भ्रान्तिरेव भवति, किं सत्यं तत्त्वमिति विषये। ब्रह्मसूत्राणां वास्तविकं व्याख्यानं किमिति तटस्थमतीनां समालोचकाना प्रश्न उदेति। इदानीं प्रायो वेदान्तदर्शने दशाधिका व्याख्यानभेदा उपलभ्यन्ते। सर्वैरपि भाष्यकृद्भिः तत्तत्कालानुसारेण पूर्वमेव विषयं निर्धार्य तदनुसारेणैव सूत्राणि वण्यन्ते, स्व-स्वमत्या सिध्दान्ताश्र्च स्थाप्यन्ते। अत एव दर्शनस्यास्य विषये इदमित्थमेवेनि वक्तुं दुस्साहसमिव भवति।

इमानि ब्रह्मसूत्राणि बैद्धजैनादिदर्शनानन्तरकालिकानि तत्प्राक्तनानि वा इत्यत्रास्ति विदुषां वैमत्यम्। ब्रह्मसूत्रेषु बौद्धजैनसांख्यादिदर्शनानां समालोचनं दृष्ट्वा केचन विद्वांसः सूत्राणीमानि अर्वाचीनानीति मन्यन्ते।

अन्ये केचन तु, साक्षात् बौध्दजैनादिदर्शनप्रवर्तकानां नामसङ्कीर्तनाभावात् तदपेक्षया प्राचीनान्येव इति मन्यन्ते। बौद्धोक्तस्य सङ्घातवादस्य, विज्ञानवादस्य, जैनोक्तानेकान्तवादस्य, सांख्योक्तप्रकृतिकारणवादस्य, न्यायवैशेषिकोक्तपरमाणु-कारणवादस्य च विषयदृष्ट्या वैदिककालादेव


ISSN : 2454-2881

समालोचना प्रारब्धा आसीत्। तेषामेव विवर्धनमनन्तकालिकैः बौद्धजैनाद्याचार्यैः कृतमिति कृत्वा सूत्राणामेषां प्राचीनत्वमपि वक्तुं शक्यते।

अस्तु प्राचीनत्वं नवीनत्वं बा, उभयथापि विषयगाम्भीर्यं तु निरपवादं वर्तत एव। ब्रह्मसूत्रकर्ता अयं बादरायणः वेदपुराणादिशास्त्रकर्ता पराशरपुत्रो व्यास एव, तद्भिन्नो वेत्यत्रापि विवदन्ते पण्डिताः। पुराणेषु व्यासस्यैव बादरायण इति संज्ञापि दृश्यते। तत्रापि चतुर्वेदविभाजको व्यासः, अष्टादशपुराणकर्ता व्यासः, अन्येषाम् उपपुराणानां कर्ता, महाभारतस्य च कर्ता व्यास एक एव वा व्यासाख्यपदवीमलङ्कुर्वाणा विभिन्ना वा इत्यपि वैमत्यं प्रतिपादयन्ति समालोचकाः। अस्तु व्यास एव बादरायणः, तदन्यो वा तेन न कापि हानिरस्माकम्।

अत्र तावत् सूत्रोक्तविषयाणां सामान्यतः समालोचनं क्रियते। सूत्रकारेण बादरायणेन चतुर्षु अध्यायेषु सूत्राणि विभक्तानि।

तत्र प्रथमेऽध्याये सर्वेषां जगत्कारणप्रतिपादकानां वेदान्तवाक्यानां परब्रह्मणः प्रतिपादनमेव तात्पर्यं, तथैव च तेषां समन्वयो वक्तव्य इत्युक्तम्। अत एव अध्यायोऽयं 'समन्वयाध्यायः' इत्युच्यते।

द्वितीयाध्याये- पूर्वपक्षिभिः आक्षिप्तानां विरोधाभासानां निराकरणं क्रियते। अतोऽयमध्यायः 'अविरोधाध्यायः' इत्युच्यते।

तृतीयाध्याये- परब्रह्मणः प्राप्त्युपायः तत् साक्षात्कारार्थं साधनभूता ब्रह्मविद्याश्च चिन्तिता वर्तन्ते। अत एवाध्यायोऽयं 'साधनाध्यायः' इत्युच्यते।

चतुर्थाध्याये-पूर्वोक्तविद्याभिः प्राप्तफलविषये निर्णयः क्रियते। तस्मादयमध्यायः 'फलाध्यायः' इत्युच्यते।

एषामेव ब्रह्मसूत्राणां तत्तत्कालसमागतैराचार्यैर्विविधानि भाष्याणि कृतानि। इत्थं तैस्तैर्भाष्यकारैः स्व-मतपोषणाय विभिन्नाः सम्प्रदायाः प्रारब्धाः। तेषु प्रथमः शङ्कराचार्यः। भगवता शङ्कराचार्येण ब्रह्मसूत्राणामतिविस्तृतं भाष्यं कृतम्। प्रायः अष्टमशताब्दौ अवतीर्णस्यास्याचार्यस्य कालः बौद्धमय आसीत्। सम्पूर्णभारतवर्षे बौद्धानां प्रभाव आसीत्, वैदिकधर्मस्य स्थानमेव नासीत्, जनानां मनसि वेदे श्रध्दा नासीत्। अतस्तत्काले भगवदंशावताभूतेन शङ्कराचार्येण महता श्रमेण वैदिकधर्मः स्थापितः। बौद्धैरुक्तस्य शून्यवादं खण्डयित्वा एकं ब्रह्म तु सत्यमिति साधितम्। उच्चते च तन्मतसारः-

'श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।। १०

एवं शङ्कराचार्येण ब्रह्म एकमेव सत्यमित्युक्त्या अद्वैतमतं प्रतिपादितम्। परन्तु शारीरकभाष्ये

ISSN : 2454-2881

क्वचित् शङ्कराचार्येण जगतः सत्यत्वमपि संकेतितमस्ति-

'यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, एवं कार्यमपि जगत्रिषु कालेषु सत्त्वं न व्यभिचरति। एकं च पुनः सत्त्ववतोऽप्यनन्यत्वं कारणात् कार्यस्य [११]।

भगवता शङ्कराचार्येण ब्रह्मसूत्रभाष्यस्य प्रस्तावनायां (अध्यासभाष्ये) यथा अद्वैतार्थः सिध्यति तथैव सूत्रव्याख्यानां क्रियते इत्यूक्तम्- 'यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शरीरकमीमांसायां प्रदर्शयिष्यामः [१२] इति। तदेतत्कथनं तु बौध्दानां सन्तोषार्थं, तेषां भ्रमोत्पादनार्थं वा इति ज्ञेयम्।

केचन अन्ये दार्शनिकाः 'प्रच्छन्नबौद्ध' इत्युक्त्वा शंकराचार्यं मत्रसयन्ति, तदेतत् दुराग्रहयुक्तमेव प्रतिभाति शङ्कराचार्येण बौद्धमतं विनश्य वैदिकमतस्थापितत्वात्।

तत्काले शङ्कराचार्येण निर्विकारं, निर्विशेषं, निर्गुणं ब्रह्म प्रतिपादितं चेत् तदन्तरकाले भगवता रामानुजाचार्येण सगुणं सविशेषं ब्रह्म प्रतिपादयित्वा सविशेषाद्वैतमतं (विशिष्टाद्वैतमतं) स्थापितम्। ब्रह्म न निर्विशेषमपि तु चिदचिद्विशिष्टमिति रामानुजाचार्येणोच्यते तदीये श्रीभाष्ये। श्रीभाष्यस्यारम्भे एव रामानुजाचार्येण एतन्मतं न स्वकीयमतमपि तु पूर्वजैः प्रतिपादितं, तदेवेदानीं व्याख्यायते इति कथयन् विशिष्टाद्वैतस्य पोषणं कृतमस्ति।

तथा हि- 'भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुः तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते [१३] इति। पुनश्च रामनुजाचार्येणापि क्वचिद् जगतो मिथ्यात्वं स्वीकृतं वर्तते, यथा-

'तत्र सत्यपदं- निरूपाधिकसत्तायोगि ब्रह्मऽह। तेन विकारास्पदमचेतनं तत्संसृष्टश्चेतनश्च व्यावृतः, नामान्तरभजनार्हावस्थान्तरयोगेन तयोर्निरूपाधिक-सत्तायोगरहितत्वात् [१४] इति।

भगवता रामानुजेन 'श्रीवैष्णवसंप्रदाय': अपि प्रवर्धितः, स च भक्तिमार्गप्रधानः। अयं सम्प्रदायः भगवतो नारायणादेव आगत इति श्रीवैष्णवा मन्यन्ते। तैरुच्यते-

'लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम्। अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्।।[१५]

अयं मार्गो भगवतः शङ्करचार्यस्यापि सम्मत इति शंकराचार्यरचितविविधस्त्रोत्राणि दृष्ट्वा ज्ञायते। इत्थं परस्परं सहायकभूतं मतद्वयमिदं पण्डितानां दुराग्रहात् परस्परं प्रतिपक्षि जातम्, अयमेव खेदस्य विषयः। अतो रामानुजीयं मतं न शङ्करमतविरुद्धमपि तु तन्मतव्याख्यानरूपं, पूर्णरूपमिति वा वक्तव्यम्।

तदनन्तरं भगवता पूर्णप्रज्ञेन (मध्वाचार्येण) 'पूर्णप्रज्ञभाष्य' विरच्य जीवब्रह्माणोः शाश्वतभेदं प्रतिपाद्य द्वैतमतं प्रवर्तितम्। अतोऽधुना इमानि एव त्रीणि मतानि दर्शनक्षेत्रे 'मतत्रयम्' इति नाम्ना प्रख्यातानि सन्ति। तदन्तरमपि बहुभिराचार्यैः ब्रह्मसूत्राणां भाष्यं कृत्वा विभिन्नानि मतानि प्रतिपादितानि। सर्वैरपि

 ISSN : 2454-2881

आचार्यैः ब्रह्मसूत्राणां स्वसिध्दान्तानुकूलतयैव व्याख्यानङ्कृतम्। अत एषु सूत्रार्थेषु वास्तविकार्थः कः ? इति प्रश्न उदेति तटस्थमतिमतां पुरुषाणाम्।

वेदान्तस्य 'प्रस्थानत्रयी' इति नाम्ना प्रसिद्धानाम् 'उपनिषद्–ब्रह्मसूत्र-भगवद्गीतानाम्' नैकमपि निर्विवादं भाष्यं प्राप्यतेऽधुनां, तस्य विषयस्य सूक्ष्मतमत्वात्, मानवबुद्ध्या दुर्ज्ञेयत्वाच्च। अतः स्वाग्रहं विनैव तटस्थमतिं सम्पाद्य सर्वाणि व्याख्यानानि अधीत्य युक्तियुक्तः, सूत्रानुरोधी, उपनिषद्वचनसिध्दः अर्थो ग्राह्यः।

समेषां वेदान्तदर्शनानां च स्वरूपं तालिकामाध्यमेन अधः प्रदर्श्यते।

| क्र.स. | भाष्यकाराः | तत्स्थितिकालः (अनुमितः) | भाष्यनाम | सिध्दान्तः | व्या. सू. | सम्प्रदायः |
|---|---|---|---|---|---|---|
| १. | शङ्कराचार्यः | वि.स.७००-८०० | शरीरकभाष्यम् | अद्वैतसिध्दान्तः | ५५५ | शाक्तादिषट् संप्रदायाः |
| २. | भाष्कराचार्यः | वि.स. १००० | भाष्करभाष्यम् | भेदाभेदसिध्दान्तः | ५४७ | |
| ३. | रामानुजाचार्यः | वि.स. १०१७-११३७ | श्रीभाष्यम् | विशिष्टद्वैतसिध्दान्तः | ४५४ | श्रीवैष्णवसंप्रदाय |
| ४. | मध्वाचार्यः (पूर्णप्रज्ञः, आनन्दतीर्थः) | वि.स. १२०० | पूर्णप्रज्ञभाष्यम् | द्वैताद्वैतसिध्दान्तः | ५६२ | वैष्णवसंप्रदायः |
| ५. | निम्बाकाऽचार्यः | वि.स. १२५० | वेदान्तपारिजा | तभाष्यम् द्वैताद्वैतसिध्दान्तः | ५४९ | वैष्णवसंप्रदायः |
| ६. | श्रीकण्ठाचार्यः | वि.स. १३०० | शैवभाष्यम् | शिवविशिष्टाद्वैतसिध्दान्तः | ५४५ | शैवसंप्रदायः |
| ७. | श्रीपतिः | वि.स. १४०० | श्रीकरभाष्यम् | वीरशैवविशिष्टाद्वैतसिध्दान्तः | ५४५ | वीरशैवसंप्रदायः |
| ८. | बल्लभाचार्यः | वि.स. १५०० | ऋणुभाष्यम् | वैष्णवसंप्रदायः | ५५५ | शुध्दाद्वैतसिध्दान्त |
| ९. | विज्ञानभिक्षुः | वि.स. १६०० | वज्ञानामृतभा | अविभागाद्वैतसिध्दा | ५५६ | |
| १०. | बलदेवाचार्यः | वि.स. १७०० | गोविन्दभाष्यम् | अचिन्त्यभेदाभेदसिध्दान्तः | ५५६ | वैष्णवसंप्रदायः |

वेदस्यान्तः नाम उत्तरभागत्वेन उपनिषद् परिगणिता भवति। 'वेदान्तो नाम उपनिषत् प्रमाणम्[१६]। इति वाक्यानुसारं वेदानामन्तो वेदान्तः अर्तात् उत्तरभागः उपनिषद्भागो वेति निश्चियते। सामान्यतः भगवतो निःश्वासभूतोऽपौरूषेयं वेदः प्रपञ्चेऽस्मिन् संहिताब्राह्मणारण्यकोपनिषद्भेदेन चतुर्धा विभाजितः। तत्र यागादिकर्म प्रतिपादनपरः आद्यभागः संहिता, तस्याः विवरणरूपो ब्राह्मणः, तद्विचारपरं शास्त्रम् पूर्वमीमांसाशास्त्रं कर्ममीमांसाशास्त्रं वेति कथ्यते। पुनश्च भगवत्प्रतिपादकत्वादुपनिषद् ब्रह्मविद्या इति शास्त्रकारैः निरूपितम्। उक्तञ्च भाष्ये- 'सेयं ब्रह्मविद्या उपनिषच्छब्दावाच्या तत्पराणां सहेतोः संसारस्यात्यवसानादिति'[१७]। अतः उपनिषदः अर्थवेदकं दर्शनं ब्रह्ममीमांसा उत्तमीमांसा वेति निश्चीयते। ज्योतिष्टोमादीनां कर्मणामल्पास्थिरफलकत्वमवगम्य विद्वान्सः अन्तःस्थिरफलकब्रह्मजिज्ञासां हेतकृत्य वेदान्तेषु स्वतः प्रवर्तन्ते।

'वेदान्तोनामुपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रदीनि च[१८] इति परमहंसपरिव्राजकाचार्यश्रीसदानन्दयोगीन्द्रविरचितवेदान्तसारोक्तमिदं वचनम्। इदानीं सर्वस्यापि वस्तुविचारोद्देश्यपूर्वकत्वात् प्रतिज्ञातं वेदान्तं नामत एव निर्दिशति। उपनिषदेव प्रमाणं यस्मिन् तच्छात्रं तथा तदुपकारीणि वेदान्तवाक्यसंग्राहकसूत्रणि वा। यथा वेदान्तसारस्य विद्वन्मनोरञ्जनीटीकायाम्- शरीरमेव शारीरकं तत्रभवो जीवः शारीरकः, स सूत्र्यते यथातथ्येन निरूप्यते यैः तानि शारीरकसूत्राणि। अथातो ब्रह्मजिज्ञासा इत्यादीनि। यद्वा शारीरकस्य सूत्राणि तद्यथात्मवादिवेदान्तार्थ संग्रहवाक्यानि।'[१९] इति। 'आदि'शब्देन न केवलं सूत्राणामपि च भगवद्गीताभाष्याध्यात्मिकशास्त्राणां ग्रहणम्। अत उत्तम्- 'आदि शब्दो भाष्यादि संग्रहार्थम्[२०] इति।

विचित्रमयो नामरूपात्मकः अविद्याकल्पितोऽयं संसारः श्रीमद्विश्वकृता नानाविधप्रपिञ्चतवस्तुभिः रचितः। अत्र जडचेतनादिषु तथा देवगन्धर्वयक्षादिष्वपि मानवसर्वश्रेष्ठत्वेन परिगणितो भवति। अस्य विचारधारा मननशीलतादिगुणास्तं श्रेष्ठत्वेन प्रतिष्ठापयन्ति। यतो हि दुर्लभः शरीरधारी मनुष्य एव मोक्षप्राप्तिरूपपरमानन्दमवाप्तुं समर्थो भवति, नान्यः कोऽपि। अतः इतरयोनयोः मनुष्यजन्मकामयन्ते। मनुष्यश्जन्मनो दुर्लभतां शास्त्रं प्रतिपादयति। यत्-

दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः।
तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम्।।[२१]

जीवनसंग्रामक्षेत्रे मानवाः सर्वदा विजयतामवाप्रतुं प्रयासरताः भवेयुः प्रतिक्षणं यद्यपि इतरे जीवाः जीवनक्षेत्रे संग्रामरताः भवन्ति। तथापि मनुष्यवत्फलकामाः न भवन्ति। अपितु ये मायामयेऽस्मिन्यंसारे निबध्दाः भवन्ति आत्मानमवगन्तुमपि न प्रयतन्ते च। मनुष्यो विवेकप्राधान्यत्प्रत्येकं कार्यानुष्ठानात्प्राक्


ISSN : 2454-2881

विचारशक्तेरूपयोगं करोति। अतः मनुष्यजन्मदुर्लभतापरिलक्ष्यते। प्रजङ्गेऽस्मिन् श्रीमद्भागवते स्मर्यते-

लब्ध्वासुदुर्लभमिदं बहु सम्भवान्ते, मानुष्यमर्थदमनित्यपमपीह धीरः।

तुर्णं यतते न पतेदनुमृत्यु यावन्निः श्रेयसाय विषयः खलु स्यात्। [२२]

मनुष्यजन्मनः दुर्लभताप्रसघङ्गे विवेकचुडामणावपि श्रीमच्छङ्कराचार्येणोक्तम्-

जन्तुनां नर जन्म दुर्लभमतः। [२३]

दुर्लभं त्रयमेवैतद्देवानुग्रहहेतुकम्। मनुष्यत्वं मुमुक्षत्वं महापुरुषसंश्रयः। [२४]

लब्ध्वा कथिञ्चन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतिपारदर्शनम्। [२५]

बुद्धयादिसकलसामर्थ्यसम्पन्नाः सन्तो मानवाः अन्येषु जीवेषु तथा अदृश्यशक्तिष्वपि स्वप्रभावं विस्तारयन्तः भौतिकस्वार्थं साधयन्ति। परन्तु एवम्भूताः शक्तिसामर्थ्यसम्पन्ना एते मानवाः एव मुमुक्षुत्वमवाप्तमर्हाः भवन्ति, नान्ये। अतः दिव्यभोगान् सम्प्राप्य स्वर्गलोकसौभाग्यनन्दनसुरदुरवनितादिजन्यं सुखं च लब्धवन्तोऽपि देवा इह मनुष्यशरीरं कामयन्ते। यथोक्तं श्रीमद्भागवते-

अहो अमीषा किमकारीशोभनम् प्रसन्नएषां स्विदुतस्वयं हरिः।

यैर्जन्मलब्धं नृषुभारताजजिरे मुकुन्दसेवौपयिकं स्पृहा हि न।। [२६]

अतः स्वेषु लोकेषु नित्यनिरतिशयपारमार्थिकसुखं नास्तीति चिन्तयन्तः तल्लाभाय देवयोनयोः मनुष्यजन्मने स्पृहन्ति। एवं च मनीषिणः इह प्रापिञ्चकसुखेभ्यः पराङ्गङ्मुखाः सन्तः गुरुपरम्परोक्तपरमार्थज्ञानलाभार्थं श्रवणमनननिधिध्यासनानि समाचरन्तः परमानन्दस्वरूपे आत्मन्यन्ते लीयन्ते। परन्तु भोगसंसर्गादेते दुःखदावानले दग्धीभूताः यन्त्रणाजर्जरत्रि ताश्च सन्तः विचित्रमयमनित्यं संसारं प्रति आगमनस्य तात्त्विकोद्देश्यं विस्मरन्ति। अत्र विद्वान्सः एतदस्माद्विरमन्ते। तथा गीतायामुक्तम्-

ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते।

आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः।। [२७]

अत्र मनुष्यजन्मनः महदुद्देश्यं परिशीलनेनास्मिन्मनुष्यशरीरे सर्वं सम्भविष्यतीति मे मतिः। पुनश्च भगवान स्वमाया रचितेऽस्मिन् रङ्गमञ्चयामाने विचित्रमयप्रपञ्चे पशुपक्षीसरीसृपोपरगमस्त्यादीन् दृष्ट्वा न मोदं सम्प्राप्य ब्रह्मसाक्षात्कारयोग्यं शरीरं विना क्षुब्धः आसीत्। परन्तु एवम्भूतं मुक्तिसाधनयोग्यं मनुष्यशरीरं दृष्ट्वा प्रहृष्ट्वान्। प्रसङ्गेऽस्मिन् भागवतश्लोकं स्मर्यते-

सृष्ट्वापुराणिविविधान्यजयाऽऽत्मशक्त्या

वृक्षान्सरीसृपपशून् खगदंशमत्स्यान्।

तैस्तैरतुष्टहृदयः पुरुषं विधाय

ISSN : 2454-2881

ब्रह्मावलोकधृषणं मुदमपापदेवः ।। [२८]

उपर्युक्तेभ्यो वाक्येभ्यो एषः निष्कर्षः प्राप्यते यत् सर्वेषु शरीरेषु मनुष्यशरीरमेव प्रकृष्टं साधनक्षेत्रं नित्यानन्दस्वरूपानुभूत्यर्थम्। एवम्भूतशरीरे मनुष्यो नदीपर्वतपशुक्षीवृक्षगुल्मादिभिरावृतामिमां पृथिवीं तथा ग्रहनक्षत्रोपग्रहादिभिः परिव्याप्तमिदमलौकिकोद्भुतं विशालकायविश्वमवलोक्य आश्चर्यान्वतो भवति मनसि कोऽस्यविचित्रमयविश्वस्य स्रष्टा किम्भूतमस्य स्वरूपं चेति। प्रसङ्गेऽस्मिन् ऋग्वेदे श्रूयते- कोऽद्धा वेद क इह प्रवोचत् कुत वा बभूव कुत इयं विसृष्टि [२९]। पुनश्च प्रश्नोपनिषदि अपि श्रुतम्-

अथ कबन्धी कात्यातन उपेत्य प्रपेच्छा। भगवान कुतो ह वी इमाः प्रजाः प्रजायन्ते इति।। [३०]

अत्र विश्वे प्रजानामुत्पत्तिविषयकः प्रश्नः परिलक्ष्यते। पुनश्च मनुष्यः आश्चर्यमयेऽस्मिन्विशवस्वस्योत्पत्तिस्थितिविषये तथा जगतः उत्पत्तिस्थितिलये विषये च पार्याप्ततया चिन्तनं परिशीलनमनुसन्धानं च कृत्वा युक्तियुक्तं सिध्दान्तं स्थापयन्नास्त्यद्यावधि। अतः अनादिकालतः जगतकारणभूतपरमार्थवस्तुनो जगतः स्वस्य शिष्येभ्यः श्रावयितवन्तः, तदेव वेद इति प्रसिध्दम्। एतद्हेतोः अस्माकमादिग्रन्थो वेदः श्रुतिनाम्नाभिहितः श्रुत्वादिग्रहणत्वाच्छिष्यैः। सर्व्ज्ञानमयेऽस्मिन्वेदे व्यावहारिकज्ञानेन सह पारमार्थिकज्ञानस्य पर्यालोचनं परिलक्ष्यते। पुनश्च विश्वसृष्टिविषयकविचारशास्त्रं दर्शनं नाम्रा व्यपदिश्यते। अतः भारतीयविचारधाराः प्राथमिकप्रयासः प्रतिफलनमेव दर्शनम्। अत्र न केवलमार्याणामपितु धीसम्पन्नानां मनीषिणां सूक्ष्मविचारराशि दर्शनशास्त्रसंज्ञां लभते।

**सहायकग्रन्थसूची-**


१. वैयाकरणासिध्दान्त कौ. चुरा-प्र.

२. बृ-उप., २.४.१०

३. सं हिं- को., पृ. ४६

४. सं हिं- को., पृ. १७६

५. मुक्ति-उप., १.१५

६. श्रीमद्भ-गी-रा-भा., १८-१३

७. श्रीमद्भ-गी-रा-भा-व्या., १८-१३

८. श्रीमद्भ-गी-रा-भा-सु-टी., १८-१३

९. श्रीमद्भ-गी-रा-भा., १८-१३

१०. माधवाचार्यः, पञ्चदशी...

११. शङ्कराचार्यः, शारीरकभाष्यम्, आरम्भणाधिकरणम्, २.१.१६


ISSN : 2454-2881

१२. तत्रैव, अध्यासभाष्यम्

१३. रामानुजाचार्य:, श्रीभाष्म, प्रस्तावना

१४. तत्रैव, जन्माद्याधिकरणम्

१५. श्रीसम्प्रदायगुरुपरम्परा, आरम्भश्लोक:

१६. वेदान्त-सार

१७. ब-उप-शां-भा., पृ. २८

१८. वे-सा-

१९. वे-सा-वि-टी., पृ. २१

२०. वे-सा-वि-टी., पृ. २१

२१. श्री भा- म- पुराण, ११.२.२९

२२. श्री भा- म- पुराण, ११.२.२९

२३. वि.चु., ३

२४. वि. चु., ४

२५. वि. चु., ५

२६. श्री भा-म-पुराण, ५.१ ९.२१

२७. श्रीमद्भा-गी, ५.२२

२८. श्रीमद् भा-म-पुराण, ११.९.२८

२९. ऋग्वेद: १०-१ २९-६

३०. प्र. उ., १.३

------

ISSN : 2454-2881

# नाट्यशास्त्रीयपरम्परायां महापुरुषशंकरदेवस्य अङ्कीयानाटकानि- एका समीक्षा

ड॰ कमल लोचन आत्रेय:

महापुरुषशंकरदेव असमीयानाट्यसाहित्यस्य जनकरूपेण वन्द्यते। असौ नववैष्णवधर्मस्य प्रवर्तक: युगस्रष्टा जननायक: शंकरदेव: ईशवीये पञ्चदशशताब्दे असमप्रदेशस्य बरदोवा (सम्प्रति बटद्रवा) इति स्थाने जन्म लेभे। भक्तिधर्मप्रचारे कृतात्मनियोग: शंकरदेव: धर्मगुरुरूपेण यथा समग्र एव भारतवर्षे पूज्यते तथैव गीत-नाट्य-काव्यादिसंरचनेन असमीयासाहित्यजगत्यपि अस्य नाम वन्दनीयं प्रातस्स्मरणीयं चास्ति। वैष्णवधर्मप्रचारमुद्दिश्य असौ भगवत्स्तुतिमूलकानि बहूनि गीतान्यरचयत् यानि असमप्रदेशे 'वरगीत' नाम्ना सुप्रसिध्दानि साधारणजनास्यसुलभानि च वर्तन्ते।

पुनरभिनयमाध्यमेन भगवत्माहात्म्यप्रचारार्थं सामान्यजनहृदयान् मुक्तिमार्गं प्रति आकर्षयितुं च शंकरदेव: नाट्यरचनायामपि प्रवृत्तोऽभुत्। शंकरदेवात् प्रागसमीयासाहित्यजगति नाट्यरचनाऽभवदिति विषये किमपि तथ्यं नोपलभ्यते। नाट्यरचनायाम् अभूतपूर्वप्रतिभया नैपुण्येन चानेन या नाट्यकला प्रदर्शिता तयैवासौ असमीयासाहित्यजगति नाट्यसाहित्यस्य स्रष्टारूपेण गौरवमये आसने समधिष्ठित:। महापुरुषशंकरदेवविरचितेषु नाटकेषु 'पत्नीप्रसाद', 'कलिदमन', 'केलिगोपाल', 'रुक्मिणीहरण', 'पारिजातहरण', 'रामविजय' चेति षण्नाटकानि सम्प्रत्युपलब्धानि सन्ति। एतद्व्यतिरिच्य 'चिह्नयात्रा', 'कंशवध', 'जन्मयात्रा'दिनाटकान्यपि महापुरुषेणानेन प्रणितान्यासन्निति परवर्तिकाले तत्शिष्यविरचितेषु गुरुचरितादिग्रन्थेषूपलभ्यते। अन्यच्च, गोपी-उद्धव-सम्वादमवलम्ब्य शंकरदेवप्रणीतम् अपरैकमपि अज्ञातनाम नाटकम् अग्निदग्धमभवदिति गोपालआताविरचिते गुरुचरितग्रन्थे प्राप्यते।[१]

महापुरुषशंकरदेवस्येमानि नाटकानि 'अङ्कीयानाट' इति नाम्ना लोके सुविख्यातानि सन्ति। गुरो: शंकरदेवस्य पदम् अनुश्रृत्य तत्शिष्येण महापुरुषमाधवदेवेनापि बहुनाटकानि विरचितानि यान्यपि अङ्कीयानाटनाम्नैव प्रख्यातिं लभन्ते। इदानीं प्रश्न उदयति यत् कथमेतेषां नाटकानाम् 'अङ्कीयानाट' इत्यभिधा? शंकरदेवेन माधवदेवेन वा कुत्रापि 'अङ्कीया' इति शब्दो न प्रयुक्त:। ताभ्यां तु यात्रा-लीला-नाटकादिशब्दा एव प्रयुज्यन्ते। यथा- 'कालिदमन नाम लीला यात्रा कौतुके करव'[२] इत्यादि:। किन्तु परवर्तिसमये


ISSN : 2454-2881

गोपालदेव-दैत्यारिठाकुर-रामचरणठाकुर-द्विजरामानन्दादिभिः शिष्यैः स्वग्रन्थेषु गुरुचरित्रव्याख्यानावसरे नाटकस्य स्थाने अङ्कशब्दस्य प्रयोगः क्रियते स्म। यथा-

'रामायण अङ्क करि दिलन्त शंकर' [३]

'अङ्कक लिखिला तैत श्रीमन्त शंकर' [४]

'वाप अङ्क करायोक सवहि देखुक' [५]

'पारिजात हेन नाम अङ्क महा अनुपम' [६] इत्यादिषु।

संस्कृतसाहित्ये दशरूपकाणि प्रसिद्धानि सन्ति। यथा-

''नाटकमथ प्रकरणं भाण-व्यायोग-समवकार-डिमाः

इहामृगाङ्कविथ्यः प्रहसनमिति रूपकाणि दश।।'' [७]

अत्र यदङ्कनामकमष्टमरूपकमस्ति तस्मादेव 'अङ्कीया' इति नामग्रहणं, यत उभयत्रैव एक एव अङ्क दृश्यते इति केषाञ्चित् पण्डितानां मतमस्ति। पुनः, संस्कृतनाटके कथांशव्यवच्छेदको योऽङ्कशब्दोऽस्ति तस्मिन्नेव असमीया 'ईया' प्रत्यययोगेन 'अङ्कीया' इति शब्दोत्पत्तिरित्यपरे। एकाङ्कयुक्तत्वाद् 'अङ्कीया' इत्युच्यते।[८] असमीयासंस्कृतौ अङ्कीयानाटकस्य उपस्थापनमभिनयो वा 'भाओना' इति शब्देन ज्ञायते। अत्रापि भाणनामकं तृतीयसंस्कृतरूपकमवलम्ब्यैव भाओनाशब्दः प्रचलित इति वक्तुं युज्यते।

अङ्कीयानाटकस्य उत्पत्तिविषये एतदेव सर्वसम्मतमस्ति यत् महापुरुषशंकरदेवस्य मौलिकावधारणया नाट्यकलाकौशलेन च सुसमृद्धं प्राचीननाट्यानुष्ठानानां समन्वयरूपमेवास्ति अङ्कीयानाटकम्। पुत्तलिकानृत्यं प्राचीनासमीया-ओजापालिनृत्यं ढुलीयानृत्यं देओधनीनृत्यं दक्षिणभारतस्य यक्षगानं कथाकलिनृत्यं मैथिलीककविविद्यापति- उमापत्यादीनां गीत-नाटकानि चाश्रित्य संस्कृतनाट्यरीतिन् च पुरस्कृत्य महापुरुषशंकरदेवेन वैष्णवधर्मप्रचारार्थं अङ्कीयानाटकानि संरचितानीति वक्तुं शक्यते।

संस्कृतनाट्यपरम्परायां नाटकस्यादौ पूर्वरङ्गविधानं दृश्यते। पूर्वरङ्गे प्रत्याहारादीनि बहुन्यङ्गानि भवन्ति, यत्र वाद्य-नृत्य-गीताद्यनुष्ठानानि अनुष्ठीयन्ते। यदुक्तम् नाट्यशास्त्रे- यस्मादङ्गप्रयोगोऽयं पूर्वमेव प्रयुज्यते। तस्मादयं पूर्वरङ्गो विज्ञेयोऽत्र द्विजोत्तमाः।। [९]

अपि च,

अस्याङ्गानि तु कार्याणि यथावदनुपूर्वशः।

तन्त्रीभाण्डसमायोगैः पाठ्ययोगकृतैस्तथा।।

प्रयाक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि तु।।[१०]

नान्दीपाठोऽपि पूर्वरङ्गस्यैव अङ्गविशेषोऽस्ति यत्र देवद्विजनृपादीनां स्तुतिर्विधीयते।[११]

अङ्कीयानाटकेऽपि पूर्वरङ्गवद् 'धेमालि' इत्यनुष्ठानमनुष्ठीयते यत्र गायन-वायनादिभिः (गायक-वादकादिभिः) कृतैः पारम्परिकवाद्य-नृत्यादिभिः मङ्गलकामना विधीयते। अनुष्ठानमिदं 'वर-धेमालि', 'सरु-धेमालि', 'घोषा-धेमालि', 'छों-धेमालि', 'राग-धेमालि', 'न-धेमालि', 'नाट-धेमालि' चेति सप्तप्रकारकं भवति। धेमाल्यनुष्ठानादनन्तरं सुत्रधारः प्रविश्य श्लोकैः गीतैश्च उपास्यदेवतां स्तौति यत् खलु नान्दीनाम्नैव महापुरुषेणाप्यभिधीयते। यथा रुक्मिणीहरणनाटके-

''नान्दी गीत। राग सुहाइ। मान एकतालि।।

धुं।। जय जगजीवन मुरारु। पावे परणाम हमारु।।...

कहतु शंकर हरिदासा।।

नान्द्यन्ते सुत्रधारः- अलमति विस्तरेण, ......''[१२] इति।

संस्कृतनाटकेषु पूर्वरङ्गादनन्तरं सुत्रधारः स्थापको वा प्रविश्य भारतीवृत्तिमाश्रित्य कवेर्नामगोत्रादीन् नाटकस्य नाम-वस्तु-बीज-मुखादीनि चोपस्थापयति-

''सूचयेद् वस्तु बीजं वा मुखं पात्रमथापि वा।

रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्तयेत्।।

ऋतुं च कञ्चित्प्रायेण भारतीं वृत्तिमाश्रितः।।''[१३]

तत्र भारतीवृत्तिर्नाम संस्कृतप्रायो वाग्व्यापारः।[१४] अङ्कीयानाटकेष्वपि नान्द्यन्ते भारतीवृत्तिमाश्रित्य नाट्यपरिचयात्मकानि संस्कृतवाक्यानि दृश्यन्ते। यथा-कालिदमने- ''सुत्रधारः भोः भोः सामाजिकाः, यूयं श्रृणुध्वमधुना वचः। कृष्णस्य कालिदमनां यात्रावार्तां निरोधत।''[१५]

पुनः भारतीवृत्तेः प्ररोचना-विथि-प्रहसनामुखादिषु चतुर्ष्वङ्गेषु प्ररोचना आमुखं चेत्यङ्गद्वयम् अङ्कीयानाटकेऽपि परिलक्ष्यते। यथा रामविजयनाटके- ''श्रीरामविजयनामनाटकं मोक्षसाधकम्''[१६] इत्यत्र प्रशंसया तदुन्मुखीकरणरूपा प्ररोचना। आमुखं नाम प्रस्तावना। पत्नीप्रसादनाटकं विहाय शंकरदेवस्य अन्येषु नाटकेषु सुत्रधारः सङ्ग्यादिभिः सह वार्तां कुर्वन् स्वयं पात्रप्रवेशं निर्दिशति। यथा केलिगोपाले-

''सङ्गी- सखि, देवदुन्दुभि बाजत।

सुत्रधारः- आहे देवदुन्दुभि बाजत। आः मिलल।

अथ प्रवेशमकरोत् कृष्णः कन्दर्पदर्पहा।''[१७] इति।

अत्रावधेयं यत् यद्यपि शंकरदेवस्येमानि नाटकानि वस्तुतः ब्रजावलीनामिकायां मैथिलीमिश्रित-प्राचीनासमीयाभाषायामेव रचितानि सन्ति किन्त्वेषु बहुत्र संस्कृतश्लोकाः संस्कृतवाक्यानि च दरीदृश्यन्ते। विशेषतो नान्दीपाठावसरे प्रस्तावनायां महनीयपात्राणां प्रवेशकाले च प्रायशः सर्वत्रैव शंकरदेवेन संस्कृतभाषैव


ISSN : 2454-2881

प्रयुक्ता। यथा पारिजातहरणे नान्दीपाठः-

नमः कृष्ण विष्णोऽच्युतानन्तशक्ते, नमो राम राजीवनेत्र प्रभो ते।

नमो ब्रह्ममूर्त्ते मुरारे परेश, नमो विश्ववास प्रसीद प्रसीद।।[१८]

यथा च रामविजयनाटके परशुरामस्य प्रवेशकाले-

तत आगत्य तरसा भार्गवो भ्रुकुटि-मुखः।

स्कन्धे निधाय कठिनं कुठारं राममब्रवीत्।।[१९]

नाट्यशास्त्रीयपरम्परायां नाटके आरम्भो यत्नः प्राप्त्याशा नियताप्तिफलागमश्चेति पञ्चकार्यावस्थाः[२०] तथा चैतदनुश्रृत्यैव मुखं प्रतिमुखं गर्वो विमर्शो निर्वहणं चेति पञ्च सन्धयो[२१] भवन्ति। शंकरदेवस्य नाटकेषु रुक्मिणीहरण-पारिजातहरण-रामविजय-केलिगोपालेत्येतेषु चतुर्षु नाटकेषु पञ्चकार्यावस्थाः पञ्चसन्धयश्च अनुमातुं शक्यन्ते, यत एतेषु नाट्यकथा पूर्णतामाप्नोतीव लक्ष्यते।

संस्कृतनाट्यपरम्परायां नाट्यान्ते सर्वेषां मङ्गलकामनया नायकमुखात् भरतवाक्यपाठो भवति। अङ्कीयानाटकेष्वपि नाट्यान्ते सुत्रधारेण भरतवाक्यवत् मुक्तिमङ्गल-भटिमा गीयते। पत्नीप्रसादनाटकं विहाय सर्वेषु पञ्चनाटकेषु मुक्तिमङ्गलभटिमा (मङ्गल-स्तुतिः) विधीयते। यथा केलिगोपाले-

''सूत्रधार... तदनन्तर चपय छान्द मङ्गल बोल।

भटिमा।। मीनरूपे प्रलयपयसि सत्यव्रत यो तारिले।

कुरुमरूपे क्षीर सागर माथने यो धरिले।।

शुकररूपे हिरण्य विदारि देवभय कर त्राण।

सोहि हरि तेरि करतु नित्य मुकुति मङ्गल बिधान।।''[२२] इत्यादिः।

संस्कृतनाटकापेक्षया शंकरदेवस्य अङ्कीयानाटकेषु सुत्रधारस्य भूमिका अत्यन्तमहत्त्वपुर्णा दृश्यते। संस्कृतनाटकेषु सुत्रधारः नटी-विदुषकादिभिः सह संलापं कुर्वन् विविधकौशलेन नाटकीयपात्राणां प्रवेशं कारयति, अत्रैव चास्य कार्यभारः समाप्यते। अङ्कीयानाटकेषु पुनः एतद्वैलक्षण्येन नान्दीपाठादारभ्य अन्तिमे मुक्तिमङ्गलभटिमागानपर्यन्तं सुत्रधार एव मुख्यसञ्चालकरूपेण तिष्ठति। अत अङ्कीयानाटकेषु परमार्थत एव नाटकस्य सूत्रं तस्यैव हस्ते समर्पितं भवति। अन्यच्च, वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकरूपेण संस्कृतनाटकेषु यत् विष्कम्भक-प्रवेशकयोः विधानम्[२३] अस्ति, तत् सर्वमपि अङ्कीयानाटके सूत्रधारेणैव विधीयते। यथा रामविजयनाटके-

''सूत्रधारः- भोः भोः सभासद! साधुजन! ये जगतक परम ईश्वर नारायण भूमिक भार हरण निमित्त दशरथ गृहे अवतरल, सोहि भगवन्त श्रीरामरूपे ओहि सभामध्ये प्रवेश कयकहु। सीता विवाह

विहार नृत्य परम कौतुके करब, .......।'' [२४]।

संस्कृतालङ्कारशास्त्रप्रसिद्धेषु नवरसेषु श्रृङ्गारो वीरो वैव नाटकस्य अङ्गिरसो भवेत् तथा च अन्ये सर्वेऽपि रसाः अङ्गरसत्वेन स्युरिति यत् शास्त्रीयविधानमस्ति, [२५] तत्रापि शंकरदेव प्रणीतेषु नाटकेषु किञ्चित शैथिल्यं परिलक्ष्यते। यस्माद् वैष्णवधर्मप्रचारार्थं सामान्यजनानां मनस्सु भक्तिभावजागरणमेव महापुरुषशंकरदेवस्य नाट्यरचनायाः महदुद्देश्यमासीत्, अत अङ्कीयानाटकेषु यद्यपि श्रृङ्गारो वीरः करुणः रौद्रः हास्यः भरतसम्मतवात्सल्यश्च रसाः बहुत्रोपलभ्यन्ते, एते सर्वेऽपि रसाः अन्ततोगत्वा भगवद्विषयकरतिरूपं भावमेवाप्नुवन्ति। तत्र भावो नाम-

''सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते।।'' [२६]

असौ भगवद्विषयकरतिरूपो भाव एव परवर्तिकालिकैराचार्यैः भक्तिरसनाम्नाप्यभिधीयते।

संस्कृतनाट्यपरम्परायां वध-युध्द-मृत्यु-विवाह-भोजनादयः केचन वर्जनीयविषयाः सन्ति येषामभिनयेन प्रदर्शनं नाटके न स्यात्। यदुच्यते विश्वनाथेन-

''दुराह्वानं वधो युद्धं राज्यदेशदिविप्लवः।
विवाहो भोजनं शापोत्सर्गो मृत्यु रतं तथा।।...
चैभिर्वर्जितो।'' [२७] इति।

अङ्कीयानाटकेषु तु नियमस्यास्यापि अतिक्रमणं दृष्टिपथि आयाति। शंकरदेवस्य नाटकेषु भोजन-युध्द-मृत्यु- विवाहादिदृश्यानि सुलभान्येव वर्तन्ते। नाट्यरचनायाः परमुद्देश्यं पुरस्कृत्य तथा च समकालीनसाधारणदर्शकानां दृष्टिभङ्गिनम् अभिरुचिं च मनसि निधायैव शंकरदेवेन स्वनाटकेषु शैथिल्यमिदं साधितमिति वक्तुं युज्यते।

इत्थं महापुरुषशंकरदेवप्रणीतेषु नाटकेषु संस्कृतनाट्यपरम्परायाः प्रभावः स्पष्टं परिलक्ष्यते। मूलतः प्राचीनासमीयाभाषायां विरचितेषु सत्स्वपि नाटकेष्वेषु संस्कृतभाषायाः प्रयोगबाहुल्यं दृश्यते। एतद्व्यतिरिच्यापि शंकरदेवरचितनाटकेषु पूर्वरङ्गस्य विधानं, नान्दीपाठः, सूत्रधारस्य प्रयोगः, प्ररोचना, आमुखं, पञ्चसन्धयः, भरतवाक्यवत् मुक्तिमङ्गलभटिमागानमित्यादयो विषया एवं सन्ति यत्र नाट्यशास्त्रीयपरम्परा प्राय अक्षुण्णैव प्रतीयते। प्रत्युत, समग्र एव नाटके सुत्रधारस्योपस्थितिः तेनैव नाट्यसञ्चालनञ्च, भगवद्रतिविषयकभावरूपभक्तिरसस्याङ्गित्वं, वध-युद्ध-विवाह-मृत्वादिनां कतिपयानां वर्जनीयविषयाणां प्रदर्शनं चेत्येतेषु विषयेषु नाट्यशास्त्रीयपरम्पराया अतिक्रमणमपि दृष्टिपथि आयाति। नाट्यरचनायाः महदुद्देश्यं तात्कालिकसामान्यदर्शकानामभिरुचिञ्च सम्यग् विचार्य महापुरुषेण स्वनाटकेषु


ISSN : 2454-2881

शास्त्रीयपरम्परात इमानि परिवर्तनानि साधितानीत्यनुमीयते, येन एतेषामङ्कीयानाटकानां स्वकीयत्वं शंकरदेवस्य नाट्यकलाकौशलं चापि विस्पष्टं लक्ष्यते इति दिक्।

सन्दर्भसूत्राणि-


१. कालियदमन नाट, सं- ड॰ वसन्त कुमार भट्टाचार्य, पातनि. पृ. १७

२. श्रीशंकरदेवस्य कालिदमननाटकस्य प्रस्तावनायाम्

३. दैत्यारिठाकुरस्य गुरुचरिते (चरितपुथि)

४. द्विजरामानन्दस्य गुरुचरिते (चरितपुथि)

५. गोपालदेवस्य गुरुचरिते (चरितपुथि)

६. रामचरणठाकुरस्य गुरुचरिते (चरितपुथि)

७. साहित्यदर्पणः, ६.३

८. पञ्चपुष्प- पृ. ११७

९. नाट्यशास्त्रम्, ५.७

१०. तत्रैव, ८, ११

११. तत्रैव, २४, २५

१२. रुक्मिणीहरण नाट- आदौ नान्दीप्रसङ्गे

१३. साहित्यदर्पणः, ६.२७, २८,२९

१४. तत्रैव, २९

१५. कालिदमननाटकस्य नान्दीप्रसङ्गान्ते

१६. रामविजयनाटकस्य प्रस्तावनायाम्

१७. केलिगोपालनाटकस्य प्रस्तावनायाम्

१८. पारिजातहरणनाटके आदौ नान्दीप्रसङ्गे

१९ रामविजयनाट, ३०

२०. नाट्यशास्त्रम्, २१.८

२१. साहित्यदर्पणः, ६.७५

२२. केलिगोपाल नाट, १४६ (अन्तिमे)

२३. साहित्यदर्पणः, ६.५५, ५७

२४. रामविजयनाटकस्य प्रस्तावनायाम्

२५. साहित्यदर्पणः, ६.१०

२६. तत्रैव, ३.२६०, २६१

२७. तत्रैव, ६.१६, १७,१८

ग्रन्थपञ्जी -


- भरतमुनिप्रणीतं नाट्यशास्त्रम्, सं-पुष्पेन्द्र कुमार, २य सं., निउ भारतीय बुक कारपोरेशन, २०१०.
- महापुरुष श्रीश्रीशंकरदेवविरचित कालिय दमन नाट, सं. वसन्त कुमार भट्टाचार्य, ४र्थ सं., कितापघर, नलबारी २००४
- महापुरुष श्रीश्रीशंकरदेवर पारिजात हरण नाट, सं-सत्येन्द्रनाथ शर्मा, ३य सं., निउ बुक ष्टल, गुवाहाटी, २००२
- रुक्मिणीहरण नाट, सं-महिम बरा, २य सं., असम प्रकाशन परिषद, गुवाहाटी, २००३
- श्रीविश्वनाथकविराजप्रणीतः साहित्यदर्पणः, सं-सत्यव्रत सिंह, ९म. सं., चौखम्बा विद्याभवन, वाराणसी, १९९४
- असमीया नाट्य साहित्य, सत्येन्द्र नाथ शर्मा, ७म. सं., सौमार प्रकाशन, गुवाहाटी, १९९६
- गुरु-चरित-कथा, सं-ड° महेश्वर नेओग, २य सं., गुवाहाटी विश्वविद्यालय, २००३
- पञ्चपुष्प, तीर्थनाथ शर्मा, २य सं., निर्मला देवी, गुवाहाटी, १९८९
- शंङ्करदेवर नाट, सं-महिम बरा, ४र्थ सं., असम प्रकाशन परिषद, गुवाहाटी, २०१७




ISSN : 2454-2881

# आधुनिकविश्वे जनमानसनिर्माणे उपनिषदीयेन्द्रियज्ञानस्य प्रासङ्गिकता

ड॰ बिभूतिलोचनशर्मा

आधुनिकविश्वमिदं विविधै विज्ञानतत्वैरलंकृतमस्ति इति नेत्युक्तिः। भूभागादन्तरीक्षं प्रति अहर्निशं यानानि संप्रेष्य, उत्क्षिप्तोपग्रहमाध्यमेन (सेटेलाइट्-माध्यमेन) ब्रहमाण्डस्य रहस्याकुलितानां स्थानानाम्, उपग्रहाणां, महाशुन्यप्लवानां विशापाषाणखण्डानां अन्येषां च वस्तूनां चित्राणि स्वीकृत्य, 'एण्डरयड्' इत्यनेन साधनेन ब्रहमाण्डमिदं हस्तगतं जातमिति विचिन्त्य, निर्वाधराजमार्गे तीव्रगत्या यानानि सञ्चाल्य यावदेव विजयढक्कां वादयन्ति तथाकथित-आधुनिकजनाः, तावदेव भूभागे संघटितानाम् अन्यायानाचाराणां करणस्वरूपं विकृतजनमानसं प्रवर्धितमस्ति निरन्तरम्।

प्रतिदिनं हत्या-लुण्ठन-धर्षणादिभि विकृतमानसिकताभिः समाज आक्रान्तः, मानवसभ्यता भूलुण्ठिता, जनमानसिकता च रोगग्रष्टा। UNODC मतानुसारं प्रतिदिनं विश्वेऽस्मिन् व्यक्तिगतहिंसाकारणात् ६.२% जनानां हत्या भवति।[१] सा संक्षा भारतवर्षस्य ६.५% इति तदीयायाः संस्थाया एव प्रतिवेदने, यस्तु विश्वीय परिसंख्यातः अर्धांशप्रायः। प्रतिदिनं भारतवर्षे अष्टचत्वारिंशदधिकाष्टशतानां नारीणां लाञ्चनं धर्षणं हत्या च भवति इति राष्ट्रिय-अपराध-पञ्जीयण-संस्थायाः (National Crime Records Bureau) अभिमतम्।[२] प्रतिदिनं ९३ महिलानां धर्षणं भवति भारतवर्षे इति NCRB मतम् The Tiems of India पत्रेण प्रकाशितम्।[३] आधुनिकविज्ञानस्य युगेऽस्मिन् मानवीयप्रमुल्यबोधस्य क्षीयमाने क्षेत्रे अंकुरितस्य समाजस्य भविष्यचित्रम् भयानकमस्ति इति निदारुणं सत्यम् अंगीकृत्य समाजविज्ञानिनः सुस्थजनमानसनिर्माणस्य महत् संकल्पं स्वीकुर्युः।

प्रत्येकस्य अपराधस्य पूर्वम् अपराधीनां इन्द्रियदौर्वल्यं निर्मितं भवति तदीयपारिपार्श्विकावस्थायाः प्रभावत्। मनसो नियन्तणस्य अभाव एव सम्भावितस्य अपराधस्य वीजमिति उपनिषत्सु निहितानामिन्द्रियादिविषयानामध्ययनान् ज्ञायते। विशेषतः इन्द्रियाणां नियामकं मनः एव कार्यं कर्तुं प्रेरयति जनम्। गीतायां चोक्तं-

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान्विम्विमूढात्मा मिथ्याचार च उच्चते।।
यस्तिन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयेगमसक्तः स विशिष्यते।।[४]

अतः मनसा चिन्तितस्य विषयस्य उपभोगाय मनुष्या यत्नपराः सन्त अन्ततो गत्वा अकार्यमपि कर्तुं अग्रसरा भवन्ति। अस्मदालोचनात्प्राग् तर्हि इन्द्रियाणां मनसश्च स्वरूपविषये कोषादिग्रन्थे किमुक्तं तदालोच्यते।

पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि चत्वारि अन्तरिन्द्रियाणि इत्याहत्य चतुर्दशेन्द्रियाणि लभ्यन्ते। ''ज्ञानकर्मसाधनम्'' इतीन्द्रियविषये उक्तम् शब्दकल्पद्रुमे।[५] अन्तरिन्द्रियाणिचत्वारि- १ मनः २. बुद्धिः ३. अहंकारः ४. चित्तञ्च। इन्द्रियाणां नियामकरूपेण मनसः स्वरूपमुक्तं तत्रैव - ''मनस्तावदिन्द्रियाणां नियामकम्''[६] इति पञ्चमहाभूतेन सह मनुष्येन्द्रियाणां सम्बन्धमपि न्यायमते चेक्तं यथा-पृथिव्याः इन्द्रियं घ्राणं, जलस्य जिहवा, तेजसः चक्षुः, वायोस्त्वक् आकाशस्य च कर्णः। अतः पार्थिव जगतः तत्त्वेन सह जीवेन्द्रीयाणां प्राकृतिकसंयोगः अस्त्येव। इन्द्रियाणां अस्थिरत्वम् अश्वेन सह उपमीयते- ''इन्द्रियाणि हयानाहुर्मनः प्रग्रहमेव''[७]। इत्यत्र इन्द्रियाणां नियमनं मनः करोति अतः मनः प्रग्रहेण सह तुल्यते।

मनः- '' १. चित्तम, २. चेतः ३. हृदयम् ४. खान्तम् ५. हृत् ६. मानसम् इत्यमरः।७. ''मन्यते बुध्यतेऽनेनेति मनः''[९] इति मनसः लक्षणम् शब्दकल्पद्रुमे। ''मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः''[१०] अतः कस्यचिद्विषयस्य संकल्पने विकल्पस्य वा ग्रहणे मनसः प्राधान्यं वर्तते। इन्द्रियाणां मध्ये मनसः प्राधान्यं चेक्तं गीतायाम्- ''इन्द्रियाणां मनञ्चास्मि'' इति।'' धैर्योपपत्तिव्यक्तिञ्च विसर्गः कल्पना क्षमा। सदसच्चाश्रुता चैव मनसो नव वै गुणाः'' इतिमोक्षधर्मः[११] उपपत्तिः- ऊहापोहकौशलम्, संगति, निर्वृतिः, समाधानम्, सिद्धान्तः[१२] व्यक्तिः- स्मरणम्, विसर्गः- विपरीतसर्गो भ्रान्तिः, कल्पना-मनोरथवृत्तिः, सत्वैराज्ञादि, असत्रागद्वेषादि, आश्रुता-अस्थिरत्वम्[१३] ''मन एव मनुष्याणां कारणं बन्धमोक्षयोः। बन्धस्य विषयासङ्गिमुक्तेर्न्निषयंतथा।।'' इति विष्णुपुराणे षष्ठांशे सप्तमाध्याये। अतः मनसः प्राधान्यं सर्वशा स्वीक्रियते। विषयासक्तेभ्यः इन्द्रियेभ्यो मनसः श्रेष्ठत्वं मनसोऽपि बुद्धेः श्रेष्ठत्वं गीतायामुक्तं- इन्दियाणि पराण्याहु इन्द्रियेभ्यः परं मनः मनसस्तु परा बुद्धिः...''[१४]

इन्द्रियाणि स्वस्वभोग्यजातं लब्धुं सर्वथा इच्छन्ति। चक्षुः द्रष्टुं, कर्ण-श्रोतुं, नासिका घ्रातुं, जिहवा स्वादयितुं त्वक् स्प्रष्टुं च यतन्ते इति स्व स्व धर्मानुसारं विषयेषु आशक्तिरिन्द्रियाणाम्। किं


ISSN : 2454-2881

द्रष्टव्यं, किं श्रोतव्यं, किं घ्रातव्यं, किमास्वादनीयं, किं स्प्रष्टव्यं कदा किमर्थं कियद्वा तत्तद्विषयं भोक्तव्यमित्यत्र नास्ति कोऽपि विधिनिर्देश नास्ति च अतिशयभोगे स्वतस्फुर्त मानसिकं नियन्त्रणम्। विषयेषु अत्याशक्तिरेवपृथिव्याः समस्यानां कारणम्। सा आशक्तिः रावणाद् आरभ्य आधुनिकयुगस्य कस्यापि उद्योगपते अर्थप्रतिष्ठादिविषयाशक्तिपर्यन्तं विसृता इति तु बोधगम्यविषयः।

आधुनिकमेकम् उदाहरणं स्वीक्रियतां तावत् कस्यापि उद्योगपतेः सहस्रकोटिसम्पदाहरणाय किंचिदेकम् एण्ड्रयडसाधनं प्रकल्पितम्। तस्मिन् साधने स्वप्रयोजनसिद्धये जनानां रुच्यनुगुणं प्रोयजनानुगुणं सौविध्यं सन्निहितम्-नेत्रस्य कृते दृश्यभागं, कर्णस्य कृते श्रव्यभागं च विविधैः आयामैः सज्जीकृते। तत्र दृश्यभागे-विविधग्रन्थादारभ्य दूरदर्शन-युटुव-हवट्च-एप्-टुइतार्-फे चवुक-इत्यादयः हस्तामलकवत्प्रबन्धिताः। तत्वदेव श्रव्यभागे कर्णामृतवर्णिगीतमारभ्य समययापिनं कटुतिक्तमधुरादिरसभरितं शुल्कविहीनं वार्तालापव्यवस्थापनं च सम्पादितम्। एकस्मिन् पार्श्वे शतकोटिजनानाम् इन्द्रियसन्तोषणव्याजेन सम्पदाहरणम्, अपरस्मिन् साधनोपयोगेन स्वस्वप्रयोजनपूर्तये निमज्जनम्। अभावानुगुणं स्वभावानुगुणं च प्रयोजनानि सर्वेषाम्। कदाचित्प्रयोजनं स्वार्थसिद्धये निर्मितं कदाचित् परिवेशकारणाद् उद्धृतम्।

प्रत्येकस्य कार्यस्य सम्पादनात्प्राग् तस्य कार्यस्य पूर्वरूपचिन्तनं मस्तिस्के भवतीति विचारस्य पर्यालोचने अनेके आयामा दृग्गोचरा भवन्ति। तेषु आदिमं तु कार्यं करोमीति निश्चयः। कथं करोमि इति द्वितीयपर्याये मनुष्यस्य प्राक्तनसंस्काराः प्रकाशन्ते। कार्यसम्पादनसाधनानां प्रयोगकौशलं संस्कारानुगुणं जायते।

असंयतचित्तं संयतचित्तं चेति द्विधाविभक्तमनुष्याणां जीवनमपि शृङ्खलितं विशृङ्खलितं च जायते। अकुशलसारथे अधीनां दुष्टाः अश्वाः यथा इतस्ततः धावन्ति तथैव असंयतचित्तानां जनानां इन्द्रियाणि अनियन्त्रितानि भवन्ति, फलतः विविधेषु अविषयेषु गच्छन्ति। संयतचित्तानामेतद्वैपरित्यमिव जायते अर्थात् तस्येन्द्रियाणि वश्यानि भवन्ति। यथोक्तं कठोपनिषदि-

यस्त्व विज्ञानवान् भवत्ययुक्तेन मनसा सदा।
तस्येन्द्रिण्यवश्यानि दुष्टाश्चा इव सारथे।।
यस्तुविज्ञानवान् भवति युक्तेन मनसा सदा।
तस्येन्द्रियाणि वश्यानि सदश्चा इव सारथेः।।[१५]

अग्रहणीयविषात् निवृत्तिः ग्रहणीयविषयेषु च प्रवृत्तिः इन्द्रियजकर्मणां नियन्त्रणं मनोनिग्रहश्च कथं स्यादित्यादिविषयस्य शिक्षा उपनिषत्सु निहिता। तस्याः शिक्षायाः सुप्रयोगः परिवेशनिर्माणाय जनमानसनिर्माणाय बुद्धेः विकाशाय च कर्तुं शक्यते। तदर्थम् इन्द्रियविषयस्य मनोविषयस्य बुद्धिविषयस्य

करणीयकार्यविषयस्य अकरणीयकार्यविषयस्य च उपनिषदीयशिक्षा पाठशालातः उच्चशिक्षापर्यन्तं प्रदातव्या। तेन युवावस्थायां सुस्थजनमानसनिर्माणं भविष्यति समाजश्च उपनिषदीयशान्तिमन्त्रैव विद्वेषहीनं गुरुपरम्परावत् कर्णादयङ्गैः भद्रस्य प्राप्तिवत् निर्मितो भविष्यति।

**प्रसंगटिका:**

१. The global average murder rate stands at 6.2 per 100,000 population, but Southern Africa and Central America recorded more than four times that number (30 and 26 victims per 100,000 population respectively),http://www.unodc.org/unodc/index.html

२. 93 women are being raped in India every day, NCRB data show https://www.google.co.in/url?sa=t&rct=j&q=&esrc=s&source=web&cd=4&cad=rja&uact=8&ved=0ahUKEwj2k-_ntYvYAhVKXLwKHZftBCIQFghAMAM&url=http%3A%2F%2Ftimesofindia.indiatimes.com%2Findia%2F93-women-are-being-raped-in-India-every-day-NCRB-data-show%2Farticleshow%2F37566815.cms&usg=AOvVaw2YmlVEo_6-A1i19AFF9-Hl

३. 848 Indian Women Are Harassed, Raped, Killed Every Day
According to data from the National Crime Records Bureau—the government agency that keeps track of the country's crime rate—cases of violent abuse of women have steadily increased since 2009. By 2013, the number of such cases has increased by over 50 percent. That's over 848 women who are either harassed, raped or killed after abduction every single day. Some are sold off to traffickers
https://www.google.co.in/url?sa=t&rct=j&q=&esrc=s&source=web&cd=8&cad=rja&uact=8&ved=0ahUKEwj2k_ntYvYAhVKXLwKHZftBCIQFghcMAc&url=http%3A%2F%2Fwww.huffingtonpost.in%2F2014%2F12%2F16%2Fcrime-against-women-india_n_6330736.html&usg=AOvVaw07jc8_fcMrg5tQjyUKJEKp

४. श्रीमद् भगवद्गीता- ३.६-७

५. शब्दकल्पद्रुमः, प्र. ख., पृ. २१२

६. तत्रैव


ISSN : 2454-2881

७. तत्रैव

८. तत्रैव

९. शब्दकल्पद्रुमः; तृ.ख., पृ- ६०६

१०. तत्रैव

११. तत्रैव

१२. शब्दकल्पद्रुमः, प्र. ख., पृ. २५३

१३. शब्दकल्पद्रुमः, तृ.ख., पृ. ६०६

१४. श्रीमद्भगवद्गीता- ३.४२

१५. कठोपनिषद्- १.३.५-६, पृ. २०८-२०९

<u>जालपूटानि</u>

* http://www.unodc.org/unodc/index.html
* https://www.google.co.in/url?sa=t&rct=j&q=&esrc=s&source=web&cd=4&cad=rja&uact=8&ved=0ahUKEwj2k_ntYvYAhVKXLwKHZftBCIQFghAMAM&url=http%3A%2F%2Ftimesofindia.indiatimes.com%2Findia%2F93-women-are-being-raped-in-India-every-day-NCRB-data show%2Farticleshow%2F37566815.cms&usg=AOvVaw2YmlVEo_6-A1i19AFF9-Hl
* https://www.google.co.in/url?sa=t&rct=j&q=&esrc=s&source=web&cd=8&cad=rja&uact=8&ved=0ahUKEwj2k-_ntYvYAhVKXLwKHZftBCIQFghcMAc&url=http%3A%2F%2Fwww.huffingtonpost.in%2F2014%2F12%2F16%2Fcrime-against-women-india_n_6330736.html&usg=AOvVaw07jc8_fcMrg5tQjyUKJEKp

<u>ग्रन्थपञ्जी</u>


- उपनिषद्-अंक (तेईसवें वर्ष का विशेषांक); २०५८ संस्करण; गीताप्रेस गोरखपुर
- श्रीमभ्दगवद्गीता; स्वामी रामसुखदासः (सम्पा): गीताप्रेस गोरखपुर २०५९ संस्करणम्
- शब्दकल्पद्रुमः राजाराधाकान्तदेव कृत (प्र.ख); प्रो. वेम्पटि कुटुम्बशास्ती (प्रका); नाग पब्लिशर्स ११ ए/यु.ए. जवाहर नगर, दिल्ली तृतीयमुद्रणम् २००६
- शब्दकल्पद्रुमः राजाराधाकान्तदेव कृत (तृ.ख); प्रो. वेम्पटि कुटुम्बशास्त्री (प्रका); नाग पब्लिशर्स ११ ए/युए. जवाहर नगर, दिल्ली तृतीयमुद्रणम् २००६

# महाभारतोक्तदिशा करव्यवस्था

ड॰ पमी तालुकदारः

## भूमिका

भारतीयसाहित्येतिहासे व्यासकृतमहाभारतस्य स्थानमन्यतमम्। महाभारतं भारतीयसंस्कृतेः साहित्यस्य तथा च ज्ञानस्य कोश इति मन्यते। महाभारते एवं कथ्यते यत् धर्मार्थकाममोक्षादिचतुर्वर्गविषये यत् महाभारते अस्ति तदन्यत्रापि प्राप्यते। परन्तु यत् महाभारते नास्ति तत्तु न अन्यत्र उपलभ्यते। तद्यथा-

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।[१]

ग्रन्थेऽस्मिन् प्रायशः शतसहस्रश्लोकाः सन्ति। एते श्लोका अष्टादशपर्वेषु विभक्ताः सन्ति। तत्र पर्वाणि यथा- आदिपर्वम्, सभापर्वम्, वनपर्वम्, विराटपर्वम्, उद्योगपर्वम्, भीष्मपर्वम्, द्रोणपर्वम्, कर्णपर्वम्, शल्यपर्वम्, सौप्तिकपर्वम्, स्त्रीपर्वम्, शान्तिपर्वम्, अनुशासनपर्वम्, अश्वमेधिकपर्वम्, आश्रमवासिपर्वम्, मौषलपर्वम्, महाप्रास्थानिकपर्वम्, स्वर्गारोहणपर्वञ्च। स्वकीयमहत्वात् गुरुत्वाच्च ग्रन्थोऽयं महाभारतमिति कथ्यते।

महत्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम्।
महत्त्वाद् भारवत्त्वाच्च महाभारतमुच्यते।।[२]

किञ्च, अस्य आकारस्य विशालत्वात् तथा च वर्णनीयविषयाणां गुरुत्वात् कैश्चित् पण्डितैः महाभारतं पञ्चमवेद इत्यपि मन्यते। ग्रन्थेऽस्मिन् तत्कालीनसमाजे प्रचलितकरव्यवस्थाविषये अपि च कोशस्य बहूनां दिशां विषये विस्तरविवरणं प्राप्यते।

## कोशस्य प्रयोजनम्

राष्ट्रस्य उद्गत्यार्थं कोशस्य गुरुत्वमधिकमस्ति इत्यत्र नास्ति कोऽपि सन्देहः। यतो हि कोशेनैव राष्ट्रस्य सर्वाणि कार्याणि सुचारुतया परिचालितानि भवन्ति।[३] राष्ट्रस्य अन्तः बाह्यञ्च रक्षणं, सर्वासु दिक्षु


ISSN : 2454-2881

उन्नतिः वृद्धिश्च, राष्ट्रस्य सन्मानं सुखञ्च–एते सर्वे विषयाः अस्य अर्थव्यवस्थायाम् उपरि न्यस्ताः सन्ति। सैनिकानां सहयोगेन राजा स्वस्य राज्यम् अन्तः बाह्यञ्चेति सर्वाभ्यः विपद्भ्यः उद्धर्तुं शक्नोति। तथा च स्वार्थिकव्यवस्थया एव सैनिकानां पालनं कर्त्तुं शक्यते।[४] कौटिलीयार्थशास्त्रे[५] एवमुल्लिख्यते यत् कोशस्तु सैनिकादधिकं प्रयोजनम्। यतो हि कोशेनैव सैनिकानां परिपालनं भवति तथा च कोशाभावे सति सैनिकाः शत्रुपक्षं गत्वा स्वामिनमेव घ्नन्ति।

किञ्च, प्रजानां सामाजिक आर्थिकः धार्मिकश्चेति सर्वेषु विषयेषु उन्नतिः राष्ट्रस्य कोशेनैव विहिता भवति। अत एव कोश एव सर्वाणां समृद्धिनां मूलरूपेण तिष्ठति। राजानं प्रति प्रजानां सन्मानप्रदर्शनमपि कोशेनैव सम्भवति, यतो हि कोशं विना राजा प्रजाः सुष्ठु परिपालयितुं समर्थो न भवति। राज्ये भिन्नप्रकारस्य उपद्रवस्य सृष्टिर्भवति। तस्यामवस्थायां प्रजागणेन राजा सन्मानितो न भवति।[६] कदाचित् राजा केनचित् अन्यशक्तिशालिराज्ञा अपि अपमानितो जायते। तदा स राजा कोशस्य सहयोगेन स्वं तथा स्वस्य राज्यं रक्षयितुं सक्षमो भवति तथा च विपद्भ्यः मुक्तो भवति।[७] राष्ट्रस्य कल्याणार्थं यानि खलु धार्मिककार्याणि सम्पादितानि जायन्ते तानि सर्वाणि अपि कोशस्य सहायेनैव सम्भवति।[८]

अनेन राष्ट्रस्य रक्षणार्थं प्रजानां सुखार्थञ्च कोश एव मूलमिति कथितुं शक्यते। अत एव राज्ञा राष्ट्रस्य अर्थव्यवस्थायामधिकं गुरुत्वं प्रदातव्यम्।[९]

## करनिर्धारणम्

प्रजाः सर्वाभ्यः विपद्भ्यः रक्षणमेव राज्ञः प्रधानकर्त्तव्यम्। प्रजाः तेषां स्वकीयार्जनस्य एकमंशं कररूपेण राजानं प्रति प्रददति। महाभारते[१०] एवं प्राप्यते यत् प्रजानामर्जनस्य एकषष्ठांशं गृहीत्वा राजा तदंशं प्रजानां कल्याणकार्ये व्ययं कुर्यात्। अन्यथा, प्रजानां पापस्य एकचतुर्थांशं राजा प्राप्नोति। यः राजा प्रजाः न पालयति तथा च करस्य तदंशं स्वस्य सुखार्थं व्ययं करोति सः तु चौरः दस्युः वा इति मन्यते।[११] अतः राजा स्वस्य कर्त्तव्यात् विमुखो न भवेत्।

## करसंग्रहस्य नियमाः

महाभारते करसंग्रहस्य केचित् नियमाः निर्धारिताः सन्ति। यतो हि साधारणजनाः राष्ट्रस्य कोशार्थं दानं कुर्वन्ति। अतः ते अपि प्रतिदानरूपेण किञ्चिदुपकारम् अवश्यमेव लभेत। यथा सूर्यः तस्य किरणेन पृथिव्याः जलग्रहणं कृत्वा तज्जलं मनुष्याणां कल्याणार्थं वृष्टिरूपेण पुनः पृथिव्यामेव वर्षणं करोति

तथैव राजा अपि करसंग्रहपश्चात् तद्धनं प्रजानां मङ्गलार्थं व्ययं कुर्यात्। महाभारते[13] एवमपि उक्तं यत् राजा निर्धारितांश एव प्रजाभ्यः कररूपेण गृह्णीयात् तथा च स अंशः सर्वथा न्याय्यो भवेत् येन प्रजागणैः कष्टः न अनुभूयते। यदि करसंग्रहस्य परिमाणं यथायथं न भवति तर्हि प्रजाः अन्ये कस्मिंश्चित् राज्ये गन्तुं शक्नुवन्ति। तदा राष्ट्रस्य महती क्षतिर्भविष्यति। तस्मिन् समये राजा प्रजानां निन्दायाः पात्रमपि भवितुं शक्नोति। करसंग्रहकार्ये राजा कालः तथा स्थानञ्चेति विषयद्वयेऽपि गुरुत्वं दद्यात्। वणिकेभ्यः करसंग्रहे तेषां विक्रयः लाभः परिचारकस्य वेतनमित्यादिषु विषयेषु अपि विचारं कुर्यात्। तद्वत् शिल्पीनां विषये तेषां कार्यस्य सामग्री, तत्र प्रयुक्तोपादानानि, तेषु आरोप्यानि रूप्यकानि इत्यादिषु गुरुत्वं दद्यात्। एवं कृषकेभ्यः करसंग्रहविषये ते कृषकाः सन्तुष्टाः सन्ति न वा इति अवश्यमेव पश्येत्। कदाचित् विपद्काले करस्य मूल्यवर्धनमपि जायते। तस्मिन् समये तत् मूल्यं क्रमशः वर्धयेत् परन्तु शनैः शनैः तत् कर्तव्यम् तथा च अत्र मृदुपन्था एव गृह्णीयात्। महाभारतानुसारं विपत्तौ अपि ब्राह्मणेभ्यः करसंग्रहं न कुर्यात्। ब्राह्मणाः, तापसाः मन्दिराणि च करात् मुक्ताः स्युः।

<u>आर्थिकव्यवस्थायाः विपत्तौ करसंग्रहः</u>

आर्थिकविपत्तौ राजा कदाचित् प्रजाभ्यः ऋणमपि ग्रहीतुं शक्यते। राजा प्रजाः समीपं गत्वा राष्ट्रस्य आर्तः विवरणं दद्यात्। मृदुवचनेन सः प्रजाभ्यः ऋणग्रहणार्थं प्रार्थयेत्। परन्तु अर्थव्यवस्थायाः विनाशकाले करसंग्रहस्य नियमोल्लङ्घनेनापि राजा प्रजाभ्यः करसंग्रहं कर्तुं शक्नोति।

<u>आयस्य उपायाः</u>

राजस्य प्रयोजनवर्णनात् परम् अस्य वर्धनार्थं केचित् उपाया अत्र आलोच्यन्ते। महाभारते[13] आयस्य उपायरूपेण षड्भाग बलि-शुल्क-अर्थदण्डादीनामुल्लेखः प्राप्यते। राष्ट्रस्य कोशसंवर्धनार्थं राजा सर्वेषु उपायेषु आयवर्धनं कर्तुं शक्नोति। प्राचीनकालतः भारतीयार्थव्यवस्थायां कृषिकर्मणः महती भूमिका अस्ति। अत एव कृषिकार्यं तु आयस्य एक उत्कृष्टः साधनः। तत्र षड्भागः करस्यैव एकः प्रकारः यत् कृषकात् संग्रहं क्रियते। षड्भाग इत्यनेन एकषष्ठांशः बुध्यते। तस्मिन् समये कृषिक्षेत्रे उत्पादितस्य शस्यस्य एकषष्ठांशः कररूपेण कृषकेभ्य अगृह्णात। परन्तु कदाचित् सः भाग एकचतुर्थांशः कदाचित् एकदशांशोऽपि अभवत्। अत एवं वक्तुं शक्यते यत् भागस्य षड्भागस्य वा परिमाणं निश्चितं नासीत्, तत् कालानुसारं स्थानानुसारञ्च परिवर्तनमभवत्।

बलिः अपि कृषिकर्मणा सह सम्बद्धा करव्यवस्था परन्तु अस्य अर्थस्तु न स्पष्टः। शतपथब्राह्मणे

बलिशब्दः प्राप्यते। अत्र बलिशब्दस्यार्थ अर्पितभोजनम्। पाणिनिः[२७] तथा च मनुः[२८] बलिशब्दस्य उल्लेखमकुरुताम्। परन्तु तत्रापि अस्य अर्थः न स्पष्टः। महाभारतानुसारं[२९] ये खलु ब्राह्मणाः शास्त्रोक्तदिशा तेषां कर्त्तव्यानि न पालयन्ति तेभ्यः बलिमाध्यमेन करसंग्रहं कुर्यात्। अनेन प्रकारेण करसंग्रहे युधिष्ठिरस्य उल्लेखः महाभारते[३०] प्राप्यते। किञ्च, ग्रन्थेऽस्मिन् गावोऽपि आयस्य साधनरूपेण स्वीक्रियन्ते।[३१]

अर्थदण्डोऽपि[३२] आयस्य एकः साधनः। अपराधिजनात् अर्थदण्डग्रहणस्य व्यवस्था अपि तस्मिन् काले प्रचलिता आसीत्।

**व्ययस्य विषयाः**

महाभारते व्ययस्यापि केचन नियमा उल्लिखिताः सन्ति। उद्योगपर्वे[३३] राजा उशिनर ऋषिगालवं प्रति कथयति यत् तस्य धनं केवलं प्रजानां कल्याणार्थमेव अस्ति, न तु स्वकीयसुखभोगार्थम्। धनं तु न केवलं संग्रहणीयं गोपनीयं च, अपि तु सर्वदा सर्वथा प्रजाहिताय व्यवहर्तव्यम्।[३४] समुद्रस्य जलं यथा मेघेन सर्वासु दिक्षु विस्तारितं भवति, तद्वत् कोशस्य धनमपि प्रजानां सर्वतो प्रकारस्य उन्नत्यर्थं व्यवहर्तव्यम्।[३५]

महाभारतानुसारम् ३६ आयस्य एकचतुर्थांशः, अर्धांशः अथवा अधिकतमः त्रिचतुर्थांशः व्ययं कुर्यात्। गौतमधर्मसूत्रे[३७] तथा च रामायणे[३८] अपि व्ययस्य एवं प्रकारकं व्याख्यानमेव उपलभ्यते। आचार्यकौटिल्यानुसारमपि[३९] संगृहीतकरस्य एकचतुर्थांशः भिन्नकर्मिणः कृते राज्ञा व्ययं कर्तव्यम्। महाभारते[४०] प्राप्यते यत् यानि खलु कार्याणि तदानीमपि न सम्पादितानि तेषां कृते अपि च सम्पादितानां कार्याणां संरक्षणार्थं वर्धनार्थञ्च करस्य धनं व्यवहर्तव्यम्। एवं महाभारते करस्य सुप्रयोगविषये विस्तरेण प्राप्यते।

**करसंग्रहे नियुक्ताः जनाः**

ग्रामः नगरञ्चेति उभयतः करसंग्रहोऽभवत्। तत्र करसंग्रहादारभ्य अस्य रक्षणपर्यन्तम् अनेके जनाः राज्ञा नियुक्ता अभवन्। तत्र शुल्कोपजीविनः[४१] वणिकेभ्यः शिल्पीभ्यश्च करसंग्रहमकरोत्। किञ्च, धनस्य गणनार्थं तस्य लेखनार्थमपि बहवः जनाः नियुक्ता आसन्। आयव्यययोः लेखनकार्ये नियुक्तो जनः लेखक[४२] इति कथ्यते। तत्र गणनार्थं गणका[४३] अपि आसन्।

करसंग्रहः धनग्रहणेन तथा च शस्यग्रहणेनापि अभवत्। धनं तु कोशागारे[४४] संरक्षितमभवत्। तत्र केचित् जनाः कोशपालरूपेण[४५] नियुक्ता आसन्। अपि च राजकोशगोप्ताः[४६] कोशागारं चौरादिभ्यः मन्त्रिभ्यश्च रक्षयन्ति स्म। शस्यादिरूपः करः कौष्ठागारे संरक्षितोऽभवत्। साधुजनाः, विश्वस्ताः तथा च

योग्यपुरुषा: कोष्ठागारे राज्ञा नियुक्ता आसन्।[१७] महाभारतानुसारं[१८] राजा राजकोशगोप्तानामपि रक्षणस्य व्यवस्थां कुर्यात्, यतो हि कदाचित् दुष्टमन्त्रिण: ये खलु कोशस्य धनं चोरयन्ति तान् जनान् घ्नन्ति।

**उपसंहार:**

उपर्युक्तालोचनाया: महाभारतकालीनसमाजे प्रचलिताया: करव्यवस्थाया एकं सुस्पष्टं चित्रं प्रतिफलितं भवति। तस्मिन् काले करसंग्रहादारभ्य अस्य रक्षणं तथा च नियोगपर्यन्तम् एका अतीव सुव्यवस्था परिलक्षिता भवति। केषुचित् विषयेषु महाभारते उल्लिखितकरव्यस्थाया: कैश्चित् अन्यशास्त्रै: सह समता दृश्यते। तत्कालीनसमाजे प्रजानां कल्याणे राजा गुरुत्वम् अददात्। अत: सर्वे नियमा: प्रजाहिताय एव आसन्।

**पादटीका**

१. महाभारतम्, आदिपर्वम् ६२.५३
२. तदेव, १.२०८-२०९
३. तदेव, शान्तिपर्वम्, १५.४८
४. तदेव, १२८.३५
५. कौटिलीयार्थशास्त्रम्, ८.१.४७-४८
६. महाभारतम्, शान्तिपर्वम्, १२८.४९
७. तदेव, १३१.६
८. तदेव, १२८.४३; १२८.४९
९. तदेव, ८७.२०
१०. तदेव, ६९.२४; २५.१२
११. तदेव, १३७.९६-९७
१२. महाभारतम्, आरण्यकपर्वम्, ३४.६९
१३. तदेव, शान्तिपर्वम्, २८.५६
१४. तदेव, आरण्यकपर्वम्, १८८.६१-६२; शान्तिपर्वम्, ८८.१६-१७
१५. तदेव, शान्तिपर्वम्, ८९.११
१६. तदेव, ८८.१२


ISSN : 2454-2881

१७. तदेव, ९०.२३-२५

१८. तदेव, ८९.७-८

१९. तदेव, ७२.२१-२३

२०. तदेव, ८८.२४

२१. तदेव, ८८.२५-२९

२२. तदेव, १२८.१३-१४

२३. तदेव, ७२.१०

२४. तदेव, १६४.१२

२५. तदेव, २५.१२; ७२.१०

२६. शतपथब्राह्मणम्, २.३.१.११

२७. अष्टाध्यायी, ८.१.३६

२८. मनुसंहिता, ३.१०८, २६५

२९. महाभारतम्, शान्तिपर्वम्, ७७.७

३०. तदेव, सभापर्वम्, ३०.२

३१. तदेव, शान्तिपर्वम्, ६७.२३

३२. तदेव, ७२.१०

३३. तदेव, उद्योगपर्वम्, ११६.१३

३४. तदेव, सभापर्वम्, ५.१०१; आरण्यकपर्वम्, २४३.४४

३५. तदेव, शान्तिपर्वम्, २.३२

३६. तदेव, सभापर्वम्, ५.६०

३७. गौतमधर्मसूत्राणि, १०.३०

३८. वाल्मीकिरामायणम्, अयोध्याकाण्डम्, १००.५४

३९. कौटिलीयार्थशास्त्रम्, २.६; ५.३

४०. महाभारतम्, शान्तिपर्वम्, ५९.५७-५८

४१. तदेव, सभापर्वम्, ५.१०३

४२. तदेव, ५.६२

४३. तदेव

७८. तदेव, ६.५७

८०. तदेव, आश्रमपर्वम, २९.२१

८१. तदेव, शान्तिपर्वम, ८३.२-४

८३. तदेव, ११९.१३

८४. तदेव, ८३.५८

**सहायकग्रन्था :**


१. महाभारतम्, नीलकण्ठकृतभाष्यसहितम्, भाग: १-८, नाग पब्लिशर्स, देहली, १९८८
२. कौटिलीयार्थशास्त्रम्, श्रीमूलकृतभाष्यसहितम्, सम्पादक:- टि गणपतिशास्त्री, अनुवादक:- एन.पि.उन्नि, भाग १,२ अधिकरण, निउ भारतीय बुक करपोरेशन, देहली, २००६
३. शतपथब्राह्मणम्, सायणाचार्य-हरिस्वामीकृतभाष्यसहितम्, सम्पादक:-एस्. शर्मा, भाग: १-५, नाग पब्लिशर्स, देहली, १९९८
४. गौतमधर्मसूत्राणि, हरदत्तकृतभाष्यसहितम्, सम्पादक:- उ.सि. पाण्डेय, चौखम्बासंस्कृत संस्थान, वाराणसी, २०००
५. मनुसंहिता, कुल्लूकाभट्टकृतमन्वर्थ-मुक्तावलीभाष्यसहिता, सम्पादक:- जे.एल.शास्त्री, एम.एल.बि.डि., देहली, १९८३
६. अष्टाध्यायी, सम्पादक:- एस. सि.वासु, एम.एल.बि.डि., देहली १९६२
७. रामायणम्, बालकाण्डम्, सम्पादक:- जि. एइच.भट्ट, ओरियेन्टेल इन्स्टिटिउट, बरोदा, १९६०



ISSN : 2454-2881

# अर्वाचीनसंस्कृतदूतकाव्यपरम्परा

डॉ॰ छबिलाल उपाध्यायः

**भूमिका**

शब्दकोशानुसारं शब्दार्थयोः प्रतिस्पर्धीभाव एव साहित्यम्। सहितस्य भावः साहित्यम् [१]। प्रस्तुतप्रसंगे साहित्यं गद्य-पद्यात्मककाव्यविधानां वाचकोऽस्ति। शब्दकल्पद्रुमेऽपि अयमेवार्थः प्रतिपादितः [२]। तन्मते साहित्यशब्दः 'सहित' पदे 'ष्यञ्' प्रत्यययोगात् निष्पद्यते। सहितयोः शब्दार्थयोः भावः साहित्यम्। वैदिकसाहित्यात् परं लौकिकसाहित्ये गद्य-पद्य-चम्पू-स्तोत्र-कथादिविधासु संस्कृतज्ञैः साहित्यरचना प्रारब्धा। प्राचीनसाहित्यकारात् प्रेरिताः सन्तः आधुनिकसाहित्यिकैरपि संस्कृतं प्रति स्वलेखाः प्रवर्त्यन्ते। यस्मात् लौकिकसाहित्यस्यापि धाराद्वयं जातं प्राचीनधारा आधुनिकधारा चेति।

साहित्ये कालस्य पूर्णरूपेण खण्डशः विभाजनं दूष्करकार्यम्। कश्चिद् युगविशेषो युगान्तरात् कदा कथं च पार्थक्यम् अभजत् इति तथ्यं स्पष्टतया निर्णेतुं न शक्यते। प्राचीनयुगस्य प्रवृत्तयो नवयुगस्य प्रवृत्तिभिः सह बहुकालपर्यन्तं समानान्तरगत्या प्रचलन्ति। प्राचीनकालः स्वप्रवृत्तिभिः सह कदा अस्तं गतः, कदा च नवजागरणस्य चेतना उदभवत् इति तथ्यस्य निर्धारणे काठिन्यं भजते। अतः पारम्परिकसांस्कृतिकमूल्यानां समन्वयेन सह वर्तमानयुगबोधस्य स्वीकरणुचितम्।

आधुनिकसंस्कृतसाहित्यस्य प्रारम्भकालविषये विद्वत्सु वैमत्यमस्ति। डा० श्रीधरभास्करवर्णेकरेण अर्वाचीनसंस्कृतसाहित्याख्ये ग्रन्थे सप्तदशशताब्दी अर्वाचीनसंस्कृतसाहित्यस्य पूर्वसीमा मता। डा० हरिनारायणादीक्षितः 'संस्कृतसाहित्य में राष्ट्रियभावना नामके ग्रन्थे अर्वाचीनसंस्कृतसाहित्ये शिवराजविजयस्य (१८८०-१८९३ ई०) प्रथमत्वेन गणनां कृतवान्। कलानाथशास्त्री संस्कृतसाहित्येतिहासे विद्योदयपत्रिकायाः प्रकाशनारम्भात् (१८७३ ई०) आधुनिककालस्य प्रवर्तनं स्वीकरोति। डा० हीरालालशुक्लः 'आधुनिकसंस्कृतसाहित्य' इति ग्रन्थे १७८४ ई० संस्कृतसाहित्यस्य नवजागरणकालो मनुते [३]। अस्य आधारेण विपश्चितैः अष्टादशशताब्दीतः पूर्वसाहित्यं प्राचीनसाहित्यं तथा अष्टादशशताब्दीतः उत्तरवर्तिसाहित्यम् अर्वाचीनसाहित्यमिति स्वीकृतम् [४]। यतो हि अष्टदशशताब्दौ

एव संस्कृतसाहित्ये अभिनवप्रवृत्तीनां श्रीगणेशो भवति। संस्कृतकाव्येषु शैलीगतपरिवर्तनं तथा नवविधानामुदयश्च जातः।

**दूतकाव्यस्य स्वरूपम्**

गद्य-पद्य-चम्पू-नाटकादिप्रभृति समस्तरचनावली काव्यसंज्ञाऽभिधीयते। शब्दार्थशरीरमयं काव्यं दृश्य-श्रव्यभेदेन द्विविधम् [५]। श्रव्यकाव्यं गद्य-पद्य-मिश्रत्वेन त्रिधा विभक्तुं शक्यते [६]। पद्यं पुनः मुक्तक-युग्मक-सान्दानितक-कलापक-कुलक-भेदेन पञ्चधा विभक्तम् [७]। पद्यकाव्यम् आकार-प्रकृति-दृष्ट्या महाकाव्य-खण्डकाव्यादिभेदेन पुनश्च भागद्वये विभज्यते।

संस्कृतस्य दूतकाव्यानि खण्डकाव्यन्तर्गतान्येव। दर्पणकारेण विश्वनाथकविराजेन खण्डकाव्यं महाकाव्यस्य कियदंशमनुसरति इत्युदित्वा खण्डकाव्यस्य लक्षणं प्रदत्तमस्ति [८]। कविचिन्तामणि इत्याख्ये ग्रन्थे गोपीनाथकविभुषणेन खण्डकाव्यस्य एवं लक्षणं प्रदत्तम् अस्ति-

सर्गबन्धविहीनं शुन्यं चन्द्रादिवर्णनैः।
श्लोकसंख्यात्मकं यत्तत् खण्डकाव्यमिति स्मृतम् [९]।।

काव्यमर्मज्ञैः खण्डकाव्यस्यापि मुक्तकं प्रबन्धात्मकञ्चेति द्विधा विभक्तमस्ति [१०]। प्रबन्धात्मककाव्ये आदितोऽन्तं यावदेकं विषयप्रवाहं वर्णयति कविः। यथा-मेघदूतादीनि। मुक्तककाव्ये तु एकविषयप्रवाहो न भुत्वा विविधाः विषयाः वर्ण्यन्ते। यथा-ऋतुसंहार-नीतिशतकादीनि। दूतकाव्यानि प्रबन्धकाव्यान्तर्गतानि खण्डकाव्यानि भवन्ति। यतो हि तत्र आदितऽन्तं यावदेको विषय-प्रवाहो वर्ण्यते। एतानि प्रबन्धात्मकखण्डकाव्यानि गीतिकाव्यनाम्नाऽपि अभिधीयन्ते।

'स्यात् सन्देशहरो दूतः' इति अमरकोषः। तत्र 'क्त' धातुना सह 'दू' प्रत्यययोगेन दूतशब्दो निष्पन्नो भवति। वार्तावहनादिना यः कष्टमाप्नोति तं दूतमिति कथ्यते [११]। अर्थशास्त्रादिषु प्राचीनराजधर्मविषयकग्रन्थेषु राज्ञो दूतस्य लक्षणानि बहुधा विवेचितानि। तत्र दूतगुणोपेता सजीवाः मनुष्या एव दूतत्वेन प्रेष्यन्ते स्म। परन्तु दूतकाव्येषु कविभिः स्वरूच्यनुसारेण चेतनाचेतनपदार्थेषु दौत्याचरणाय नियुज्यन्ते। तेषु दूतेषु मेघ-चन्द्र-मन-शील-चेतस्-तुलसी-भक्ति-तमसा-स्वप्न-पदाङ्क-वार्ता-चित्तादिभिः अचेतनैः तथा मनुष्य-हंस-शुक-पिक-मयूर-चातक-चकोर-भ्रमर-शुनक-सारिकादिचेतनमनुष्यपशुपक्षिणां माध्यमेन दौत्यं सम्पद्यते। दूतं तथा च दूतेन हार्यं वार्तां सन्देशं वा अधिकृत्य कृतं काव्यमेव दूतकाव्यं सन्देशकाव्यं वेति कथ्यते।

**दूतकाव्यानामुद्भवः**

दूतकाव्यानां गौरवशालीपरम्परायाः श्रेयः कालिदासमेव जायते। यतो हि कविकालिदासस्य


ISSN : 2454-2881

मेघदूतमिति परवर्तिदूतकाव्यकाराणां कृते एकानुकरणीया कृतिः। दूतकाव्यानां पृष्ठभूमौ ऋग्वेद [१२] श्रीमद्भागवतपुराण [१३] –रामायण–महाभारत [१४] –जातक [१५] –साहित्यादिषु दूतप्रेषणस्य या विविधता प्राप्यते, तामेवादिकालरूपेण स्वीकरणीयं भवति।

**दूतकाव्यानां प्रतिपाद्यविषयाः**

सन्देशपरकखण्डकाव्यपरम्परायां विप्रलम्भशृंगारस्याश्रये आदौ विरही–विरहिणिना कस्यापि माध्यमविशेषेण प्रेषितं सन्देशमेव दूतकाव्यानां प्रतिपाद्यविषय आसीत्। परवर्तिनि काले दूतकाव्यानां लोकप्रियतामवलोक्य जनानाकर्षयितुं विविधैः जैनादिधर्ममौलवादिभिरपि एषः पन्था अनुसृतोऽभूत्। स्वीयमतानां वादानाञ्च प्रसाराय ते दूतकाव्यमेव माध्यमत्वेन व्यवहृतवन्तः। फलतः कालक्रमेण दूतकाव्यानां विषयाः व्यापकतामधिगताः विरह–धर्म–दर्शनादिभिः सह इतिहासोऽपि दूतकाव्यानां वर्ण्यविषयाः सञ्जाताः।

**प्राचीनसंस्कृतदूतकाव्यानि :**

कालिदासस्य मेघदूतानन्तरं संस्कृते बहूनि दूतकाव्यानि विरचितानि अभवन्। तेषु घटकर्परकवेः घटकर्परकाव्यम्, आचार्यजीनसेनस्य पार्श्वाभ्युदयकाव्यं, जम्बुकवेः चन्द्रदूतकाव्यं, धोयीकवेः पवनदूतकाव्यं, वीरेश्वरकवेः वाङ्मण्डनगुणदूतकाव्यं, विनयप्रभनामजैनकवेः चन्द्रदूतं, पूर्णसरस्वतीकवेः हंससन्देशकाव्यम्, आचार्यवेङ्कटनाथस्य हंससन्देशकाव्यं, लक्ष्मीदासस्य शुकसन्देशकाव्यं, विक्रमकवेः नेमिदूतम्, अवधुतरामयोगिनः सिद्धदूतं, मेरुतुङ्गकवेः जैनमेघदूतं, चरित्रसुन्दरगणिनामकवेः शीलदूतं, वासुदेवकवेः भृङ्गसन्देशकाव्यम्, उद्दण्डकवेः कोकिलसन्देशकाव्यं, वामनभट्टबाणकवेः हंसदूतं, कविविष्णुदासस्य मनोदूतं, श्रीरामद्विजस्य मनोदूतम्, उदयकवेः मयूरसन्देशकाव्यं, विष्णुत्रातनामककवेः कोकसन्देशकाव्यं, कविमातृदत्तस्य कामसन्देशकाव्यं, रूपगोस्वामिनः उद्धवसन्देशकाव्यं हंसदूतञ्च, गंगानन्दकवेः भृङ्गदूतं, रघुनाथदासस्य हंसदूतं, कविरामगोपालस्य कीरदूतं, वादिचन्द्रसूरिकवेः पवनदूतं, विनयविजयगणिकवेः इन्दुदूतं, मेघविजयकवेः मेघदूतसमस्यालेखकाव्यं, कृष्णदेवशतवधानीकवेः भृङ्गदूतं, रूद्रन्यायपञ्चाननस्य भ्रमरदूतं पिकदूतञ्च, कृष्णचन्दनकवेः अब्ददूतं, कृष्णसार्वभौमकवेः पदाङ्कदूतं, पुन्नशेरिश्रीधरनम्बिकवेः नीलकण्ठसन्देशकाव्यं, वैद्यनाथद्विजस्य तुलसीदूतं, नम्बुदरीकवेः चातकसन्देशकाव्यं, वसुप्रहराजस्य हंसदूतं, त्रिलोचनकवेः तुलसीदूतं, केरलीय कुट्टमत्कुञ्जुन्नीकुरुप्पस्य कपोतसन्देशकाव्यं, कवयित्रीत्रिवेण्याः शुकसन्देशकाव्यं भृङ्गसन्देशकाव्यञ्च, सिद्धनाथविप्रस्य पद्मदूतं, कृष्णब्रह्मतन्त्रपरकालस्वामिनः हंससन्देशकाव्यं, चेति प्राचीनकालिकदूतकाव्यानीति परिगणना कृताऽस्ति।

**आधुनिकसंस्कृतदूतकाव्यानि–**

मया पूर्वमेव प्रोक्तं यत् विद्वद्भिः अष्टादशशतकीयस्य तदुत्तरवर्तिनः साहित्यस्य अर्वाचीनसाहित्ये गणना क्रियते इति। आधुनिककविभिः रचितानि दूतकाव्यानि इह वर्तन्ते-

**मूरियतनारायणनम्बीशविरचितम् इन्दुसन्देशकाव्यम्-**

अष्टादशशतकीय-आधुनिककवेः इन्दुसन्देशकाव्ये कविना चन्द्रं दूतत्वेन नियोज्य स्वपत्नीं प्रति सन्देशं प्रेषयति। अस्य कवेः अपरं सन्देशकाव्यमस्ति हंससन्देशकाव्यम्। उभयोः काव्ययोः कवेः रचनारीतौ प्रौढता प्रतिपन्ना भवति।

**व्रजनाथतैलङ्गस्य मनोदूतम्-**

ईशवीयेऽष्टादशशतके महाभारताधारेण [१६] शिखरिणीछन्दसा विरचिते काव्येऽस्मिन् द्रौपद्याः वस्त्रहरणावसरे द्रौपदी कमपि अपरं दूतं नासाद्य स्वस्याः मन एव दूतरूपेण नियोज्य श्रीकृष्णं प्रति सन्देशं प्रेषयति। काव्येऽत्र २०२ संख्यकाः श्लोकाः सन्ति।

**वीरराघवाचार्यस्य मानससन्देशकाव्यम् ( १८५१ ई० तः १९२० ई० )**

आन्ध्रीयकविराघवाचार्यस्य मानससन्देशकाव्ये भगवत्सकाशं योगजडभरतद्वारा मनसं दूतं कृत्वा प्रेषयति। भक्तिमार्गस्य तत्सान्धनस्य च प्रतिपादनमेव काव्यस्य मूलविषयोऽस्ति।

**रामचन्द्रकवेः घनवृतकाव्यम्-**

आन्ध्रप्रदेशे गोदावरीतटवर्तिग्रामे लब्धजन्मनः रामचन्द्रकवेः स्थितिकालः नवदशशताब्दीति मन्यते। घनवृतकाव्यं कालिदासकृतमेघदूतस्य उत्तराख्यानमस्ति। काव्येऽस्मिन् कविः मेघदूतस्य उत्तरकथा वर्णयितुमभिलषते।

**पवनसन्देशकाव्यम् ( चिरतयत्तरामवर्म-कुंजुन्निवर्यस्य, १८६१-१९४३ ई० )**

काव्यमिदं पूर्वभागः उत्तरभागः इति भागद्वये विभक्तमस्ति। काव्येऽस्मिन् नायकः रामः लंकास्थां विरहिणीं सीतां प्रति पवनमाध्यमेन स्वसन्देशं प्रेषयति।

**शुकदूतम् ( हरचन्द्रकाव्यतीर्थस्य, १७८४ शकाब्दः, १८६२ ई० )**

वाणभट्टस्य कादम्वरीतः चन्द्रापीडस्य विरहव्यथां परिकल्प्य कविना दूतकाव्यमिदं प्रणीतम्। पूर्वोत्तरभागेन विभक्ते शुकदूतकाव्ये पूर्वभागे मन्दाक्रान्ताछन्दसि रचिताः ७१ संख्यकाः श्लोकाः उत्तरभागे च शार्दुलविक्रीडितछन्दसि रचिताः ६१ संख्यकाः श्लोकाः सन्ति। रचनाशैलीदृष्ट्या काव्यमिदं मेघदूतेन सह साम्यत्वं भजते।

**कृष्णतर्कालंकारस्य चन्द्रदूतम्-**

अष्टादशशतकस्य तृतीयचरणे जन्मलब्धस्यास्य कवेः चन्द्रदूतकाव्ये हनुमता प्राप्तं सन्देशं श्रुत्वा


ISSN : 2454-2881

रामचन्द्रः लंकास्थितां सीतां प्रति चन्द्रं दूतत्वेन नियोज्य सन्देशं प्रेषयति। काव्येऽस्मिन् ११२ पद्यानि वर्तन्ते।

**जी. वी. पद्मनाभाचार्यस्य 'पवनदूतम्' ( १८७०-१९१९ ई० )**

तमिलनाडुप्रान्तस्य श्रीरङ्गमितिस्थले लब्धजन्मनः कवेरस्य पवनदूतकाव्यं रामकथाऽधारितमस्ति, यस्मिन् सन्देशवाहकः पवनोऽस्ति।

**अलितानाथन्यायरत्नस्य बकदूतम् ( १८७० ई० )**

बङ्गप्रदेशस्य नवद्वीपे लब्धजन्मा कवि अलितानाथन्यायरत्नः बकदूतेऽस्मिन् समाजे व्याप्तां दूर्नीतिं उद्घाटयति।

**मूरियतनारायणनम्बीशकवेः हंससन्देशकाव्यम् इन्दुसन्देशकाव्यञ्च-**

अष्टादशांगलाब्दस्य तृतीयचरणे केरलप्रान्तस्य 'चित्तुर' इति स्थले लब्धजन्मना कविनम्बीशेन हंससन्देशकाव्यम् इन्दुसन्देशकाव्यम् इति दूतकाव्यद्वयं रचितम्। तत्र हंससन्देशकाव्ये स्वर्गस्थकालिदासः केरलस्य चित्तुरस्थस्य संस्कृतवेदपाठशालायाः गीर्वाणीं प्रति हंसमाध्यमेन सन्देशं प्रेषयति।

इन्दुसन्देशकाव्ये कविना चन्द्रं दूतत्वेन चित्वा स्वपत्नीं प्रति सन्देशं प्रेषयति। उभयोः काव्ययोः कविनम्बीशस्य रचनारीतौ प्रौढता प्रतिपन्ना भवति।

**कुडंगल्लुरकुञ्जनि तम्बुरान्कवेः विप्रसन्देशकाव्यम्-**

कविकुञ्जुनिवर्यस्य विप्रसन्देशे ब्राह्मणसन्देशवाहकोऽस्ति। शुक-कोकिलवत् डयने अक्षमविप्रः रेलयानेन स्वयात्रां करोति। काव्यमिदं १९१९ तमाङ्गलाब्दे प्राकाश्यमागतम्।

**रङ्गाचारीकवेः पिकसन्देशकाव्यम् ( १८७५ ई० )**

केरलीयकविरङ्गाचारिणः पिकसन्देशकाव्यं १९०५ ईशवीये 'मङ्गलोदय' नाम पत्रिकायां प्रकाश्यते। काव्येऽस्मिन् कविना पिकं सन्देशवाहकत्वेन चित्वा केरलप्रदेशस्य करिपतिपुरम् इति स्थलं प्रति प्रेषयति।

**चिन्तामणिशर्मणः काकदूतकाव्यम् ( १८७८ ई० )**

मैसूरप्रान्तीयचिन्तामणिशर्मणा काकदूतमिति काव्यस्य रचनया दूतकाव्यपरम्परायां व्यङ्ग्यभावमुपस्थापयितुं प्रयतते। मन्दाक्रान्तावृत्ते रचिते काव्येऽस्मिन् अपराधवशतः कारावन्दी कश्चित् दूराचारी मद्यपायी काकं दूतं नियोज्य स्वपितरं प्रति सन्देशं प्रेषयति। काव्येऽस्मिन् मेघदूतस्य समाना श्लोकसंख्या, मन्दाक्रान्तावृत्तस्य प्रयोगः, पूर्वोत्तररूपेण भागद्वयं, प्रवासवर्णनञ्च अस्ति। सन्देशकथनमपि मेघदूतमिव वर्तते।

**वीरवल्ली विजयराघवाचार्यस्य सुरभिसन्देशकाव्यम् ( १८८४ ई० )**

काञ्चीसमीपे मरुपूरमिति स्थले लब्धजन्मनः कवेरस्य सुरभिसन्देशकाव्ये आधुनिकनगराणां सम्यक्वर्णनं प्राप्यते।

**कविहरिदासस्य कोकिलदूतकाव्यम् ( १७७७ शकाब्दः )**

अष्टादशांगलाब्दस्य बङ्गीयकवेः हरिदासस्य कोकिलदूतकाव्ये १०३ संख्यकाः श्लोकाः विद्यन्ते। कृष्णकथाश्रितकाव्येऽस्मिन् कविः कृष्णं प्रति कोकिलमाध्यमेन सन्देशं प्रेषयति।

**प्रमथनाथतर्कभूषणस्य कोकिलदूतकाव्यम् ( १८६६ ई० )**

१८६६ ईशवीये बंगप्रान्तस्य भाटपाडाग्रामे लब्धजन्मनः कविप्रमथनाथस्य कोकिलदूतकाव्ये काचित् वङ्गीययुवती वसन्तकाले कोकिलस्य कलरवं श्रुत्वा तमेव दूतरूपेण चित्वा पतिसकाशं प्रेषयति। काव्येऽस्मिन् १०६ पद्यानि विद्यन्ते यत्र कविना विप्रलम्भश्रृंगारस्य हृदयग्राहीचित्रणं कृतमस्ति।

**गौरगोपालशिरोमणिकृतं काकदूतकाव्यम् ( १८११ शकाब्दः )**

गोपालशिरोमणिकृते काकदूते विरहिणीराधा काकं दूतं निर्मीय मथुरास्थं कृष्णं प्रति प्रेषयति। काव्येऽस्मिन् विविधछन्दसां प्रयोगो दृश्यते।

**जीवन्यायतीर्थस्य द्विजदूतकाव्यम् ( १८१४ शकाब्दः )**

१८९२ ईशवीये वर्षे बंगप्रान्तस्य भाटपाडेतिस्थाने लब्धजन्मनो महामहोपाध्यायमहाकविजीवन्यायतीर्थस्य द्विजदूतकाव्ये रूक्मिणी कञ्चिदेकं ब्राह्मणं दूतत्वेन विनियुज्य कृष्णसकाशं प्रेषयति। काव्यस्यास्य शैली मेघदूतमिव वर्तते।

**बटुकनाथशर्मणः बल्लवदूतकाव्यम् ( १८९५-१९४४ ई० )**

वाराणस्यां लब्धजन्मवटुकनाथशर्मणः बल्लवदूतमिदं विनोदमूलकदूतकाव्यान्तर्गतमायाति। हास्यरसप्रधानकाव्येऽस्मिन् कविना बल्लवं गोपालकं वा दूतत्वेन नियुज्य सन्देशं प्रेषयति।

**महालिंगशास्त्रिणः भ्रमरसन्देशकाव्यम् ( १८९७-१९६५ ई० )**

महालिंगशास्त्रिविरचिते ११० पद्यात्मके भ्रमरसन्देशकाव्ये वृत्रासुरवधजनितब्रह्महत्यापापात् भीतः सन्तः इन्द्रः पृथिवीमागत्य पद्मपत्रे आत्मानं रक्षति। तदानीं सः भ्रमरं दूतं कृत्वा पत्नीशचीं प्रति सान्त्वनासन्देशं प्रेषयति।

**माधवकवीन्द्रकृतम् उद्धवदूतकाव्यम्-**

नवदशशताब्दस्य बङ्गीयकविमाधवकवीन्द्रेण विरचिते उद्धवदूतकाव्ये १४१ पद्यानि सन्ति। भागवतपुराणस्य दशमस्कन्धस्य सप्तचत्वारिंशदध्यायात् कथावस्तु स्वीकृत्य काव्यमिदं मन्दाक्रान्ताछन्दसि


ISSN : 2454-2881

विरचितमस्ति, केवलमन्तिमश्लोक एव अनुष्टुपछन्दसा रच्यते।

**पण्डितगोपेन्द्रनाथगोस्वामिनः पादपदूतकाव्यम्-**

नवदशशताब्दकालीनस्य नवद्वीपवासिनः गोपेन्द्रनाथगोस्वामिनः पादपदूतकाव्ये महाप्रभुचैतन्यस्य पत्नी विष्णुप्रिया स्वगृहपरिसरे स्थितं निम्बवृक्षं दूतत्वेन नियुज्य नीलशैलस्थाय महाप्रभवे सन्देशं प्रेरयति। काव्यमिदं कृष्णभक्तिपरकमस्ति।

**राजवल्लभमिश्रस्य उद्धवदूतकाव्यम् ( १८८९ विक्रमाब्दः )**

पञ्चाशीतिपद्ययुक्ते राजवल्लभमिश्रकृते उद्धवदूतकाव्ये कविना वृन्दावनस्थानां विरहिणीव्रजवनितानां मनोदशा वर्णिताऽस्ति। अस्य त्र्याशीतिपद्यानि शिखरिणीछन्दसि विरचितानि सन्ति। अन्तिमश्लोकद्वये अनुष्टुप्छन्दसः प्रयोगो वर्तते।

**त्रैलोक्यमोहनगुहस्य मेघदौत्यम् ( १८७० ई० )-**

बङ्गीयकवेः त्रैलोक्यमोहनगुहस्य मेघदौत्यमिति काव्यं मेघदूतस्य प्रत्युत्तरकाव्यमस्ति। काव्ये यक्षपत्नी सन्देशवाहकमेघमेव दूतं कृत्वा यक्षं प्रति प्रेषयति।

**सुर्यनारायणशर्मणः श्रीकृष्णदूतकाव्यम्-**

विंशशताब्दौ लब्धजन्मनः सूर्यनारायणशर्मणः मेघदूतस्यानुकरणेन रचिते श्रीकृष्णदूतकाव्ये पाण्डवानां दूतरूपेण श्रीकृष्णस्य दुर्योधनसकाशं सन्धिप्रस्ताव एव कथावस्तु अस्ति।

**नन्दकिशोरचन्द्रगोस्वामीगौडियस्य शुकदूतकाव्यम्-**

विंशशताब्दौ रचिते गौडियकवेः शुकदूतकाव्येऽस्मिन् विरहीकृष्णद्वारा शुकपक्षीं दूतत्वेन नियुज्य ब्रजवासिराधां प्रति प्रेषयति। काव्येऽत्र १० सर्गाः सन्ति।

**सूर्यनारायणशास्त्रिणः कीरसन्देशकाव्यम् ( १९५३ ई० )**

आन्ध्रप्रदेशीयसूर्यनारायणशास्त्रिणः अनुष्टुप्छन्दसा विरचिते कीरसन्देशकाव्ये रूक्मिणी कञ्चित् चित्रवर्णीशुकं सन्देशवाहकं कृत्वा श्रीकृष्णं प्रति प्रेषयति। रूक्मिणी विवाहसम्बन्धिते काव्येऽस्मिन् १२३ पद्यानि सन्ति।

**माङ्गोट्टशेरि कृष्णनम्पूतरिपादस्य भृङ्गसन्देशकाव्यम् ( १९३३ ई० )-**

केरलेयीकवि कृष्णनम्पुतरिपादरचिते भृङ्गसन्देशकाव्ये उडुपतिपुरस्थविरहतप्तप्रेमीद्वारा स्यानन्दूरे स्थितां स्वपत्नीं प्रति भृङ्गं दूतत्वेन चित्वा सन्देशं प्रेषयति। काव्यस्यास्य पूर्वभागे ३९ उत्तरभागे च ३४ श्लोकाः विद्यन्ते। इत्थं काव्यमिदं मेघदूतमिव भागद्वये विभज्यते।

**द्विजेन्द्रलालशर्मणः अलकामिलनकाव्यम् ( १९५४ ई० )**

मेघदूतकथायाः पल्लवितरूपरचनासु द्विजेन्द्रलालशर्मविरचितं द्विसर्गात्मकम् अलकामिलनकाव्यमन्यतममस्ति। विरहीयक्ष–यक्षिण्योः अलकायां मेलनमस्य काव्यस्य वर्ण्यविषयोऽस्ति।

**मन्दिकलरामशास्त्रिणः मेघप्रतिसन्देशकाव्यम् ( १९२३ ई० )**

मैसूरप्रान्तस्य मन्दिकलेति स्थले लब्धजन्मनः रामशास्त्रिणः मेघप्रतिसन्देशकाव्यं मेघदूतीयकथाया एव पल्लवितरूपमस्ति। मेघदूतवत् द्विधाविभक्ते काव्येऽस्मिन् पूर्वभागे ६८ पद्यानि उत्तरभागे च ९६ पद्यानि सन्ति। काव्येऽत्र पूर्वभागे यक्षिण्याः प्रतिसन्देश उत्तरभागे च अलकातः धनुष्कोटिपर्यन्तं मार्गवर्णनमस्ति।

**रामावतारशर्मणः मुद्गरदूतकाव्यम् ( १८७७-१९२९ ई० )**

बिहारप्रान्तस्य छपरानगरे १८७७ ईशवीये वर्षे लब्धजन्मना रामावतारशर्मणा प्रणीतं मुद्गरदूताभिधानं १४८ पद्ययुक्तं विनोदमूलकं दूतकाव्यं त्रिषु भागेषु विभक्तमस्ति। कविना तत्कालीनसमाजस्य भ्रष्टाचारदूरीकरणोद्देश्येन विनोदपूर्णवचसा काव्योचितपद्धत्या च काव्यस्यास्य रचना कृताऽस्ति।

**नित्यानन्दशास्त्रिणः हनुमद्दूतकाव्यम् ( १९२८ ई० )**

राजस्थानीकविनित्यानन्दशास्त्रिविरचितस्य हनुमद्दूतमिति काव्यस्य कथावस्तु श्रीरामसम्बद्धमस्ति। काव्ये रामचन्द्रः हनुमन्तं दूतत्वेन नियुज्य लंकास्थसीतासमीपं प्रेषयति। अत्र दूतस्य सफलप्रयाणार्थं प्रस्रवनगिरितः लंकापर्यन्तं मार्गो वर्णितोऽस्ति।

**मधुसूदनतर्कवाचस्पतिविरचितं हनुमत्सन्देशकाव्यम् ( १९६६ ई० )**

एकविंशत्युत्तरशतसंख्यकश्लोकविशिष्टे हनुमत्सन्देशनाम मधुसूदनकविविरचिते काव्ये हनुमत्माध्यमेन सीता रामाय प्रतिसन्देशं प्रेरयति। पूर्वार्द्ध उत्तरार्द्धभेदेन द्विधा विभक्तस्य काव्यस्य पुर्वार्द्धे ६६ श्लोकाः उत्तरार्द्धे च ५५ श्लोकाः विद्यन्ते।

**विष्णुदत्तनोटियालस्य कामदूतकाव्यम् ( विंशशताब्दः )–**

विंशशताब्दौ गढवालप्रान्ते जन्मलब्धौ विष्णुदत्तो हरिदत्तश्च भ्रातरौ कामदूतकाव्यं रचयतः। षड्विंशतिसंख्यकपद्ययुक्तेऽस्मिन् काव्ये विरहिणी प्रिया कामं दूतरूपेण चित्वा स्वप्रियतमं प्रति सन्देशं प्रेषयति।

**कवि जे. वी. पल्लेवार, जयेशकृतं हंसदूतकाव्यम् ( १९०४ ई० )–**

महाराष्ट्रस्य यवतमालमण्डलान्तर्गते 'पुसद' ग्रामे १ अप्रैल, १९०४ ईशवीये वर्षे लब्धजन्मनः जयेशकवेः आवर्तत्रये विभक्तराष्ट्रभक्तिपरकहंसदूताभिधाने काव्ये ८३ पद्यानि विद्यन्ते। बहुछन्दप्रयुक्तस्य काव्यस्यास्य प्रथमावर्त्ते दूतप्रेषणं, द्वितीया वर्त्ते सन्देशव्याख्यानं, तृतीयावर्त्ते प्रतिसन्देशवहनं च वर्णितम्


ISSN : 2454-2881

अस्ति।

**बल्लभदासगणात्राकवेः राष्ट्रियमेघदूतकाव्यम्-**

राष्ट्रियमेघदूतकाव्यं विंशशताब्दस्य गुजरातीकविवल्लभदासगणात्रवर्यस्य विविधछन्दसा रचितमेकं राष्ट्रतत्वप्रधानकाव्यमस्ति। अभिनवे काव्येऽस्मिन् भारतस्य स्वाधीनतान्दोलनावसरे राष्ट्रियभावनया प्रेरितेन कविना काराबन्दीं महात्मागान्धीं प्रति मेघं दूतत्वेन विनियुज्य सन्देशं प्रेषयति।

**प्रबोधकुमारमिश्रस्य दूतकाव्यसप्तकम् ( १९४३ ई० )**

१९४३ आङ्गलाब्दस्य १८ अक्टोवरमासे लब्धजन्मना उत्कलीयकविप्रबोधकुमारमिश्रेण स्वप्नदूतं, मलयदूतं, रक्तझंकारं, प्रज्ञादूतं, स्मृतिदूतं, मानसदूतं, तमसादूतञ्चेति सप्तसंख्यकदूतकाव्यानि रचितानि सन्ति। तेषु स्वप्नदूतमन्यतममस्ति। १९७४ आंगलाब्दे राष्ट्रपतिपुरस्कारेण पुरस्कृते स्वप्नदूतेऽस्मिन् काचिन्मुग्धानवपरिणयोन्मादिनी प्रणयिनी दिल्लीस्थं प्रियतमं प्रति स्वप्ने सारिकायाः माध्यमेन सन्देशं प्रेषयति।

१९८९ आंगलाब्दे उत्कलसंस्कृतसाहित्याकादमीतः पुरस्कृते मन्दाक्रान्ताछन्दोबद्धे मलयदूतकाव्ये राष्ट्रियमुक्तिसंग्रामस्य मूर्तभावना लीलायिता। काव्येऽस्मिन् कश्चित् कारारूद्ध स्वाधीनतासंग्रामी मलयसंविधे स्वस्य हृदयानुभूतिं प्रकाश्य देशवासीनां पुरतः सन्देशमुपस्थापयितुं निवेदयति।

राष्ट्रियचेतनाऽऽधारिते रक्तझंकारमिति दूतकाव्ये एका स्वाधीनतासंग्रामिणी नारी स्वाधीनतासंग्रामं स्मृत्वा शुकस्य समक्षं तस्याः मानसिकीव्यथां प्रकटयति।

उच्चदार्शनिकचिन्तनयुक्तेऽस्मिन् प्रज्ञादूताभिधाने काव्ये सौख्य-लोभादिमुक्तः कश्चित् वैरागीजनः स्वस्य प्रज्ञां दूतत्वेन नियोज्य मानवसमाजं प्रति सन्देशं प्रेषयति।

विविधछन्दप्रयुक्ते स्मृतिदूतकाव्ये कश्चित् चिन्तानायकः स्मृतिं दूतत्वेन कृत्वा मानवहृदयस्य विभिन्नां अवस्थां वर्णयति।

कविमिश्रस्य मानसदूतकाव्ये एका स्वतन्त्रतासंग्रामिनी नारी दिवङ्गतं महात्मागान्धिनं प्रति शुकमाध्यमेन देशस्य मूल्यबोधसन्देशं प्रेषयति।

तमसादूतमित्याख्ये सृष्टितत्वविषयकचिन्तापरककाव्ये कश्चित् योगी तमसां दूतत्वेन नियोज्य मानवसमाजं प्रति सन्देशं प्रेषयति। दार्शनिके काव्येऽस्मिन् अन्धकारं 'तमसा' इति पदेन वर्ण्यते।

**सुधाकरशुक्लस्य देवदूतकाव्यम् ( १९७४ ई० )**

मध्यप्रदेशस्य 'दतिया' इति स्थाने प्राप्तजन्मनः सुधाकरशुक्लस्य मन्दाक्रान्ताछन्दोबद्धे देवदूतकाव्ये जवाहरलालनेहरुपत्नीकमला स्वर्गात् देवदूतमाध्यमेन अद्यतन भारतस्य समाजाय राष्ट्रभक्तेः सन्देशं प्रेषयति।

१९७४ ईशवीये प्रकाशिते द्विधा विभक्ते काव्ये पूर्वभागे ६० पद्यानि उत्तरभागे च ७४ पद्यानि सन्ति।

**मूलचन्दशास्त्रिणः वचनदूतकाव्यम् ( १९७५ ई० )**

मध्यप्रदेशीयकवि मूलचन्द्रशास्त्रिणो नेमिदूताधारेण रचितस्य वचनदूतकाव्यस्य प्रथमभागस्य १९७५ ईशवीये उत्तरार्द्धभागस्य च १९८१ ईशवीये जयपुरात् प्रकाशनं जातम्। काव्ये नायिकाराजीमती स्वीयं वचनमेव दूतत्वेन विनियोज्य नेमिकुमारसमक्षं सन्देशं प्रापयति।

**प्रो० नृसिंह प्रसादसेनस्य पान्थदूतकाव्यम् ( १९७६ ई० )**

बङ्गीयकविः प्रो० नृसिंहप्रसादसेनस्य १०२ पद्ययुक्तं पान्थदूताख्यं काव्यं १९७६ इशवीये वर्षे 'संस्कृतप्रतिभा' पत्रिकायां प्रकाशितं भवति।

**कविभोलानाथस्य पान्थदूतम्, पदाङ्कदूतञ्च-**

बङ्गदेशीय भोलानाथाभिधानेन आधुनिककविना ७३ विरचिते पञ्चाधिकशत-संख्यकश्लोकविशिष्टे पान्थदूताख्ये काव्ये काचित् विरहव्यथितागोपाङ्गना पथि गच्छन्तमेकं पान्थं दूतत्वेन नियोज्य श्रीकृष्णं प्रति प्रणयसन्देशं प्रेषयति।

**कृष्णनाथन्यायपञ्चाननस्य वातदूतम्-**

ईशवीये नवदशशतके[१८] कृष्णनाथन्यायपञ्चाननकविना मन्दाक्रान्ता छन्दसि विरचितं शतसंख्यकश्लोकविशिष्टं वातदूताख्यं काव्यं रामायणस्याश्रयेण प्रस्तुतमस्ति। काव्येऽस्मिन् रावणेन अपहृता सीता अशोकवाटिकातो दक्षिणानिलं (वातं) दूतरूपेण नियोज्य रामचन्द्रं लक्ष्मणं च प्रति सन्देशं प्रेषयति।

**डा० रुद्रदेवत्रिपाठिनः पत्रदूतकाव्यम् ( १९८२ विक्रमाब्दः )**

मध्यप्रदेशस्य मालवाप्रान्ते १९८२ विक्रमाब्दे कृतजन्मना डा० रुद्रदेवत्रिपाठिना १६३ श्लोकैः रचिते पत्रदूताख्ये काव्ये कविः स्वगुरुपादचरणौ गुरूपुर्णिमावसरे अनुपस्थितत्वात् पत्रमेव दूतं नियोज्य गुरुं प्रति प्रेषयति। अनेन त्रिपाठीवर्येण अपरमपि पुत्रदूतं पादत्राणदूतं चेति दूतकाव्यद्वयं रचितमस्ति। तत्र पुत्रदूतकाव्ये राजनीतेः पञ्जासु प्रविश्य नेतृत्वाभिलाषिजनानां लक्ष्यबिमुखतां दर्शयन् कविः देहलीस्थितस्य नायकस्य सर्वहाराग्राम्यवधूः स्वपुत्रं दूतत्वेन नियोज्य पतिं प्रति सन्देशं प्रेषयति।

त्रिपाठिनः पादत्राणदूताख्यं काव्यमेकं विनोदमूलकं लघुदूतकाव्यम्। युनां मार्गदर्शनाय काव्यस्यास्य रचना कृताऽस्ति।

**डा० शिवप्रसादभारद्वाजस्य भारतसन्देशकाव्यम् ( १९२२-२०१० ई० )**

१९२२ ईशवीये लब्धजन्मना गढवालप्रान्तीयकविना डा० शिवप्रसादभारद्वाजेन युद्धज्वरग्रस्तविश्वाय शान्तिसन्देशं प्रदाय २८२ पद्ययुक्तं भारतसन्देशकाव्यं विरच्यते। यद्यपि काव्येऽस्मिन्


ISSN : 2454-2881

कमपि दूतत्वेन न युज्यते तथापि काव्यमिदं सन्देशकाव्यपरम्परायामायाति। अत्र भारतस्य राष्ट्रपतिः विश्वाय शान्तिसन्देशं ददाति।

**पद्मानन्दचतुर्वेदिनः रेडियो दूतकाव्यम् ( १९७४ ई० )**

१९७४ आंगलाब्दे सूर्योदयपत्रिकायां प्रकाशिते कविपद्मानन्दचतुर्वेदीविरचिते रेडियो दूतमिताख्ये काव्ये काचित् गृहिणी रेडियो यन्त्रं दूतत्वेन नियोज्य स्वपुत्रसमीपं सन्देशं प्रेषयति।

**हरिशरण अम्बिकादत्तशाण्डिल्यस्य कामदूतम् ( १९२७ ई० )**

१९२७ ईशवीये वर्षे पाकिस्थानस्य शिकारपुरेति स्थाने जन्मलब्धस्य अम्बिकादत्तशाण्डिल्यस्य १६८ श्लोकविशिष्टे कामदूतमित्याख्ये काव्ये पाकिस्तानविप्लवासरे लुप्ता काचित् प्रेमिका कामं दूतत्वेन नियोज्य प्रियतममन्वेषयितुं प्रेषयति।

**पूलवर्तिशरभाचार्यस्य मरुत्सन्देशकाव्यम् ( १९६७ ई० )–**

आन्ध्रीयकविशरभाचार्यस्य २८१ श्लोकविशिष्टे मरुत्सन्देशकाव्ये कश्चित् युवकः लद्दाखोपरि चीनीसैनिकाणाम् आक्रमणावसरे विच्छेदितां प्रियामन्वेषयितुं सर्वतोगामिनं पवनं दूतत्वेन नियोजयति।

**परमानन्दशास्त्रिणः गन्धदूतकाव्यम् ( १९२६-२००८ ई० )–**

कविपरमानन्दशास्त्रिणा अलीगढमुस्लिमविश्वविद्यालये अध्यापनावसरे मन्दाक्रान्ताछन्दसि १६० श्लोकविशिष्टं गन्धदूतमिति काव्यमरचयत्। कविना गन्धं दूतत्वेन नियोज्य काव्यमिदं रचितम्।

**प्रो० रामाशिषपाण्डेयस्य मयुखदूतकाव्यम् ( १९४४ ई० )–**

१९४४ ईशवीये विहारप्रदेशस्य गयाप्रान्ते लब्धजन्मना प्रो० रामाशिषपाण्डेयेन मन्दाक्रान्ताछन्दसि विरचिते एकादशाधिकशतसंख्यकश्लोकयुक्ते मयुखदूतमित्याख्ये काव्ये अचेतने मयुखे चेतनस्य अध्यारोपणं कृत्वा दौत्यसामर्थ्यं स्थापयति। अस्य नायिका काचित् पाश्चात्यरमणी अस्ति।

**धुरन्धरविजयनामकवेः मयूरदूतकाव्यम् ( १९४४ ई० )**

धुरन्धरविजयनामा जैनमुनिविरचिते वसन्ततिलकछन्दोबद्धे मयूरदूतमिति काव्ये कविना मयूरं दूतत्वेन नियोज्य गुरुं प्रति सन्देश प्रेष्यते। धुरन्धरविजयस्य जैनधर्मे दीक्षाग्रहणात् पूर्वनाम धीरजलाल आसीत्।

**एन. सी. शेठनामा कवेः शुकदूतकाव्यम् ( १९५७ ई० )**

कविशेठविरचिते चत्वारिंशत्संख्यकपद्ययुक्ते शुकदूतेति काव्ये कश्चित् प्रियतमः प्रियतमां प्रति शुकमाध्यमेन सन्देशं प्रेषयति। काव्यमिदं गुजरातमहाविद्यालयात् १९५७ ईशवीये वर्षे प्रकाशितमभवत्।

**श्रुतिदेवशास्त्रिणः झञ्झावातकाव्यम्**

श्रुतिदेवशास्त्रिविरचिते राष्ट्रभक्तिपरकझञ्झावातकाव्ये नेताजीशुभाषेन मध्यरात्रौ उत्तरदिक्भागात् आगतं झञ्झावातम् अवरुध्य तन्माध्यमेन भारतवासिनं प्रति सन्देशं ददाति। इन्द्रवज्राछन्दसि विरचितेऽस्मिन् काव्ये यद्यपि काव्यस्य नाम्नि दूतशब्दस्य प्रयोगो न क्रियते तथापि दौत्यकर्मणि झञ्झावातं सन्देशवाहकत्वेन चिनोति कवि:।

**प्रो॰ दिनेशप्रसादपाण्डेयस्य मित्रदूतकाव्यम् (१९६३ ई०)**

१९२० आंगलाब्दे विहारप्रान्ते जन्मलब्धस्य श्रीदिनेशप्रसादपाण्डेयस्य नवनवतिसंख्यकपद्ययुक्ते मित्रदूतकाव्ये विश्वबन्धुत्वस्थापनाय मित्रमर्थात् सूर्यं दूतत्वेन नियोज्यते। अत्र सूर्यमाध्यमेन धार्मिकोपदेशो विविच्यते।

**कृष्णप्रसादशर्मा घिमिरेवर्यस्य सम्पातिसन्देशकाव्यम् (१९७५ विक्रमाब्द:)**

रामायणस्य कथांशमाधारीकृत्य नेपालीकविकृष्णप्रसादशर्मण: सम्पातिसन्देशकाव्ये जटायुभ्रातृसम्पाति: सुग्रीवाय रावणद्वारा सीताया: अपहरणवार्तां ददाति।

एतेषां दूतकाव्यानामतिरिच्यापि अनेकानि आधुनिककाले रचितानि दूतकाव्यानि श्रूयन्ते। विस्तारभयात् केवलं तेषां नामानि अत्र उल्लिख्यन्ते। तानि यथा प्रो॰ इच्छाराम द्विवेदीवर्यस्य दूतप्रतिवचनम्, राजराजेश्वरतीर्थस्य रामसन्देशकाव्यम्, डा० भोलाशंकरव्यासस्य दक्षिणानिलदूतम्, वसन्तत्र्यम्बकरावडेकवे: अभिनवमेघदूतम्, रामचन्द्रचक्रवर्तिन: कपिदूतम्, नारायणरयस्य कपोतदूतम्, राजगोपाल अय्यंगारस्य काकदूतम्, पण्डित लक्ष्मीचन्द्रस्य कीरदूतम्, वामनविष्णुमिराशीकवे: चक्रवाकदूतम्, कुन्तलेश्वरदौत्यकाव्यं च, नारायणभट्टस्य कृष्णदूतम्, सूर्यनारायणकवे: कृष्णदूतम्, वेङ्कटाचार्यस्य कोकिलसन्देशकाव्यम्, रुद्रदेवत्रिपाठिन: गर्दभदूतम्, के. सी. रङ्गाचार्यस्य पवनसन्देशकाव्यम्, आशुतोषसेनस्य पिकदूतम्, डा० हरिहरत्रिवेदीवर्यस्य मदनदूतम्, डा० पी.के. नारायण पिल्लैकवे: मयूरदूतम्, रमेशचन्द्रशास्त्रिण: मरुदूतम्, गोविन्द रेड्डीकवे: मारुतसन्देशकाव्यम्, कृष्णमूर्तिशास्त्रिण: शुकसन्देशकाव्यम्, नारायणशास्त्रिण: श्येनदूतम्, डा० हरिनारायणदीक्षितस्य श्रीहनुमद्दूतम्, मधुसूदन मिश्रस्य स्वतन्त्रसन्देशकाव्यम्, कर्मवीरनागेश्वररावस्य स्वातन्त्र्यसन्देशकाव्यम्, शालग्रामशास्त्रिण: स्वर्गसन्देशकाव्यं सुरभारतीसन्देशकाव्यञ्च, वरंगनाथाचार्यस्य हनुमद्प्रसादसन्देशकाव्यम् (१८९४), राघवाचार्यस्य हनुमत्सन्देशकाव्यम् (१८५५), जगदीशचन्द्रस्य हंसदूतम्, यादवेश्वरतर्करत्नस्य चन्द्रदूतम् (१८८१), राजगोपालचक्रवर्तिन: मधुकरदूतम्, परमेश्वरझाकवे: यक्षसमागमकाव्यम् (१८५०), रामदयाल तर्करत्नस्य अनिलदूतम्, लम्बोदरवैद्यस्य गोपीदूतम्, नारायणनम्बीशस्य हंससन्देशकाव्यम् (१८५२), अम्बिकाचरणदेवशर्मण: पिकदूतम्, रवीन्द्रकुलकर्णीकवे: कर्गजशरदूतम्, के. के. कृष्णमूर्तिशर्मण: शुनकदूतम्, वनेश्वरपाठकस्य प्लवङ्गदूतम्, हरिहरभट्टस्य हृदयदूतं


ISSN : 2454-2881

चेत्यादिनि।

**आलोचनानिष्कर्षः**

आदिकालात् सुदीर्घरचनायात्रायां संस्कृतकाव्यधाराऽनवरतं प्रवहति। तस्यां धारायां कालिदासस्य मेघदूतादनन्तरं दूतकाव्यानामविरलधाराः प्रवहन्ति। मेघदूतस्य सफलतामवलोक्य बहवः प्राचीनकवयः दूतकाव्यानां रचनायां प्रयत्नशीलास्तु आसन्नेव, अर्वाचीनकालिककवयोऽपि समानन्तरालेन तत्र कृतश्रमाः दृश्यन्ते। फलतः सम्प्रति प्राचीनदूतकाव्यानामपेक्षयाऽऽधुनिकदूतकाव्यानां संख्याः अधिकाः परिदृश्यन्ते। शोधपत्रेऽस्मिन् अर्वाचीनकाले रचितानां सर्वेषां दूतकाव्यानां विवेचनमसम्भवमिति मत्वा अत्र अर्वाचीनसंस्कृतसाहित्ये उल्लेखनीयदूतकाव्यानां सामान्यतया विवेचनमत्र विहितम्।। इति शम्।।

**सन्दर्भसूचीः -**


१. वाचस्पत्यम्, षष्टभाग, पृ. ५२९०
२. शब्दकल्पद्रुमः, पञ्चमभागः, पृ. ३४४.
३. दाधीच, रामकुमार, आधुनिकसंस्कृतसाहित्येतिहासः, पृ. ४
४. उपाध्यायः, बलदेव, आधुनिक संस्कृतसाहित्य का इतिहास, पृ. ३०
५. सा. द., ६.१
६. काव्यादर्शः- १.११
७. सा. द., ६.३१४-३१५
८. सा. द., ६.३२९
९. कविचिन्तामणि, चतुर्थकिरणः १
१०. उपाध्याय, बलदेव, आधुनिक संस्कृत साहित्य का इतिहास, पृ. ३२३-३२४
११. शब्दकल्पद्रुमः ३.९०, अमरकोषः २.८.१६
१२. ऋग्वेदः, ६.५८.३
१३. भागवतपुराणम्, १०.३०.२४-२७.
१४. महा.वन. नलोपाख्यान- हंसदमयन्तीसम्वादे ५३ अध्याये.
१५. कामविलापजातकम्- २९७
१६. आचार्य, रामकुमार, संस्कृत के सन्देशकाव्य, पृ- ४४४.
१७. तत्रैव, पृ. ४६१

१८. तत्रैव, पृ. ४५१

**ग्रन्थसूची-**


१. वाचस्पत्यम्, पुना अरियेन्टेल बुक एजेन्सि, १९४०।

२. शब्दकल्पद्रुमः, नाग पब्लिशर्स, दिल्ली, २००६।

३. साहित्यदर्पणः, सम्पा.-सत्यव्रत सिंह, चौखम्बा विद्याभवन, वाराणसी, १९९४

४. काव्यादर्शः, भैमी प्रकाशन, दिल्ली, १९८३।

५. ऋग्वेदः, संस्कृतसाहित्यप्रकाशन, दिल्ली, २०१६।

६. श्रीमद्भागवतमहापुराणम्, गीताप्रेस, गोरखपुर।

७. महाभारतम्, संस्कृतसागित्यप्रकाशन, नव दिल्ली, २०१४।

८. आचार्य, रामकुमार, संस्कृत के सन्देशकाव्य

९. उपाध्याय, बलदेव, आधुनिकसंस्कृत साहित्य का इतिहास।




ISSN : 2454-2881

# वाजसनेयिसंहितास्वरूपम्-एका पर्यालोचना

ड° मैत्रेयी गोस्वामी

**उपोद्धात :**

यजूंषि गद्यानि। त्रेतायां यजुराख्यः एक एव वेद आसीत्। चतुर्षु वैदिकसंहितासु यजुर्वेदसंहितायाः अतीव गुरुत्वपुर्णं तथा महत्वपूर्णं स्थानं वर्तते। अध्वर्युना यज्ञे उपयुज्यमाना मन्त्रा एवात्र यजुर्वेदे संकलिताः, यज्ञस्य वास्तविकं विधानमध्वयुरिव करोति, अतोऽयं यजुर्वेदो यज्ञविधेरतिसन्निकृष्टं सम्बन्धं रक्षति। अस्याः संहितायाः भेदद्वयं विद्यते-

१) शुक्लयजुर्वेदसंहिता।

२) कृष्णयजुर्वेदसंहिता।

पौराणिकाः कथयन्ति-

पुरा सत्यवतीसूनुः पाराशरो वेदव्यासो वेदसंहितां चतुर्धा विभज्य ऋग्यजुस्सामाथर्वाख्याश्चतुरो वेदान् क्रमात् पैल-वेशम्पायन-जैमिनी-सुमन्तुभ्यः स्वशिष्येभ्यो व्यतरत्। ततश्च व्यासशिष्याद् वैशम्पायनाद् याज्ञवल्क्यादयः शिष्या यजुर्वेदमधिजगिरे। अथ कदाचित केनापि हेतुना क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रति उवाच-मदधीतं त्यजेति। एवमादिष्टो याज्ञवल्क्यो योगबलाद् मूर्तां विद्यां विधायोद्ववाम। वान्तानि च यजुंषि गुरुत्वा वैशम्पायनशिष्यास्तित्तिरयो भुत्वा समश्नुवन्, तानि च यजुंषि कृष्णानि समजायन्त। ततो दुः खितो याज्ञवल्क्यः सूर्यमाराध्य शुक्लानि यजुंषि प्रातोत्। तस्माच्च महर्षिमाध्यन्दिनो जग्राह। यद्यपि तानि याज्ञवल्क्येन बहुभ्यः शिषेभ्य उपदिष्टानि तथापि प्रथमं महर्षिमाध्यन्दिनो जग्राहेति तत्सम्बन्धितया लोके माध्यन्दिनान्युच्यन्ते।

तानि इमानि यजुंषि वाजसनेयादागतानि। वाजस्यान्नस्य सनिर्दान यस्य स वाजसनिस्तदाख्यः कश्चिन्महर्षिः तदपत्यं वाजसनेयो याज्ञवल्क्यः, तेन प्रोक्तानि यजुंषि तन्नाम्ना व्यवह्रियन्ते। तदुक्तं शतपथब्राह्मणे-

आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते।[१]।।

ISSN : 2454-2881

सहस्रशाखो वेदः। तत्रैकशतमध्वर्युशाखाः। माध्यन्दिनादयः शुक्लयजुर्वेदशाखास्तु पञ्चदशैव। तदुक्तं मन्त्रभाष्योपोद्घाते श्रीमदुवटाचार्येण–

आदित्याल्लब्धवान्यस्तु शाखाः पञ्चदशापराः।

तं याज्ञवल्क्यं वन्देऽहं मन्त्रभाष्यप्रसिध्दये।।

शुक्लयजुर्वेदप्रवक्ता महर्षियाज्ञवल्क्यस्त्रेतायां श्रीरामचन्द्रनृपतिशासनसमये बभूव। स हि मिथिलाधिपतेर्जनकमहाराजस्य परिषदि समवेतान् दिग्दिगन्तरागतान् भूयसो मनीषिणः पराजयेति शतपथब्राह्मणे बृहदारण्यकोपनिषदि प्रतिपादितम्[२]।

शुक्लयजुर्वेदे विनियोगवाक्यरहिताः केवलाः मन्त्राः विद्यन्ते, कृष्णयजुर्वेदे तु विनियोगवाक्यानि मन्त्राञ्च प्राप्यन्ते। अतोऽमिश्रितरूपतया शुक्लयजुर्वेदः, मिश्रितरूपतया च कृष्णयजुर्वेद इति संज्ञा जातेत्यपि लोकाः कथयन्ति।

प्रधानतः याज्ञिकदृष्टया वेदेषु यजुर्वेदस्य प्रमुख्यस्थानं विद्यते। 'शेषे यजुः', 'अनियताक्षरो यजुः', 'गद्यात्मको यजुः' इति अनया व्युत्पत्याः यजुषशब्दः निष्पन्न जातः। मूलतः कर्मकाण्डस्य प्राध्यान्यता यजुर्वेदे परिलक्षितमस्ति। अध्वर्युः हि कर्मकाण्डस्य पुरोधा भवति। अध्वर्युः यजुर्वेदस्य ऋत्विक अतः यज्ञविषयककर्मकाण्डस्य सः प्रतिपादनं करोति। अतैव याज्ञिक दृष्टिकोणतया यजुर्वेदस्य पार्थक्यं अर्भ्यहित ऋग्वेदेऽपि एवं प्रतिपादितं भवति–

ऋचां त्वः पोषमास्ते पूपुष्वान्

गायत्रं त्वो गायति शक्वरीषु।

ब्रह्मा त्वो वदति जातविद्यां

यज्ञस्य मात्रा विमिमीत उत्वः।।[३]

अस्यार्थः होतृनामकः यत् एकः ऋत्विक्यज्ञकाले स्वकीयवेदगतानामृचां पुष्टिं कुर्वन आस्ते। उद्गातृनामकः एकः ऋत्विक्गायत्रशब्दभिधेयं स्तोत्रं शक्वरीशब्दाभिधेयासु ऋचः गायति। ब्रह्मनामकः एक ऋत्विक्जाते जाते तदा तदा उत्पन्ने यज्ञे प्रस्तुते कर्माणि विद्यां अनुज्ञां वदति। अध्वर्युनामकः एकः ऋत्विक्यज्ञस्वरूपं विशेषेण निष्पादयति। इत्येवं यज्ञकर्माणि यजुर्वेदस्य महत्वपूर्णं स्थानं विद्यते। यज्ञाः अनेकविधाः। देवातानां प्रसादार्थं यज्ञानां विधानं विद्यते। यदि देवाः प्रसन्नाः भवन्ति तर्हि सर्व सुवृष्टिं कुर्वन्ति। धन–सम्पत्ति–ऐशर्यादिषु वृद्धिं भवन्ति। एवं यज्ञानुष्ठानेन च विविधप्रकारेण मानवानामुपकारं कृत्वा तेषाम् अभ्युदयं सम्पादयन्ति येन जनाः सुखपूर्वकं–शमपूर्वकं जीवनं अतिवाहितं कर्तुं शक्नोति। यथा–


ISSN : 2454-2881

आ ब्रह्मन्ब्राहमणो ब्रह्मवर्चसी जायतामा राष्ट्रेराजन्यः शुर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुवोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न पच्यन्तां योगक्षेमो नः कल्पताम्।(४)

वाजसनेयीमाध्यन्दिनशाखायाः चत्वारिंशत अध्यायेषु प्रथमाध्याये दर्शपूर्णमासयागस्य वर्णनमस्ति। दर्शः पूर्णमासः चेति पदद्वयञ्च संयोगरूपः दर्शपूर्णमासयागः। इष्टिरूपस्य वैदिक यागस्य प्रकृतियागोऽयम् दर्शपूर्णमासयागः। सूर्येन्दु संगमः दर्शः। यद्यापि यागोऽयं दर्शस्य पूर्णमासस्य च समाहारः, तथापि पौर्णमास्यमेव यागस्यास्य आरम्भं कुर्यात्। तत्र पौर्णमास्यां त्रीणि प्रधानयागाः अथवा आहुतयः सन्ति। तत्र प्रथमतः अग्निदेवताविषयकः, विष्णु, प्रजापत्याग्निषोमान्ययदेवताकः उपांसुयागः द्वितीयः, अग्निसोम देवताकः पुरोडाश द्रव्ययागः तृतीयः। एंव अमावस्यायां अनुष्ठिताः त्रयः प्रधान यागाः यथा-आग्नेय पुरोडाशायागः प्रथमः, एवं इन्द्रप्रीत्यर्थकपुरोडाशयागः, इन्द्रप्रीत्यर्थकपयोद्रव्ययागञ्च सन्ति। दर्शपूर्णमासयागस्य स्वरूपं नित्य च काम्यः। माध्यन्दिनशतपथस्य प्रथमकाण्डे तथा काण्वशतपथस्य द्वितीयकाण्डे दर्शणौर्णमासेष्टीनां विस्तृतं विवरणम् उपलभ्यते। द्वितीयाध्याये दर्शपौर्णमासेष्टिसम्बन्धमन्त्राणां तथा पिण्डपितृयज्ञस्य विषये व्यक्तमस्ति। अत दर्शपूर्णमासविषयकं मन्त्रमेकं यथा-

''अदित्यै व्युन्दनमसि विष्णौः स्तुपोस्यूर्णम्रदसंत्वा स्तृणामि स्वासस्थां देवेभ्यो भुवपतये स्वाहा भूवनपतये स्वाहा भूतानांपतये स्वाहा।''(५)

महीधरभाष्यानुदिशा अस्यार्थः- हे प्रोक्षणशेषोदक, त्वमदित्यै अदित्या भूम्याः व्यन्दनमसि विशेषेण क्लेदनमसि। अत्र प्रधानतः जलमुद्दिश्य प्रशंसा उपलभ्यते।

तृतीयाऽध्याये अग्निहोत्रस्य चातुर्मास्य च यज्ञोपयोगिनः मन्त्राणां विवरणमस्ति। सप्तहवियागेषु यागोऽयं द्वितीये स्थाने परिगण्यते। अनेन यागेन प्रतिदिनं प्रातः काले सायंकाले च सूर्यस्य अग्ने च उपासना क्रियते। यज्ञेऽस्मिन् मूख्यतः दुग्धस्य-तण्डुल-दधि-घृतानां च आहुतिः प्रदीयते। शुक्लयजुर्वेदस्य अधोलिखितेन मन्त्रेण प्राप्तः सायंकालयो आहुतीनां विधानं एवं वर्णितमस्ति-

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्ये ज्योतिर्ज्योतिः सूर्यः स्वाहा। अग्निर्वर्चो ज्योतिर्वचः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः ज्योति सूर्यः स्वाहा।।(६)

चतुर्थाध्यायादारभ्य अष्टमाध्यायपर्यन्तं सोमयागानां वर्णनमस्ति। प्रातः, मध्याह्नै, सायंकाले च अत्र अग्नौ हवनं भवति। सोमयागे प्रधानाहुतिरूपेण सोमरसस्य समयानुसारेण सवनं विभिन्न नाम्ना

विख्यातमस्ति।

नवमाध्याये वाजपेयराजसूययागविषये विवरणमस्ति। वाजपेय यागविषयक मन्त्रमेकं यथा

देवसवितः प्रसुव यज्ञं प्रसुव यज्ञपति भगाय।

दिव्यो गन्धर्वः केतपुः केतं नः पुनातु

वाचस्पतिर्वाजं नः

स्वदतु स्वाहा।(७)

मन्त्रेऽस्मिन् सवितादेवता विषयक स्तुतिः प्राप्यते। उवटभाष्यानुसारेण मन्त्रस्यास्य अर्थः प्रसुव अभ्यनुजानीहि वाजपेयलक्षणं यज्ञम्। भगाय भजनीयाय यज्ञफलाय। त्वत्प्रसादाच्च मण्डललक्षणो दिव्यो दिवि भवो गन्धर्वो गवां वाचां रश्मीनां वा धारयिता केतपुः। 'केत' शब्देन अन्नम् उच्यते। अन्नस्य पविता। त्वत्प्रसादाच्च वाचस्पतिः वाजमन्नं नोऽस्माकं स्वदतु।

दशमाध्याये सौत्रामणीयागस्य वर्णनमूपलभ्यते। पवित्राभिषेचनीय-दशपेय-केशवपनीय-व्युष्टि-द्विरात्र-क्षत्रधृतिसंज्ञाकाः सोमयागविकृतित्वात् अग्निष्टोमवत् सर्वमङ्गजातं कर्तव्यं, तत्र विशेषाभावादत्र नोक्ताः, तदनन्तरकर्तव्या सौत्रामणि अभिधीयते इति।

अनन्तरम् एकादशाध्यायादारभ्य अष्टादशाध्याय पर्यन्तम् अग्निचयनं उखाभरणं चितयाः शतरूद्रीय होमस्य वसोधारा च भवति। अर्थात् यज्ञीयहोमाग्निहेतवे वेदनिर्माणस्य वर्णनं विस्तरेण कृतमस्ति।

षोडशाध्याये शतरूद्रीयहोमस्य प्रसङ्गमस्ति। अस्मिन् अध्याये रूद्रस्य कल्पनायाः साङ्गोपाङ्गरूपेण विवेचनमस्ति। वैदिकेषु एव रूद्राध्यायः अतीव उपयोगित्वेन नितान्तं प्रख्यातोऽस्ति। अध्यायस्य प्रारम्भे रूद्रसम्बन्धी मन्त्रमेकम्-

नमस्ते रूद्र मन्यव उतो त इषवे नमः।

बाहुभ्यामुत ते नमः।।(८)

अर्थात् रूद्र सम्बन्धे रूद्राध्याये परमेष्टिनः देवानां वा प्रजापतिः वा स्तुतिः प्रदर्शयति। तत्र एकैव देवता रूद्रः। रुद्र शब्दस्यार्थः यथा-हे रूद्र, रुत्, दुःखं द्रावयति रूद्रः। यद्वा रू गतौ ये गत्यर्थास्ते ज्ञानार्थाः। अस्मिन् अध्याये रूद्रदेवस्य विभिन्नानि शुभ-अशुभ वैशिष्टानि उपलभ्यते। रूद्रदेवः साधारणतः शान्तशरीरयुक्तः। स अविषमा, अपापकाशिनी, शान्तमया गुणविशिष्टः। गिरौ पर्वते कैलासाख्ये अवस्थितो सः सुखं विस्तारयति। अतैव रूद्रः गिरिशन्त उपाधिविशिष्टः। अष्टादशाध्याये वसोधारासम्बन्धी मन्त्राः सन्निविष्टोऽस्ति। तदनन्तरं एकोनविंशति अध्यायात् आरभ्य एकविंशति अध्याय पर्यन्तं सौत्रामणि यज्ञस्य विधानमस्ति। जनश्रुतिरस्ति यत्- अधिकसोमपानेन इन्द्रदेवः रूग्णोऽभवत्। अस्य रोगस्य चिकित्सा


ISSN : 2454-2881

अनेनैव यज्ञेन स्ववेद्येन कृतवान्। राज्यच्युतनृपाय, पशुकाम–यजमानाय, सोमरसानुकुलतया पराङ्मुखजनाय च अस्यैव यज्ञस्य अनुष्ठानं विहितम्।

द्वाविंशत्यध्यायादारभ्य पञ्चविंशत्यध्यायपर्यन्तम् अश्वमेध यज्ञस्य विशिष्ट मन्त्राणां निर्देशोऽस्ति। अश्वमेधयज्ञस्तु सार्वभोमाधिपत्यस्याभिलाषी सम्राजे विहितोऽस्ति। सर्वकामस्यार्थे राज्ञोऽश्वमेधयागः फाल्गुनमासस्य शुक्ला अष्टमी तिथौ आरम्भः कुर्यात्।

षड्विंशत्यध्यायादारभ्य ऊनत्रिंशदध्यायपर्यन्तं खिलमन्त्राणां सङ्कलनमस्ति। अग्निष्टोमाग्निसौत्रामणि अश्वमेध–पुरूषमेधसर्वमेधपितृमेध प्रवर्ग्योपनिषत्संबन्धा मन्त्रा व्याख्या उपलभ्यन्ते। अत्र खिलसंज्ञक मन्त्रमेकं यथा–

स्वादिष्ठया मदिष्ठया पवस्व सोम धारया।<br>
इन्द्राय पातवे सुतः।।(९)

त्रिंशदध्याये पुरुषमेधस्य वर्णनमस्ति, यस्मिन् चतुरशीत्यधिकशतपदार्थानामालम्भनस्य निर्देशोऽस्ति। ब्राह्मणराजन्ययोरतिष्टाकामयोः पुरुषमेधसंज्ञको यज्ञो अनुष्ठीयते। यज्ञोऽयं चैत्रमासस्य शुक्लदशम्यां तिथौ आरम्भः भवति। पुरूषमेधयागस्य प्रथममन्त्रः यथा–

नृत्ताय सूतं गीताय शैलुषं धर्माय सभाचरं नरिष्ठायै भीमलं नर्माय<br>
रेभं हसाय कारिमान्दाय स्त्रीषखं प्रमदे कुमारीपुत्रं मेधायै रथकारं धैर्याय तक्षाणम्।(१०)

एकत्रिंशदध्याये प्रसिद्धपुरूषसूक्तमस्ति, यत्र ऋग्वेदात् अपेक्षया षड् मन्त्राः अधिकाः सन्ति। सुक्तस्यास्य प्रथम मन्त्रः यथा–

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।<br>
स भूमिं सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम्।।(११)

सहस्रसंख्यानि शीर्षाणि शिरासि यस्य सः शीर्षछन्दसि इति शिर शब्दस्य शीषर्न्निदेशः। यानि सर्वप्राणीनां शिरांसि तानि सर्वाणि तद्देहान्त पातित्वात्। एवं अग्रेऽपि सहस्राक्षः सहस्रमक्षीणि यस्य सः। अक्षिग्रहणं सर्वज्ञानेन्दियोपलक्षकम्। सहस्रपात् पादग्रहणं कर्मेन्द्रियोपलक्षणम्। सः पुरुषः भूमिं ब्रह्माण्डलोकरूपां सर्वतः तिर्यक् ऊर्ध्वमधश्च स्पृत्वा व्याप्य। पादः अस्या विश्वा भूतानि त्रिपात् अस्य अमृतं दिवि। अस्य च पुरूषस्य पादः एकोशः इह त्रैलोक्ये बीजभूतं चतुर्षु भूतेषु भूतम्। एतद्गुणः पुरूषः तद्व्याप्य अतिक्रम्य स्थित।

द्वात्रिंशत् तथा त्रयत्रिंशदध्याये सर्वमेधस्यमन्त्राः उपलभ्यन्ते। द्वात्रिंशदध्यायस्यारम्भे हिरण्यगर्भसुक्तस्याऽपि कतिपयमन्त्राः समुध्दृताः सन्ति।

चतुस्त्रिंशदध्यायस्य प्रारम्भे षड्मन्त्राणां शिवसंकल्प उपनिषद (तन्मे मनः शिवसङ्कल्पमस्तु) नितान्तोपादेयोऽस्ति। अध्यायेऽस्मिन् मनः देवता, षट्कण्डिकास्त्रिष्टुभ्यो लैङ्गिको विनियोगः। मनदेवता विषये अध्यायस्य प्रारम्भे एवमुपलभ्यते-

यज्जाग्रतो दुरमूदैति दैवं तदु सुप्तस्य तथैवैति।

दुरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु।।(१२)

पञ्चत्रिंशदध्याये पितृमेधयज्ञसम्बन्धिमन्त्राणां सङ्कलनमस्ति। स च पितृमेधो मृतस्य वार्षिकस्मरणे भवति। पुनः षट्त्रिंशदध्यायादारभ्य अष्टात्रिंशदध्यायपर्यन्तं प्रवर्ग्य यागस्य विशदं वर्णनमस्ति। प्रवर्ग्यस्यादावन्ते च शान्तिकरणोऽध्यायः। भुवनस्य भुतजातस्य यः पतिरधिपतिः प्रवर्ग्यरूपो यज्ञः स नोऽस्माकं सुखरूपो भवतु।

अन्तिमाध्याये ईशोपनिषदस्ति। उपनिषत्सु अतीव लघुकायात्वकमस्ति। अस्याः संहिताया आदित्येन सह घनिष्ठसम्बन्धस्यापि सूचना अपि अस्या एव पञ्चदश मन्त्रेण मिलति-

''हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।

तत् त्वम् पुषन्नापावृणु सत्यधर्म्माय दृष्टये।।(१३)

**उपसंहारः-**

वेदिकयुगीयसभ्यता-संस्कृति उत्कृष्ट निदर्शनं शुक्लयजुर्वेदे परिदृश्यते। अत्र मन्त्रात्मकः गद्यात्मकः च ऋचः वर्तते, परन्तु समूदायभावेन ऋचाः 'मन्त्रः' एव कथ्यते। वेदस्य अस्य गुरुत्वं प्राच्य तथा पाश्चात्य सर्व देशेऽपि विद्वद्जनानां मध्ये विराजमानोऽस्ति। तत् कालीन युगे चतुर्वर्णः प्रतिलोमानुलोम वर्णः, जातिभेदः, आर्य-अनार्य जाति नाम्नः, जीवनधारणार्थं विविध वृत्तिः प्रभृतिना अधिक प्रयोजनीयं तथा गुरुत्वपुर्णं तथ्यः अस्मिन् संहितायां वर्णितोऽस्ति।

अस्यां संहितायां माध्यन्दिन शाखायाः सान्निविष्ट शतपथनाम्ना एकैव ब्राह्मणग्रन्थ अस्ति। ब्राह्मणग्रन्थानां मध्ये शतपथब्राह्मणं श्रेष्ठस्थानं अधिक्रीयते। ग्रन्थेऽस्मिन् शतसंख्यका अध्यायाः सन्ति। मनोरमयारीत्या वेदिकविधानस्य याज्ञिकव्यवहारस्य च शिक्षार्थमेव तथा याज्ञीक क्रियायाः हेतुनिर्देशनार्थं, प्राचीनाख्यानानां सरसविवेचने शतपथब्राह्मणस्योत्कर्षं प्रतिफलितं भवति।

वाजसनेयिसंहितायाः 'स्वर' - अंकनपद्धतिरपि अन्यवैदिकस्वराङ्कनपद्धत्या भिन्ना एवोऽस्ति। अनेन कारणेन अत्राऽपि भिन्नता सम्भावनीया, किञ्च शतपथब्राह्मणस्य उच्चारणं वाजसनेयिसंहिताया अनुरूपमेवास्ति। 'य' कारस्य उच्चारणं भवति जकारः, 'ष' कारस्य 'ख' कारः, अनुस्वारस्य 'गुँ'


ISSN : 2454-2881

पदस्यादौ 'व' कारस्य द्वित्ववकारः एवं 'ऋ' कारेण युक्तस्य रेफस्य रे यथा सहस्रशीर्षा इत्यस्य पदस्य सहस्रशीरेसा उच्चारणं भवति तथा उष्मयुक्तलकारस्य उच्चारणं 'ले' भवति।

रुद्रः शिवःधर्मो वा शैव धर्मस्य उत्पत्तिः प्रसारस्य च इतिहासे शुक्लयजुर्वेदस्य अवदानं च वेदपण्डिताः अपि मुक्तकण्ठे स्वीक्रीयते। वाजसनेयिसंहितायाः षोडशोऽध्यायः रूद्राध्याय नाम्ना अभिहितमस्ति। ऋग्वेदे रुद्रदेवः भीषणरूपेण, भीमरूपेण च वर्णितोऽस्ति। परन्तु अस्यां संहितायां षोडशाध्याये अर्थात् रुद्राध्याये रुद्रदेवः न केवलं भीषण संहारकरूपेण अपि तु संहारकः, शिवः, शङ्करः, शम्भुः इत्यपि उपस्थाप्यते।

यथा-

नमः शंभवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च।[१४]

वाजसनेयिसंहितायाः भाषा निश्चितरूपेण परवर्तिकालिकः वर्तते। किन्तु आधुनिक अलंकृत भाषया सह गभीरपार्थक्य वर्तते। अत्र तु शिव-विष्णुः च एतयो महत्त्वं परिलक्षितमस्ति। ऋग्वैदिककाले यज्ञस्य माहात्म्यं केवलं अस्ति देवताः, यत तु ताः देवाः यज्ञेन सन्तुष्टाः, सन्तः यजमानं प्रति अभीष्टं वर्षयन्ति, परन्तु यजुर्वेदकाले यज्ञस्य महत्त्वं वृद्धिः अधीक परिलक्षितं भवति, यत्र यज्ञमान-देवयो मध्ये अत्याधिक व्यवधानं नोऽपलभ्यते।

पुनः आधुनिककर्मकाण्ड-यजुवेदीयकर्मकाण्डयोः भावनायां अपि महान् पार्थक्यं परिदृश्यते। यजुर्वेदीय कर्मकाण्डे व्यक्ति सुख-दुःखयो कामनायाः उद्‌र्ध्वं गत्वा मानवस्य कल्याणाय प्रार्थनां करोति।

विश्वानि देव सवितर्दुरितानि परासुव।
यभ्दद्रं तन्न आसुव।।[१५]

**सन्दर्भसूची :-**

१. शतपथब्राह्मणम्, २४.९.५.३३
२. श्रीमत्वाजसनेयी-माध्यन्दिन-शुक्ल-यजुर्वेद-संहिता, पृ. ५
३. सायणाचार्यकृतः ऋग्वेदभाष्यभूमिका, पृः ४
४. शुल्कयजुर्वेदसंहिता, २३.२२
५. तत्रैव, २.२
६. तत्रैव, ३.९

७. तत्रैव, १.२

८. तत्रैव, २६.२

९. ऋग्वेद, ९.१.१

१०. तत्रैव, ३०.२

११. तत्रैव, ३२.१

१२. तत्रैव, ३४.१

१३. ईशावास्योपनिषद्, मन्त्र २५

१४. शुल्कयजुर्वेसंहिता, १६.४१

१५. तत्रैव, ३०.३

**सहायकग्रन्थपञ्जी**


१. ईशावास्योपनिषद्- कर्नाटक डा० विमला चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१५।

२. वैदिकवाङमयस्येतिहासः- डा० जगदीश चन्द्र मिश्र, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २०१८।

३. बृहद्देवता- रामकुमार राय, चौखम्भा संस्कृत संस्थान, वाराणसी, २०२०।

४. शुक्ल-यजुर्वेद-संहिता- शास्त्रीण पण्डित जगदीशलाल, मोतिलाल बनारसीदास, दिल्ली, १९९९।

५. श्रीमद्वाजसनेयिमाध्यन्दिन शुक्लयजुर्वेदसंहिता- शास्त्री डा० रामकृष्ण, चौखम्बा विद्याभवन, वाराणसी, २०१५।


-------


ISSN : 2454-2881

# धर्मशास्त्रदिशा असमीयाविवाहपद्धतिः – एकं विश्लेषणम्

ड° चम्पक कलिता

ध्रियतेऽनेनेति (डु) 'धृञ् धारणपोषणयोः धातोः मन् प्रत्यये सिद्धौ धर्मशब्दः भावनाचारव्यवहारबोधनपरः, धर्मस्य शास्त्रं धर्मशास्त्रम्। चतुर्दशविद्यासु अन्यतममस्ति धर्मशास्त्रम्। धर्मशास्त्रं वस्तुतः धर्मसूत्राणां पद्यात्मका रचनावली। भारतीयपरम्परायामस्य शास्त्रस्य नितरां महत्वं विद्यते। वेदेषु विद्यमानाः बीजरूपविषयाः धर्मसूत्रेषु निबद्धाः सन्ति। "श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः"[१] इत्युक्तं मनुस्मृतौ। पुनः मनुना धर्मलक्षणमुच्यते–

"वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्।"[२]

तत्र मनोः याज्ञवल्क्यस्य, नारदस्य, पराशरस्य च विभिन्नेषु स्मृतिशास्त्रेषु धर्ममूलका विविधविषया समालोचिताः। मनुस्मृत्यादिषु अनेकेषु शास्त्रेषु संस्कारविषयः विस्तरेण आलोच्यते।

"कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत्।
अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु।।"[३]

संस्क्रियतेऽनेनेति संस्कारः। कथमिति संस्क्रियते श्रौतेन कर्मणा स्मार्त्तेन वा पुरुषस्य इति संस्कारः व्यापकार्थे प्रयुज्यते। संस्करणं सम्यक् करणं वा संस्कारः। समुपसर्गात् कृञो घञि निष्पन्नोऽयं संस्कारशब्दस्स्वयमेव स्वलक्षणमप्यभिधत्ते। तद्यथा–आत्मशरीरान्यतरनिष्ठो हीनाङ्गपूरको दोषपमार्जनकरोऽतिशयाधायकश्च विहितक्रियाजन्योऽतिशयविशेष एव 'संस्कार' इत्युच्यते। ऋग्वेदे 'संस्कार' इत्यस्य पवित्रीकरणमित्यर्थः वर्णितः। एवञ्च भुषणार्थकसुडागमविधानेन अलंकरणमित्यर्थोऽपि भवति। येन कर्मणा किञ्चिद् वैशिष्ट्यं शोभना वा जायते, तदेव संस्कारपदवाच्यम्।

जैमिनिसुत्रे संस्कारः शब्दोऽयं पवित्रतार्थे, निर्मलार्थे, उपनयनार्थे वा प्रयुक्तोऽस्ति।[४] शबरस्वामिना उच्यते– 'यदनन्तरं वस्तुनि योग्यताविशेषः आगच्छति तदेव संस्कारपदस्यार्थः।[५] अनेन प्रकारेण मीमांसकास्तु योग्यतामेव संस्काररूपेण स्वीकुर्वन्ति।

संस्कारस्य अभिप्रायोऽस्ति सा शुद्धा धार्मिकक्रिया [६] या जनैः दैहिक-मानसिक-बौध्दिक-परिष्काराय अनुष्ठीयते, येन सः समाजस्य मान्यः सदस्यो भवेत्। एषां संस्काराणामुदेश्यं केवलमौपचारिक-दैहिकसंस्कार एव नास्ति अपि तु जनानां सम्पूर्णव्यक्तित्वस्य परिष्कारपूर्णता अस्ति।

भारतीयसमाजव्यवस्थायां तथा च भारतीय-संस्कृतौ गर्भाधानादीनां क्रियाकलापानां संज्ञा 'संस्कार' इति प्रसिद्धं विद्यते।

संस्कारसंख्याविषये स्मृतिकारेषु नास्ति मतैक्यम्। गौतमधर्मसूत्रे अष्टचत्वारिंशत् संस्काराः वर्णिताः सन्ति। [७] पुनः ब्राह्मौ-दैव भेदेन संस्कार मूलतः द्विविधः इति परवर्तिना स्मृतिकारेण हारीतेनोक्तम्। तस्य मतेन गर्भाधानादिः स्मार्तो ब्राह्मः। पाकयज्ञाः हविर्यज्ञाश्चेति दैवः। वस्तुतः ब्राह्मसंस्कार एवात्र संस्कारपदेन ग्राह्याः। यदयपि केवलं ब्रह्मसंस्कार एव यथार्थसंस्कारो भवति परं निसन्देहं यज्ञेनापि परोक्षरुपेण संस्कारः पवित्रकरणं वा भवति। तत्र गर्भाधानात् मृत्युपर्यन्तं त्रयोदशस्मार्तसंस्काराः यथार्था भवन्तीति मनुना उच्यते। [८] ते यथा- १) गर्भाधानम्, २) पुंसवनम्, ३) सीमन्तोन्नयनम्, ४) जातकर्म, ५) नामधेयम्, ६) निष्क्रमणम्, ७) अन्नप्राशनम्, ८) चुडाकरणम्, ९) उपनयनम्, १०) केशान्त, ११) समावर्तनम्, १२) विवाहः, १३) अन्त्येष्टिश्च। अङ्गिरास्तु पञ्चविंशतिसंख्यका मन्यन्ते। [९] व्याससमृत्यानुसारं-गर्भाधानादिषोड़शसंस्काराः प्रमुखा। तदुक्तं-

''गर्भाधानं पुंसवनं सीमन्त्रो जातकर्म च।
नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया।।
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः।
केशान्तः स्नानमुद्वाहो विवाहग्निपरिग्रहः।।
त्रेताग्निसङ्ग्रहश्चेति संस्काराः षोडश स्मृताः।।'' [१०]

एते गर्भाधानादिषोड़शसंस्काराः सम्प्रति लोकप्रियाः सन्ति। एषु संस्कारेषु विवाहसंस्कारोऽन्यतम्। अयं हि समावर्तनोत्तरकालिकः संस्कारः। समावर्तनान्तं परिभाषिकरुपेण ब्रह्मचर्यस्य समाप्तिरेव विवाहः इत्यर्थः।

वि-उपसर्गात् वह् धातोः धञ् प्रत्यये कृते विवाहशब्दः सिद्ध्यति। वहनं वाहः, विशिष्टो वाहो विवाह इति। ''विवाहः विशिष्टं वहनम्'' इति [११] वेदमन्त्रेष्वपि विवाहशब्दो विशिष्टवहनार्थे पाणिग्रहणलक्षणे पठ्यते। पाणिग्रहणलक्षणे संस्कारेऽपि विवाहशब्दः प्रयुज्यते। विशेषेण वहति पतिर्जायां यत्र स विवाह इति। तस्मात् विवाहो नाम ग्रहणविशेषश्चायं स्वत्वविशेषोत्पत्यनुकुलव्यापाररूपः संस्कारविशेष। चतुर्णामपि ब्राह्मणदिवर्णानां परलोकेहलोकयोः हिताहित विवेचनार्थं अष्टप्रकारका विवाहाः


ISSN : 2454-2881

समुल्लिख्यन्ते।[१२] विवाहविषये मेधातिथि आहः "उपायतः प्राप्तायाः कन्यायाः दारकर्मणार्थः संस्कारः पाणिग्रहणलक्षणम्।[१३] पुनः विवाहः भार्याप्राप्तिर्हेतुः" इति कुल्लुकभट्टः।[१४]

अस्य विवाहस्य द्वे प्रमुखे उद्देश्ये वर्तेते। प्रथमतः भार्या पतिं धार्मिककृत्यस्य योग्यं निर्माति, पुनः सा सुतस्य माताऽपि भवति, पुत्र एव नरकात् रक्षति।[१५] वैदिककालतः आधुनिककालपर्यन्तं विवाहसंस्कारः भारतीयसमाजव्यवस्थायाम् एक पवित्रयज्ञरूपेण विद्यते। असमप्रदेशेऽपि अस्य व्यतिक्रम न परिलक्ष्यते। यो जनः विवाहेन पत्नीमुपलभ्य गृहस्थाश्रमं न स्वीकरोति सोऽयज्ञिपदेन निन्द्यते स्म।[१६]

एकाकी पुरूषोऽसम्पूर्णो भवति, पत्नीसहितस्यैव तस्य सम्पुर्णता जायते इति याज्ञवल्क्यस्मृतौ उक्तमस्ति।[१७] मनुमते आयुषश्चतुर्षु भागेषु आद्यं गुरुकुले उषित्वा द्वितीयभागे पत्नीसहितेन गृहे वस्तव्यम्।[१८] सर्वाश्रमेषु गृहाश्रमस्य जेष्ठत्वं वर्णयन्ति स्मृतिकाराः। मनुमते-यथा सर्वजन्तवोऽनिलं समाश्रित्य वर्त्तन्ते तथैव सर्वे आश्रमा गृहस्थाश्रममाश्रित्य वर्तन्ते। गृहस्थेनैव ज्ञानेनान्नेन च ब्रह्मचर्यादयाश्रमा वर्द्धन्ते। अतो गृही एव सर्वश्रेष्ठः मन्यते।[१९] तेन मतेन गृहस्थाश्रम एव सर्वाश्रमाणां प्राणिनाञ्च योनिरस्ति।[२०]

असमप्रदेशेऽपि कुलरक्षणार्थं विवाहस्य प्रयोजनमङ्गीक्रियते। यतो हि उक्तमस्ति मनुस्मृतौ- "पुत्ररूपनौकया एव संसारस्तीर्यते।"[२१]

**विवाहः** मानवसमाजपक्षे एका संरचनात्मकहत्वस्य सार्वभौमिका व्यवस्था। समाजवैज्ञानिकदृष्ट्या विवाह न केवलं यौनसन्तुष्टिमाध्यम अपि च परिवारस्य स्थापना एव अस्य मूलं उदेश्यं भवति। यतो हि उक्तम्- 'विवाहः परिवारसंस्थापनाया आधारशिलास्वरूपा भवति।[२२]

अनेन प्रकारेण धर्मशास्त्रेषु वर्णितैः प्रमाणैर्विवाहस्य उद्देश्यं महात्म्यञ्च प्रकाशिते जायेते। अत्र मनुस्मृत्यवलम्ब्य विवाहस्य विभागाः प्रदर्श्यन्ते।

मनुना विवाहस्य अष्टविधत्वं स्वीक्रियते। ते यथा- ब्राह्मदैवार्षप्राजापत्यासुरगान्धर्वराक्षसपैशाचश्च। यदुक्तं-

"ब्रह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्याष्टमोऽधमः।।"[२३]

यद्यपि विवाहस्य अनेका प्रकाराः सन्ति तथापि प्रायः धर्मशास्त्रकाराः अस्य अष्टविधत्वमेव स्वीकुर्वन्ति। असमप्रदेशेऽपि मनुस्मृत्योक्ताः केचन विवाहभेदाः प्रचलिताः सन्ति।

**ब्राह्मविवाहः** समाजव्यवस्थायाम् अष्टविधेषु विवाहेषु ब्राह्मविवाहः सर्वोत्तमः विवाहरूपेण मान्यो भवति।

ज्ञान-शीलादि वरयोग्यता एव अस्य विवाहस्य आधारः भवति। कन्याया पित्रा ससन्मानं वरमाहूय तं यथाशक्ति वस्त्रादिनाऽलङ्कृत्य कन्या प्रदानमेव ब्राह्मो विवाहः इत्युच्यते।

यदुक्तं मनुस्मृतौ-

''आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम्।

आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः।'' [२४] इति

प्राचीनकालतः साम्प्रतिककालपर्यन्तं असमप्रदेशेऽपि धर्मशास्त्रानुसारमेव ब्राह्मविवाहस्य साधनं भवतीति परिदृश्यते। अत्रापि कन्याया पिता ससन्मानं वरमाह्वयति। तथा च कन्यां वस्त्रभूषणादिभि अलंकृत्य वराय समर्पयति।

ब्राह्मविवाहोत्पन्नपुत्रः यदि सुकृत-कृद्भवति तदा दश पूर्वान् पित्रादीन् अन्वयिनी मृतान् दशचापरान् पुत्रादीन् आत्मनं चैकविंशकं पापान्मोचयति। [२५] मनुस्मृतौ अभिहितं प्रयोजनमिदं असमप्रदेशेऽपि विश्वसन्ति जनाः।

**दैवविवाहः** यज्ञानुष्ठाने प्रारब्धे यथाविधि कर्म कुर्वते ऋत्विजे अलङ्कृतायाः कन्याया दानं दैवविवाह इति मन्वादय आचक्षते। तदुक्तं-

''यज्ञे तु वितये सम्पगृत्विजे कर्म कुर्वते।

अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते।।''[२६] इति

दैव विवाहोत्पन्नः पुत्रः सप्तपरान् पित्रादीन् सप्त अवरान् पुत्रादीन् पापान्मोचयति। [२७] अस्यविवाहस्य प्रचलनम् असमप्रदेशेऽपि धर्मशास्त्रानुसारमेव प्रचलति।

**आर्षविवाहः** यस्मिन् विवाहे गोमिथुनं एकंद्वेवा वरात् आदाय कन्याया दानं भवति तद् आर्षविवाह इत्युच्यते। अस्मिन् विवाहे धर्मतः धर्मार्थं यागादिसिद्ध्यर्थं विधिवदकन्या प्रदानं क्रियते। तथाहि मनु-

''एकं गोमिथुनं द्वे वा-वरादादाय धर्मतः।

कन्याप्रदानं विधिवदार्षो धर्मः स उच्चते।'' [२८]

आर्षविवाहोत्पन्नश्च त्रीन् पित्रादीन् त्रींश्च पुत्रादीन् पापान्मोचयति। [२९] साम्प्रतिककाले असमप्रदेशे मनुस्मृतौ उक्तानुसारं आर्षविवाहसम्पादनं न परिलक्ष्यते।

**प्रजापत्यविवाहः** असमप्रदेशे प्रचलनमधिक दृश्यते। उभौ युवां सह धर्म चरतां, न पृथगिति वाचाऽनुभाष्य अहं गृहस्थाश्रमस्थं एव धर्मं चरिष्यामि, नान्यश्रमस्थं इति वरं प्रतिश्राव्येत्यर्थः। यदि न्युनता वक्षमाणा नोपपद्येत् अभ्यर्च्य, वरमिति शेषः। कन्याप्रदानपुरसरं यो विवाहसरकारः विधीयते स प्राजापत्य विवाह इत्युच्यते। तथाहि मनुनापि प्रोक्तम्-


ISSN : 2454-2881

गौतमधर्मसूत्रे वरस्य विद्या, शीलः, चरित्रः, पुंसत्वस्तथा बान्धवयुक्तता इत्यादयः स्वीत्रि [illegible]सारं कुल शीलहीनः, नपुंसकः, पतितः मिर्गी-कोटादयात् ग्रस्तः, विधर्मीश्च वरः त

इत्येवं प्रकारकेषु वर-वधूयोग्यतानिरुपकेषु नियमेषु केचनः सम्प्रत्यपि असमप्रदेशे अनु [illegible] तु सर्वे इमे नियमाः प्रचलन्ति आधुनिककाले इति वक्तव्येनालम्।

विवाहकार्ये कन्यादातृ कः भवतीति विषयमपि शास्त्रेषु निर्दिश्यते। तत्र पिता-पितामहो- कन्यायाः सकुल्यः जननी वा कन्यादातारः भवन्ति।[४१]

विवाहसंस्कारविधयः अनेकेषु गृह्यसूत्रेषु उल्लेखिताः सन्ति। तेषां मध्ये आश्वलायनगृह्य बौधायनगृह्यसूत्रम्, आपस्तम्बगृह्यसूत्रम्, पारस्करगृह्यसूत्र, गोभिलगृह्यसूत्रञ्चेति प्रमुखाः। तत्र वरप्रेक्ष ब्राह्मणेभ्यो भोजनदानम्, विवाहहोमः, वरस्य वधूगृहप्रयाणम्, समीक्षणम्, पाणिग्रहणम्, सप्त [illegible] मधुपर्कः, अलंङ्करणम्, हृदयस्पर्शः, कर्णजपः, पुनः पाणिग्रहणम्, अग्निप्रदक्षिणा, अश्मारोह [illegible] गृहप्रवेशः वृषचर्मोपवेशनम्, ध्रुवादि दर्शनम्, त्रिरात्रव्रतम्, चतुर्थीकर्म इत्यादयः वि बौधायनगृह्यसूत्रे उपलभ्यन्ते।[४२]

वैदिककाले विवाह एकः धार्मिककार्यरूपेण स्वीकृत आसीत् विधिवत् विवाहदसंस्कारं गृहस्थाश्रमे प्रवेशनं प्रत्येकस्य स्त्री-पुरुषस्य धार्मिकं कर्तव्यमासीत्। अपत्योत्पादनं, धर्मका अग्निहोत्रादीनि, शुश्रूषाऽतिथ्यादीनां, रतिः स्त्रीसम्पर्कजा प्रीतिः, स्वर्गप्राप्तिरित्यादयो भार्याधीना वि एव विवाहस्य प्रयोजनरूपेण मनुस्मृतौ उल्लिख्यते।[४३] असमप्रदेशेऽपि विवाहव्यवस्था एका सामा [illegible] मन्यते।

अनेन प्रकारेण आधुनिकसमाजव्यवस्थायां विवाहसंस्कारस्योपयोगिता परिलक्ष्यते। भारतीयसं षोडशसंस्काराणां मध्ये समावर्तनादनन्तरं क्रियमाणस्य विवाहसंस्कारस्य महत्वमस्ति। धर्म-अर्थ-क मोक्षेत्यादिचतुर्वर्गफलसिद्धये विवाहसंस्कारस्य गुरुत्वमस्ति।४४

इत्थं धर्मशास्त्रोक्तान् विषयान् अनुसृत्य अनुकुल चिन्तनेन विवाहसंस्कारसम्पादनेन गार्ह जीवनस्य सार्थक्यं सुखमयता च संलभ्यते इत्यलं विस्तरेण।

सन्दर्भाः :-

१. मनुस्मृतिः, [illegible]
२. [illegible]
३. याज्ञवल्क्यस्मृतिः, १.५५
४. गौतमधर्मसूत्रम्, [illegible]

५. तदेव, शाबरभाष्यम्, ३.१.३

६. मनुस्मृतिः, २.२६

७. गौतमधर्मसूत्रम्, १.८.१४-२४

८. मनुस्मृतिः, २.१६

९. याग्यवल्क्यस्मृतिः, १.११-२४

१०. व्यासस्मृतिः, १.१३-१५

११. शब्दकल्पद्रुमः, खण्डः, ४, पृ. ४२७

१२. मनुस्मृतिः, ३.२०

१३. तदेव, भाष्यम्,

१४. तदेव

१५. मनुस्मृतिः, ९.२८

१६. तैत्तिरीयब्राह्मणः, २-२-२-६

१७. याज्ञवल्क्यस्मृतिः २.१४

१८. मनुस्मृतिः, ४. १

१९. तदेव, ३.७७-७८

२०. तदेव, ६.८७

२१. पुत्रेण लोकाञ्जयति पौत्रेणानस्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रन्धस्याप्नोति विष्टपम्।। - तदेव, ९.१३७

२२. स्मृतिविमर्शः, पृ. १४३

२३. मनुस्मृतिः, ३.२१

२४. तदेव, ३.२७

२५. भाष्यम् (गोविन्दराजः) ३.३७

२६. तदेव, ३.२८

२७. तदेव, ३.३८

२८. तदेव, ३.२९

२९. तदेव, ३.३८

३०. तदेव, ३.३०


ISSN : 2454-2881

३१. तदेव, भाष्यम् 'कुल्लुक', ३.३१
३२. तदेव, ३.३२
३३. तदेव, भाष्यम्, ३.३३
३४. मनुस्मृतिः, ३.३४
३५. महाभारतम्, अनु. पर्वः, अः, ४४
३६. षोडशसंस्कारविमर्शः, पृ. ५३
३७. मनुस्मृतिः, भाष्यम् ३.१०
३८. तदेव, ३.८
३९. तदेव, ३.९
४०. याज्ञवल्क्यस्मृतिः, १.५५
४१. षोडशसंस्कारविमर्शः, पृ. ८६
४२. तदेव, पृ. ८८
४३. मनुस्मृतिः, ९.२७–२८
४४. तदेव, २.२८

**सहायकग्रन्थाः**–


१. पाण्डेय, उमेशचन्द्र (सम्पा) याज्ञवल्क्यस्मृतिः, चौखम्बा संस्कृत संस्थान, वाराणसी, २००३
२. पाण्डेय राजवली, हिन्दुसंस्कृति, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१४
३. मिश्र, शङ्करकुमार, षोडशसंस्कारविमर्शः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१८
४. त्रिपाठी, प्रशान्त, स्मृतिविमर्शः, विद्याप्रकाशन, कानपुर, २००८
५. कायस्थ, पुतली, असमर विभिन्न जनगोष्ठीर विवाहपध्दति, भवानी वुक्स, गुवाहाटी, २०१४
६. शर्मा, किरण, मनुसंहिता, चन्द्रप्रकाश, गुवाहाटी, २०१५
७. सेनशास्त्री, मुरारीमोहन, दीपाली वुक्हाउच, कलिकता १९९४
८. Dave, J.H. (ed.) *Manusmṛti*, Bharatiya Vidya Bhavan, Bombay, 1975
९. Deshpande, Maitreyee, *Manusmrti*, New Bharatiya Book-Corporation, Delhi. 2010

# कालिदासस्य काव्ये वर्णिता यौवनकालस्य सार्थकता- एका समीक्षा

ड. देबव्रतबाडइ

काव्य-कला-रश्मिभिर्भासमानोऽयं महाकविः कालिदासः न केवलं संस्कृतसाहित्यजगति अपि तु विश्वसाहित्येऽपि भास्करोऽस्ति। भारतवर्षस्य रत्नगर्भेयं वसुन्धरा धन्यास्ति यत्र विश्वकविश्रेष्ठः कालिदासो जातः। के जनाः न जानन्ति कालिदासस्य वैदुष्यपूर्णाकाव्यामृत-रसास्वादेनाप्लाविता काव्यप्रतिभा। काव्यमर्मज्ञैरपि तत्कृतकाव्यसौष्ठवं उन्मुक्तकण्ठेण प्रशंस्यते-

"पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।
अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभुव"।।

यद्यापि कालिदासस्य सर्वासु रचनासु प्रधानतया शृङ्गाररसं प्रति अभिरुचि विशेषरूपेण परिदृश्यते तथापि अयं कविः कालिदासः भारतीयकलायाः भारतीयसंस्कृत्याः च सर्वश्रेष्ठः मर्मज्ञव्याख्याताऽपि वर्तते। कालिदासः स्वयं तस्य आत्मोपलब्धेन कथयति यत्-

"शौशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धके मुनिवृत्तिनां योगेनान्ते तनुत्यजाम्"।।[१]

मानवजीवनस्य जन्मतः परलोकप्राप्तिपर्यन्तम् अनेके स्तराः सन्ति। येषां मध्ये शारीरिक-मानसिक-बौध्दिक-विचारोऽपि भिन्नः भवति। मानवस्य अस्य जीवनस्य स्तरं पञ्चदशवर्षतः पञ्चत्रिंशत् वर्ष पर्यन्तम् अर्थात् विंशतिवर्षायुः यौवनकालस्य अन्तर्गतः। मनोवैज्ञानिकानां मतानुसारेण यौवनकालः भावनात्मकस्य वौचारिकस्य च संक्रान्तिकालोऽपि निर्धायते। यदि वयम् अस्याः यौवनावस्थायाः सम्यग्रूपेण सञ्जीकरणं कर्तुं न शक्नुमः तर्हि अस्माकं समग्रजीवनं सुष्ठरूपेण न व्यतीतम्।

यौवनकालस्य इयं प्रकारका समस्या न केवलं वर्तमानकाले परिदृश्यते अपि तु बहुप्राचीनकालादारभ्य कविकालिदासस्य समयेऽपि इयं समस्या अवश्यमेव आसीत्। किञ्च साहित्यं समाजस्य दर्पणं भवति, साहित्यस्य माध्यमेन साहित्यकाराः तत्कालीकसमाजस्य समाजचित्रं वर्णयन्ति।


ISSN : 2454-2881

तद्रुपप्रकारेण कालिदासः तस्य मेघदूतखण्डकाव्यस्य पुर्वमेघभागे युवकानां वेश्याभिः सह यादृशी वर्णना प्राप्यते तन्माध्यमेन बोधगम्यते यत् तस्मिन् समयेऽपि युवसमाजो वासनात्मकासत्यां निमज्जित आसीत्।

''वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
बिद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि''।।[२]

न केवलं वेश्यां प्रति आसक्तिः, अपि तु तत्कालीकयुवसमाजः मदिरासेवनम अकरोत् अपि च तेषां मनसि कोऽपि द्विधाभावः ग्लानिभावश्च नास्ताम्।

''गीतान्तरेषु श्रमवारिलेशैः किंचित्समुच्छ्वासितपतत्रलेखम्।
पुष्पासवाधूर्णितनेत्रशोभि प्रियामुखं किंपुरुषश्चुचुम्बे''।।[३]

कालिदासकालीकसमये समाजस्य सर्वस्तरे गीत–नृत्यादीनामपि बह्वा ख्यातिरासीत् यस्मात् कारणात् युवावस्थायाः मनोरञ्जनकरणार्थम् अनेकानि उपादानानि विराजन्ते आसन्। अस्मिन् समयकाले उभ्दूतः कविः कालिदासः तस्य काव्यस्य माध्यमेन एककुशलसामाजिकरूपेण तथा राष्ट्रहितचिन्तकरूपेण स्वीयम् अधिष्ठीतवान्। संस्कृतम् अस्ति अस्माकं संस्कृत्याः धारकः वाहकः च, तत्कारणेन कालिदासः स्वीयरचनायां यौवनकालस्य सार्थकतासम्पर्के नैतिकदृष्ट्या आध्यात्मिकदृष्ट्या च सरलरूपेण वर्णितवान्। कालिदासः एतद् जानाति यत्, मानवजीवनस्य युवावस्थायां या शक्तिः, उत्साहम् उन्मादना च भवति सा मानवजीवनस्य कस्मिन्श्चिद्काले न भवति। किन्तु अस्याः शक्तेः क्षणमात्रदुरूपयोगेन मानवजीवने हानिः भवतीति। तर्हि राष्ट्रस्य समाजस्य च कल्याणाय सर्वदा सार्थकयौवनस्योपरि निर्भरं भवति। तत्कारणेन कालिदासः तस्य रचनायाः त्रिवर्गेषु धर्मार्थकाममोक्षेषु धर्मएव सर्वश्रेष्ठ इति स्वीकृतवान्–

''अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि।
त्वया मनोनिर्विषयार्थकामया यदेकं एव प्रतिगृह्य सेव्यते''।।[४]

समसामयिककाल इव कालिदासीयकालेऽपि अधर्मस्य, कदाचारस्य, कामस्य संहारस्य च सर्वत्र प्राधान्यमपि आसीत। कविः कालिदासः एतद् स्पष्टरूपेण जानाति यत्, यदि समाजे मानवस्य कल्याणं, राष्ट्रस्य कल्याणं सर्वदा अक्षुण्णरूपेण प्रतिष्ठापनं भवेत् तर्हि मदनस्य कामस्य दहनम् अत्यन्तम् आवश्यकम्। यदि मानवाः सचेतनाः, जागरुकाः न भवन्ति तर्हि अस्माकं चित्तं धर्मविरुध्दः कामं सर्वदा आकर्षयति। केवलमात्रं मानसिकजागरुकतया वयं अधोगामी मानसिकतां भस्मीभूता कर्तुं शक्नुमः।

कालिदासेन तस्य कुमारसम्भवकाव्ये दृष्टान्तरूपेण उल्लिखितं यत्, धर्मेण आधारितकामस्य प्रेम्णः च प्राप्त्याः एकमेव साधनम् अस्ति कठोरतपस्या। किञ्च स्व-शरीरस्य तापं व्यतीतं एवञ्च सर्वेषु प्रकारेषु दुर्वासनायाः भस्मीभूतां विना कदापि धर्माधारितं प्रेम उभ्दूतं जातं वा न भवितुं शक्नोति। कुमारसम्भवकाव्यस्याभ्यन्तरे दृश्यते यत्, महादेवशिवं पतिरूपेण प्राप्तुमिच्छती देवीपार्वती प्रथमतः स्वशारीरिकसौष्ठवस्य सौन्दर्यस्य च वलेन माध्यमेन प्रचेष्टां करोति–

''मध्येन सा वेदिविलग्नमध्या वलित्रयं चारु बभार बाला।
आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्''।।[५]

तदुपरि देवादिदेवः महादेवशिवम् आत्मवशीकरणार्थं देवीपार्वत्याः यौनभावनायाः मानसिकवृत्तिम् अधोमुखी कार्यं करोति–

''विवृण्वती शैलसुताऽपि भावमङ्गैः स्फुरद्धालक दम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन''।।[६]

परन्तु, धर्माचारणविरुध्दकामकार्यं सर्वदा स्व स्वामित्त्वमिच्छति तथापि तत्र देवाधिदेवः सामान्यः पुरुषः नासीदेव। महोदवस्य यौनभावनायाः सह क्षुद्रेन्द्रियाणां सम्पर्कः कदापि मनसा न भवति। तर्हि सः महादेवस् तृतीयं ज्ञाननेत्रमुध्दाटयति एवञ्च यस्य ज्वालाया कामदेवमदनस्य दहनं भवति। एतद् स्वचक्षुसमक्षं कामदेवस्य भस्मीभूतम् अवस्था दृष्टा रूपगर्विता पार्वत्याः स्वरूपं ह्रदयेत अनिन्दत्–

''तथा समक्षं दहता मनोभवं पिनाकिना भग्नमनोरथा सती।
निनिन्दरूपं ह्रदयेन पार्वती प्रियेषु सौभाग्यफला हि चारुता''।।[७]

एतद्प्रकारेण रूपगर्विता पार्वत्या सम्यग्तया बोधगम्यते यत् कोऽपि महत्कार्यं सर्बदा उच्चं भवति, महत् भवति। तदा तस्य प्राप्त्याः सर्वदा साधनमपि उच्चं महान् च भवति। कदापि वयम् अधमैः साधमैः उत्तमलक्षस्य प्राप्तिं कर्तुं न शक्नुमः। तत्पश्चात् पार्वती महादेवं प्राप्तार्थं कठोरतमं तपस्यां करोति। कविना उक्तं यत् किञ्चित् धर्माधारितस्य प्रेम्णः प्राप्तर्थम् एकमात्रं साधनम् अस्ति कठोरतपस्या। पार्वती कठोरतपस्याया अन्ततः स्वीयभिष्टं महादेवस्य प्रेम फलरुपेण प्राप्तवती–

''इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।
अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः''।।[८]

महादेवः पार्वत्याः तपस्यां दृष्ट्वा कथिवान् यत्–

 ISSN : 2454-2881

''अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते''।।[९]

कालिदासेन तस्य विश्वविश्रुते अभिज्ञान-शकुन्तलम् इति नाटके प्रथमं वर्णयति यत् कथं यौवनकालः शारीरिकसुखानां कामानां च मनोवाञ्चित दिशासु गन्तुं प्रेरयति। अन्ते सः एतदपि वर्णयति यत् यौवनकालस्य सार्थकता केवलमात्रं मानवस्य आत्मचेतनायाः माध्यमेन आध्यात्मिकधर्ममार्गं प्रति प्रेरयति। अभिज्ञान-शाकुन्तलनाटकस्य प्रारम्भिकेषु त्रिषु अङ्केषु कविकालिदासेन वर्णितं चित्रं केवलमात्रं कामनावासनायाः परितृप्तिः। तत्र केवलमात्रं शारीरिकं रूपसौन्दर्यस्य प्राध्यान्यं प्रदीयते-

''इदमुपहितसुक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणदाच्छादिना वल्कलेन।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनध्दं पाण्डुपत्रोदरेण''।।[१०]

तथा च-

''अधरः किसलयरागः कोमलविटपानुकारिणौ बाहु।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नध्दम्''।।[११]

तर्हि तत्र वर्णितं प्रेम केवलमात्रम् इन्द्रियसुखप्रदायकं वासनात्मकं भवति। तस्याधारः केवलमात्रं बाह्यिकरूपं शारीरिकसौन्दर्यम् इत्यादि प्रभृतीनां मध्ये सीमावध्दो भवति।

अस्य नाटकस्य नायिका शकुन्तला आश्रमकन्या, कुसुमसमा सुन्दरी, उद्यामयौवनेन युक्ता लावण्यमयी रूपवती च। नाटकस्य नायकः राजा दुष्यन्तः सुश्री तरुणः, यः सर्वदा रसिकः नव-नव-मधुलोलुपः भ्रमरवदस्ति। सः राजा दुष्यन्तः रूपयौवनसम्पन्नायाः शकुन्तलायाः रूपेण मुग्धो भवति। आश्रमजनान् वनगजात् विध्नात् त्रातुं राजा दुष्यन्तः केचित् दिवसाः आश्रमे तिष्टति। एवं नाटकस्य तृतीयङ्कपर्यन्तं कविः कालिदासः कामासक्तयोः उभोः दुष्टन्तस्य शकुन्तलायाश्च प्रेम्णः तथा च तयोः कामासक्तिपुर्णं प्रसङ्गं वर्णितवान्। अत्र कविः तस्य काव्यप्रतिभायाः माध्यमेन बहुकौशलेन अवलम्बेन दुष्यन्त-शकुन्तलायोः परस्परासत्त कारणं युवावस्थायाः स्वाभाविकी रति इति वर्णयति। या रतिः समाजस्य

सर्वेषां युवकानां युवतीनां च हृदयम् आह्लादयति सर्वदा।

तपोवनवासिनी अपि शकुन्तला तपोवनस्य पवित्रतायाः रक्षणाय ये नियमाः सन्ति तद् विषये ध्यानं न दत्त्वा सा राजा दुष्यन्तेन सह गान्धर्वविवाहे आबध्दं भवति। यौवनावस्थाया रति–भावनायाः प्रभावेन तयोः मनोवस्था विचलिता भवति। यौवनकालस्य अस्य भ्रान्तिकार्यस्य परिणामस्वरूपं परवर्तीसमये चतुर्थाङ्के शकुन्तला दुष्यन्तस्या सम्राज्ञी तु न भवत्येव अपितु सा दुष्यन्तस्य राजप्रासादे दासीरूपेणापि न स्थानं प्राप्तुं समर्थवती। एतदवस्थायां सा पितुः कण्वस्य आश्रमेऽपि पुनरागमे न समर्था भवति।

राजा दुष्यन्तोऽपि शकुन्तलापरित्यागरूप–कर्मणा बहुकालपर्यन्तम् उद्विग्न आसीत्। पश्चाद् राजा दुष्यन्तः शकुन्तलायाः विरहाग्नौ पश्चत्तापे तापितवान् भवति एवञ्च उक्तम्–

"वसने परिधूसरे वासना नियमक्षाममुखी धृतैकवेणिः।
अतिनिष्करूणस्य शुद्धशीला मद दीर्घं विरहव्रतं बिभर्ति"।।[१२]

नाटकस्य अन्तिमभागे कविः कालिदासः वर्णयति ऋषेः मारीचस्य आश्रमे दुष्यन्तः शकुन्तलयोः अस्य दिव्यप्रेम्णः मिलनस्य माध्यमेण कथा समाप्त जाता। अत्र कविः सम्भवतः मनुष्याणां कृते एतद्वार्तारपि वाञ्छति यत्, जगति प्रेमनाम्ना प्रथितः सांसारिकः अनुरागः य अतिसुलभः, अनायासेन तत् सर्वे प्राप्तं शक्नुव परन्तु तस्य शुध्दस्वर्गीयरूपस्य प्राप्तिः केवलमात्रं त्यागेन कठोरतमतपस्यया: निस्वार्थभावनया विना च कदापि न सम्भवति।

कालिदासेन तस्य अपरेकगीतिकाव्ये मेघदूतेऽपि वर्णयति यत् कोऽपि यक्षः तस्य कामजर्जरितवासनाया कारणात् अधिकारप्रमत्तो भूत्वा स्वस्य स्वामिनः कोपकारणात् एकवर्षपर्यन्तं प्रियाविच्छेदरूपेण शापेण शापितः। अत्र कविः कालिदासः अस्य कामातुरयक्षस्य प्रेमं विच्छेदस्य माध्यमेन परिशुध्दं परिस्कृतं कृत्वा पुनः तं व्रतचारिण्या पत्न्या सह मेलनस्य योग्यं कारितवान्। अत्र कविना लौकिकजगतः कामासक्तियुक्तं प्रेम अलौकिकं रूपं प्रदीयते। कवि अत्र स्वीयकल्पनया, कविप्रतिभया काव्यकुशलतया च कथावस्तुनि शिवरूपम् इति भावस्य सहितं सम्पृक्तमासीत्। किञ्च कामातुरः यक्षः यस्मिन् मेघे दूतस्य कल्पनां कृत्वा तस्य पत्नीं प्रति कामविरहं व्यक्तं करोति तं मेघं महादेवशिवं प्रति ध्यानस्थं भवितुम् अपि परामृशति–

"तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत्सिध्दैरूपचितबलिं भक्तिनम्रः परीयाः।


ISSN : 2454-2881

यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्धूत पापाः
सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः''।[१३]

कामस्य संहारकः शिवः प्रसन्नो भुत्वा मेघं कैलाशवासं प्रददाति। एतद् प्रकारेण महाकविः कालिदासः तस्य रचनया कामभावपुर्णमानवानां यौवनकालेन सहितं धर्मस्य तथा च योगस्यापि एकां मनोमुग्धकरसङ्गतिं वर्णयति। उपर्युक्तेषु त्रिपुकाव्येषु कविः कालदिासः सम्यगरूपेण प्रदर्शयति यत् मानवानां यौवनकालस्य सार्थकता न केवलं उग्रयौवनाभिलासेन, न कामना-वासना पूरणेन वा भवति। मानवानां यौवनकालस्य सार्थकता केवलमात्रम् अनुशासनेन व्रतेन नैसर्गिकप्रेम्णा च समायाति। तत्र केवलं जीवनस्य उन्नतिसाधनस्य कृते धर्मानुसारस्य कामस्य उपासना वाञ्चनीया। यः कामः, यः अनुरागः मानवानाम् उन्नतिमार्गे, कर्तव्यसम्पादने विघ्नम् आनयति सः सर्वदा वर्जनीयः।

यद्यपि समसामयिककाले युवक-युवतयः यौवनकालं प्राप्ताः सन्तः प्रायशः क्षणकालिकसुखलाभाय सर्वदा नियोजिताः दृश्यन्ते। तत्कारणेन तेषां मध्ये कापि मानसिकी शारीरिकी च शान्तिः न वर्तते। ते स्व स्व स्वार्थलाभाय सर्वदा व्यतीव्यस्ता सन्तः, न अनुभवन्ति यत् त्यागस्य तथा तपस्यायाः च गभीरसाधनां विना किमपि महत्कार्यं न सम्भवति। अस्माकं वैदिक-संस्कृतिं त्यक्त्वा पाश्चात्यदेशीयसभ्यताया अनुकरणम् एव आधुनिकता इति मन्यन्ते। किन्तु या आधुनिकता समाजे जीवने वा कापि स्थितिं शान्तिं नीतिं वा प्रदातुं न शक्नोति सा न अस्माकम् आकांक्षिता। किन्तु अस्माकं भारतीयवैदिकसंस्कृतिः मानवानां सुख-समृध्दि-स्वस्तिप्रदानाय समर्था या सम्भता मानवान् कल्याणमुखीमार्गे प्रेरयितुं सक्षमा। तत्कारणेन यदि वयं युवानः त्यागस्य आचरणेन तपस्यायाः माध्यमेन नैसर्गिकप्रेम्णा च मानवीयमूल्यबोधान् पुरस्कृत्य जीवनस्य विकासं कर्तुं शक्नुमः तर्हि जीवनकालस्य यौवनभागस्य सार्थकता भविष्यति।

**पादटीका -**

१. रघुवंशम्, १.८

२. मेघदूतम्, (पूर्वमेघः), २७

३. कुमारसम्भवम्, ३.३८

४. तत्रैव, ५.३८

५. तत्रैव, १.३९

ISSN : 2454-2881

६. तत्रैव, ३.६८

७. तत्रैव, ५.१

८. तत्रैव, ५.२

९. तत्रैव, ५.८६

१०. अभिज्ञान-शकुन्तलम्, १.१९

११. तत्रैव, १.२१

१२. तत्रैव, ७.२१

१३. मेघदूतम् (पूर्वमेघ), ५९

**सहायका: ग्रन्था -**


१. अभिज्ञान-शाकुन्तलम् सम्पादकः- सत्यनारायणचक्रवर्ती, प्रकाशकः- संस्कृतपुस्ककभण्डारः, कलिकाता, १९९८।

२. तत्रैव, सम्पादक : - एम.आर.काले, प्रकाशकः - मोतिलालवेनारसीदास, देहली, १९९४।

३. कुमारसम्भवम्, सम्पादकः - सुधाकरमालवीयः, प्रकाशकः- चौखम्बाकृष्णदासअकादेमी, वाराणसी, २०१४।

४. तत्रैव, सम्पादकः- श्यामापदभट्टाचार्यः प्रकाशकः - संस्कृतवुकडिपो, कलिकाता, २०१८।

५. मेघदूतम्, सम्पादकः - एम. आर काले, प्रकाशक : - मोतिलालवेनारसीदासः, देहली, १९७४।

६. तत्रैव, सम्पादक : - गोपालरघुनाथमन्दरगीकरः, प्रकाशकः - भारतीयवुककर्पोरेशन्, देहली, १९९८।

७. रघुवंशम्, सम्पादक : - आर. डी. कर्मरकारः, प्रकाशकः - चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, २००३।

८. तत्रैव, सम्पादकः - उदयचन्द्रबन्दोपाध्यायः, प्रकाशकः - संस्कृतवुकडिपो, कलिकाता, २०१८।



ISSN : 2454-2881

# अथर्ववेदे पर्यावरणम्- एका समीक्षा

ड॰ प्रणवज्योति डेका
ड॰ बर्णाली बरठाकुर

वैदिकवाङ्मयमतिव्यापकं विस्तृतञ्चेति। इदं तु भारतीयपरम्परायाः संस्कृत्याश्च दर्पणम्। चतुर्षु वेदेषु [१] न केवलं तात्त्विकचिन्तनम् अपि तु मानवहिताय वैज्ञानिकचिन्तनं प्रकाश्यते। ज्योतिष-रसायन-भौतिकी-खगोल-आयुर्वेद-वास्तुविज्ञान-कृषिविज्ञान-पर्यावरणविज्ञानादीनां विशालं ज्ञानभाण्डारमस्ति वैदिकवाङ्मयम्। वेदेषु अथर्ववेदो बहुलविशिष्टता निदधाति। जीवनं सुखसमन्वितकर्तुं येषां साधनानां अपेक्षा अस्ति तेषां सिद्ध्यर्थं वेदेऽस्मिन् विधानं विहितमस्ति। अथर्ववेदे पर्यावरणं विशेषभावेन वर्णितमस्ति। वेदेऽस्मिन् पर्यावरणसंरक्षणार्थं प्रेरणा प्रदत्ता तथा उपायाश्च वर्णिताः।

सर्वेषां प्राणीनां जीवनस्याधारभूतमस्ति पर्यावरणम्। परितः आवरणं पर्यावरणम्। परितः आवृणोति आच्छादयति सर्वान् अस्मान् यत् तत् पर्यावरणम्। ये पदार्थाः मानवं परितः आच्छादयन्ति जीवनञ्च प्रभावयन्ति ते पर्यावरणशब्देन गृह्यन्ते। परि-आ-√वृ-ल्युट् इत्यनेन पर्यावरणशब्दो निष्पन्नो भवति। परिवेशो नाम्नाऽपि पर्यावरणं परिचितम्। पृथिवी-वायु-जलम्-आकाश-प्रकाश-वनस्पतयः-पशु पक्षिणः इत्यादयः पर्यावरणस्य प्रमुखानि तत्त्वानि। अस्मिन् जगति सर्वे प्राणिनः पृथिवीं-वायुं-जलञ्च आश्रित्यैव जीवन्ति। अतः पर्यावरणसंरक्षणं सर्वेषां कृते अतीव प्रयोजनीयम्। अथर्ववेदे पर्यावरणसंरक्षणतत्त्वेषु जलं-वायुः-वनस्पतयः (पृथिवी)- तत्त्वत्रयमेव प्रमुखं मन्यते। उक्तञ्च-

त्रीणि च्छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम्।
आपो वाता ओषधयस्तान्येकस्मिन् भुवन आर्पितानि।। [२]

तत्त्वत्रयेषु प्रथमं जलम्। जलशब्दस्य अपराः अर्थाः तु भेषजं, रोगनाशकं, आयुवर्ध्दकम् इत्यादयः। अथर्ववेदे जलस्य भेषजतत्त्वं प्राप्यते। आप एव विश्वस्य सर्वस्य रोगस्य भेषजीः।

यथोक्तं- आप इद् वा उ भेषजीरापो अमीवचातनीः।
आपो विश्वस्य भेषजीस्तास्त्वा मुञ्चन्तु क्षेत्रियात्।। [३]

ऋग्वेदे अपि उक्तमस्ति यत्- ''अप्सु मे सोमो अब्रवीद् अन्तर्विश्वानि भेषजा'' इति। [४] रोगनाशने

जलं प्रमुखम्। अतः जीवनस्य संरक्षणार्थं जलस्य संरक्षणं परमावश्यकं प्रतीयते। शुध्दं जलं मनुष्याय दीर्घायुप्रदायकं, प्राणरक्षकञ्च वर्तते। भोजनस्य पाचने जलाधिकस्य पानम् आवश्यकं भवति। यथोक्तं अथर्ववेदे-

आपो भद्रा घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत् ताः।
तीव्रो रसो मधुपृचामरंगम आ मा प्राणेन सह वर्चसा गमेत्।।[५]

अर्थात् आपो मङ्गलमया तथा घृतमिव पुष्टिदाता भवति। अत्र इयं धारणा वर्तते यत् जलस्य समुचितप्रयोगेण प्राणिनां बल-तेज-दृष्टि-श्रवणशक्तेश्च वृध्दिर्जायते।[६]

इयं पृथिवी सर्वतः वायुमण्डलेनावृता। वायुः प्राणिनां प्राणधारकः। श्वसनमाध्यमेन मानवाः अक्सीजननामकं प्राणवायुं गृह्णन्ति येन मानवाः जीविताः।[७] अथर्ववेदे वायोः गुणाः वर्णिताः भवन्ति। तत्र वायुः विश्वभेषज अर्थात् सर्वव्याधिनिवर्तक इति कथ्यते, यतोहि वायुः सर्वान् रोगान् निवारयति, सर्वजगद्रक्षणाय संचरति। उक्तञ्च-

आ वात वाहि भेषजं वि वात वाहि यद् रपः।
त्वं हि विश्वभेषज देवानां दूत ईयसे।।[८]

वायुमण्डलस्य शुध्दीकरणार्थं वेदेषु होमस्य विधानं कृतम्। होम-यज्ञानुष्ठानादिषु विविधपारिवारिकधार्मिककार्येषु यानि आहुतिद्रव्याणि विधीयन्ते, तानि सर्वाणि पर्यावरणपरिष्करणाय अपि समुद्दिष्टानि। आहुत्यर्पणोत्थिताः धूमाः वातावरणपरिशुध्दिकारकाः। घृतदध्यादीनि होमद्रव्याणि तदाधारभूतानां पशूनां सुरक्षार्थं प्रेरयन्ति स्म, यतः प्रकृत्याः सन्तुलनं सञ्जायते। ब्रीहि-यव-तण्डुल-गोधूमादयो वनस्पतिजाः पदार्थाः यज्ञ-होमादि-कर्मसु प्रयुक्ताः सन्तो मेघ-वृष्टि-सहायतां कुर्वन्ति। नानाविधानां मूल-पत्र-पुष्प-फलादीनां मानवजीवनक्षेत्रे व्यवहारेऽपि प्रकृत्या सह निविड़सम्पर्कं द्योतयति। होमो वायुं जलं भूमिं च परिशुध्दं करोति, रोगेभ्यो मुक्तिः ददाति। राजसूययागवर्णनप्रसंगे शतपथब्राह्मणे उक्तमस्ति यत् भूमेः नैर्ऋतरूपं[९] होमेन शमितवान् भवति।[१०]

पर्यावरणरक्षा अस्ति विश्वस्य महती समस्या। पर्यावरणविशेषज्ञानुसारं वनस्पतयरेव पर्यावरणसुरक्षायै सर्वाधिकम् उपयोगिनः। मनुष्याणां कृते आशीर्वादस्वरूपाः सन्ति वनस्पतयः। वनस्पतयो वायुमण्डलस्य सन्तुलनाय अतीव सहायकाः भवन्ति। मानवसहितानां सर्वेषां जीवानां जीवनोपयोगी भोजनतत्त्वप्राप्तेः वृक्षोऽस्ति मूलस्रोतः। मत्स्यपुराणे उक्तमस्ति यत् एको वृक्षः दशपुत्रस्य समतुल्यो भवति। तद्यथा-


ISSN : 2454-2881

दशकूपसमः वापी दशवापी समो ह्रदः ।

दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ।।[११]

वृक्षः पृथिवीं रक्षति, प्राणवायुरूपेण निर्मलं अक्सीजननामकं वायुं प्रदाति। अतएव वृक्षो माता अस्ति। सः प्राणदाता, परिवेशदूषकपदार्थानां हन्ता च। जीवान् पृथिव्याः पुत्ररूपेण स्वीकृतम् अथर्ववेदे।[१२] पुत्रं प्रति मातुः दायित्वं पृथिवी सम्पादयति, सा हि पाल्यते पोष्यते च। पृथिवी अन्नादिपदार्थेभ्यो वृक्षोत्पादितफलेभ्यः प्राणवायुप्रदाय जीवान् रक्षति–

भूमे मातर्निधेहि मा भद्रया सुप्रतिष्ठितम्।[१३]

उपर्युक्तचर्चातो ज्ञायते यत् वैदिकवाङ्मये, विशेषतः अथर्ववेदे अनेकेषु मन्त्रेषु अनुकूलप्राकृतिकपरिवेशः, विश्वहितम्, राष्ट्रीयसंज्ञानम्, सौख्यमयजीवनयापनम् इत्यादयः विविधाः विषयाः दृग्गोचराः भवन्ति। प्रदर्शितमुदाहरणसमस्तं दिग्दर्शनमात्रम्। पर्यावरणे प्रतिकूले अथवा प्रदूषिते संवृत्ते प्राणिनां शारीरिकमानसिकक्षेत्रेषु यदा प्रभूता हानिर्जायते, तदा वैयक्तिकपारिवारिकसामाजिकक्षेत्रेष्वपि प्राणिनां विकासः प्रतिहतो भवति। अनुकूलं पर्यावरणं मानवस्य महोत्कर्षं साधयति, तज्जीवनं समुन्नयति पुष्णाति च। वैदिकवाणीषु सत्कर्मप्रवृत्त्या दुष्कर्मनिवृत्त्या च पर्यावरणस्य सुस्थत्वं सुविमलत्वं च निर्देशितम्। अतः समाजसम्बध्देषु विविधकार्येषु समुज्ज्वलां दिशां प्रति अस्माकं दृष्टिर्निधेया।

साम्प्रतिककाले पर्यावरणसंरक्षणस्य चिन्ता सर्वत्र अतीव तीव्रा दृश्यते। स्वच्छं पर्यावरणं मानवजीवनाय अपेक्षितं भवति। प्रदूषितं पर्यावरणं विनाशाय कल्पते। अद्यतने विज्ञानयुगे मनुष्यकृतदुष्कर्मकारणात् पर्यावरणे नाना प्रदूषणानि अनुभूयन्ते। वनानि उच्छिद्यन्ते, जलानि दूषितानि क्रियन्ते, वन्यजन्तवो निर्ममरूपेण हन्यन्ते, जलजीवाः गगनचारिणः पक्षिगणा अपि विनाशभूताः सञ्जायन्ते। नानारूपेण आणविकानामस्त्राणां परीक्षणादौ भूपृष्ठे समुद्रे वायुमण्डले च दुरवस्था सङ्घटते। नगरादिषु यानवाहनसञ्चारणजनितैः यन्त्रोद्योगकृतैश्च धूमैः कीटनाशकरासयनिकद्रव्यादिव्यवहारैश्च सलिलसमीरणादिषु प्रदूषणमुपजायते। वेदेषु अस्याः समस्यायाः निराकरणं वर्तते। पर्यावरणसुरक्षार्थं स्वास्थ्यसमृध्दिसाधनार्थं च अनेकान् देवान् प्रति स्तुतयो विहिताः संदृश्यन्ते। यदि वयं पर्यावरणसंरक्षणे वैदिकज्ञानेन सावधानाः भवेम तदैव अस्माकं जीवनं शान्तिमयं सुखमयञ्च भवितुं शक्नोति। अस्माकं मानसिकविकृतिकारणात् पर्यावरणस्य हानिर्भवति। अतएव अस्माभिः सर्वप्रथमं मनः शुध्दं कर्तव्यम्। यदि मनः निर्मलं भविष्यति, तदैव अस्माकं विचाराः शुध्दाः, चिन्तनं शुध्दञ्च भविष्यति येन पर्यावरणस्य विशुध्दि अवश्यमेव भविष्यति।

**सन्दर्भसूची -**

१. तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः, मुण्डकोपनिषद् १.१
२. अथर्ववेदसंहिता, १८.१.१७
३. तत्रैव, ३.७.५
४. ऋग्वेदसंहिता, १.२३.२०
५. अथर्ववेदसंहिता, ३.१३.५
६. तत्रैव, ३.१३.६
७. चरकसंहिता, २८.३
८. अथर्ववेदसंहिता, ४.१३.३
९. तैत्तिरीयसंहिता, १.८.१.१
१०. शतपथब्राह्मणम्, ५.२.३.३
११. मत्स्यपुराणम्, १५३.१२
१२. अथर्ववेदसंहिता, १२.१.१२
१३. तत्रैव, १२.१.६३

**सन्दर्भग्रन्थाः**


१. अथर्ववेदसंहिता, श्रीमत्सायणाचार्यविरचित-माधवीयवेदार्थप्रकाशसहिता, सम्पादकः- शंकर पाण्डुरंग पंडित, प्रथमभागतः चतुर्थभागपर्यन्तम्, कृष्णदास अकादमी, वाराणसी, १९८९।
२. ऋग्वेदसंहिता, सायणभाष्यसहिता, प्रथमो भागः, वैदिकसंशोधनमण्डलम्, पुना, १९७२
३. चरकसंहिता, ड. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी
४. श्रीमद्वाजसनेयिमाध्यन्दिनशतपथब्राह्मणम्, श्रीमत्सायणाचार्यविरचित वेदार्थप्रकाशसहिता, द्वितीयो भागः, नाग प्रकाशनम्, देहली, १९९०
५. ठाकुर, (डॉ०) सुशान्तकुमार, संस्कृतसाहित्ये पर्यावरणसमीक्षणम्, कला प्रकाशन, वाराणसी, २००८
६. उपाध्याय, आचार्य बलदेव, वैदिक-साहित्य और संस्कृति, शारदा मन्दिर, वाराणसी, १९६६
७. अग्रवाल, वासुदेव शरण (सम्पादकः) मत्स्यपुराणम्, आल इण्डिया काशीराज न्यास, वाराणसी, १९६३



ISSN : 2454-2881

# मनुस्मृतिशास्त्रानुसारं नारी

ड॰ नुरिमा इयाच्मिन

## भूमिका

भारतीयसंस्कृतिः सुप्राचीना इति कथनेनालम्। वैदिककालादारभ्य एतावत्पर्यन्तं सर्वेऽपि मनुष्याः सुसंस्कृतरूपेण जीवितुमिच्छन्ति। समाजेऽस्मिन् नारीणां कृते स्वतन्त्राधिकारो वर्तते। नारीति शब्दस्यार्थः एव स्पष्टयति यत् सा मानवानां कृते सर्वोत्तमा श्रेयस्करी भवति। शब्दस्यास्य व्युत्पत्तिः एवं भवितुं शक्यते–न अरि इति नारी। नारी सर्वथा पुरुषाणां कृते मित्रवत् कार्यं करोति। एतदभिलक्ष्य प्राचीनकाले भारतीयसमाजे नारीणामतिमहत्वपुर्णं स्थानमासीत् इति प्राचीनग्रन्थाः कथयन्ति। अस्य जगतः सर्जनात्मिका शक्तिरूपा विद्यते नारी। महामानवेन मनुना उक्तं यत् समाजे नारीणां स्थानं तथैव वर्तते देवालये यथा देवानां स्थानम्। तदर्थमेव समाजे नारीणां स्वतन्त्ररूपेण स्थितिर्भवेत् इति शास्त्रकाराणामभीप्सितम्। यत्र नारीणां सम्मानं न भवति तत्र देवानामपि वासो नैव भवतीति मनुस्तृतौ प्राप्यते। व्याप्यव्यापकसम्बन्धेन स्त्रीशब्दःनारीशब्दस्य पर्यायवाची भवति। अमरकोशे उक्तं यथा–

स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः।
प्रदीपदर्शिनी वामा वनिता महिला यथा।।[१]

अर्थात् स्त्री, अबला, योषा, नारी, सीमन्तिनी, वधूः, प्रदीपदर्शिनी, वामा, वनिता महिला इत्यादिभिः विशेषणैः सम्बोध्यन्ते। सा पत्नीरूपेण गृहस्वामिनीपदमलंकुर्वती, मातृरूपेण स्वकीयानां सन्ततीनां सुखसुविधार्थं सुतरां प्रयत्नवती भवति। सा यावत् पितृगृहे कन्यारूपेण निवसति तावत् सा मातृपितृभ्रातृरूपाणां कौटुम्बिकानां कृते हितचिन्तिका, विवाहोपरान्ते पतिगृहे श्वशुरश्वश्वोः सुखप्रदा सेविका च भवति। सा नारी ननान्दर्याः कृतेऽपि सम्राज्ञीरूपेण सुखप्रदायिका भवति। ऋग्वेदे उक्तं यथा[२]–

सम्राज्ञी श्वसुरे भव सम्राज्ञी श्वश्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु।।[२]

## उद्देश्यम्

अस्मिन् पत्रे नारीणामधिकारविषये चर्चा वर्तते। नार्यः कथं जीवन्ति, तासां स्थितिः कथमासीत्,

नारीणां प्राचीनकाले कीदृशोऽधिकारः वर्तते स्म एतत् सर्वम् अति समासेन अस्मिन् शोधपत्रे आलेचितम्। मनुस्मृतौ नारीणां विषये किं किमुक्तमस्ति तदत्र दर्शितम्। मानवाधिकारे नारीणां कुत्र कुत्र कथमधिकारो भवतीत्यपि विचार्यतेऽत्र।

**किं नाम मानवाधिकारः**

मानवाधिकारो अर्थात् मानवानाम् अधिकारः। मानवानां कुत्र कथमधिकारः भवतीति विषये यत् अधिकारः वर्तते तत् एव मानवाधिकारः। अर्वाचीनकाले विषयेऽस्मिन् महती चर्चा प्रायः परिलक्ष्यते। आन्तर्जातिकक्षेत्रे, राष्ट्रियक्षेत्रे च मानवाधिकारसंस्थाः बहव्यःसन्ति। सर्वासां संस्थानामयमेवाभिप्रायः यत् भोजने, निवासे, शिक्षाक्षेत्रे, जीवने, राजनैतिकक्षेत्रे, चिन्तने च इत्यादिषु विषयेषु मानवाधिकारस्य प्रसङ्गः आयाति। भारतराष्ट्रस्य संविधाने च विषयेऽस्मिन् प्रभुतं गुरुत्वं दीयते।

**नारीणामधिकारः**

वैदिककालादारभ्य भारतीयसमाजे नारीणां सामाजिकस्थितिरितिविषये मनः संयोग आसीदिति परिलक्ष्यते। स्त्रीरूपा एषा नारी न केवलं पुरुषस्य सहयोगिनीरूपे प्रतिष्ठिता अस्ति अपि तु धर्मपत्नीरूपेण सा मानवजीवनस्य तृतीयपुरुषार्थरूपस्य कामस्य विलासस्य च साधनभूतापि भवति। उक्तं यथा[३]

कार्येषु मन्त्री करणेषु दासी भोज्येषु माता शयनेषु रम्भा।
धर्मेऽनुकूला क्षमया धरित्री भार्या च षाड्गुण्यवतीह दुर्लभा।।

स्त्रीपुरुषौ गार्हस्थरूपस्य यानस्य द्वौ चक्रो स्तः। ऐकऽपि चक्रे निर्बले सति यानमग्रे गन्तुं न शक्नोति। अतः गार्हस्थयानं सुष्ठुरूपेण चालयितुं द्वयोः चक्रयोः सामञ्चस्यमावश्यकम्। वेदेषु नारीणां कृते स्वतन्त्ररूपेण सम्मानमासीत् इति गार्गी–मैत्रेयी–अपाला प्रभृतीनां विदुषीणां नारीणां प्रसङ्गादेव स्पष्टीभवति। नारीणां सम्मानं तथा अधिकारस्य विषये मनुस्मृतौ कथितमस्ति। यथा[४] –

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।

अस्मिन् प्रसंगे एतत् स्पष्टं जायते यत् अस्माकं भारते प्राचीनादेव कालाद् इदानीं पर्यन्तं नारीणां अधिकारो समाजेन स्वयमर्पित आसीत्। अस्य वैरूद्ध्येन नारीणां कथमधिकारः सूचितं भवति इति शङ्का जायते। स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन इति मनुवचनम्। अनया उक्त्या स्त्री तथा श्रीः इत्युभयोः मध्ये भेदो नास्ति। अर्थात् स्त्रियः गृहस्य श्रीः लक्ष्मीर्वा इति। स्त्रीहीनः गृहः श्रीहीनः भवति। मनुना उक्तं यथा[५] –

प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चनः।।


ISSN : 2454-2881

सन्तानपरिपालनं, तस्य परिपोषणं प्रतिदिनं समागतानामतिथीनां पूजनम् एतत् सर्वमपि कर्म स्त्रीणां भवति। स्त्रीणामधिकारो प्राचीनकाले कथमासीत् इति अत्र द्रष्टुं शक्यते। एतस्मिन् अधिकारे कथमपि ताः विच्युताः नैव भवेयुः। उक्तं यथा[६] –

उत्पादनमपत्यस्य जातस्य परिपालनम्।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम्।।

या स्त्री सन्तानलाभार्थं परपुरुषेण सह व्यभिचारे लिप्तं भवति सा लोकेऽस्मिन् निन्दनीया भवति तथा परजन्मे पतिलोकात् भ्रष्टं भवति। परपुरूषसमागमेन उत्पन्नसन्तानः धर्मसन्मतः न। धार्मिका स्त्री कदापि द्वितीयविवाहे लिप्तं न भवतीति उक्तं मनुना[७]।

या स्त्री गुणहीनपतिं त्यक्त्वा अन्य श्रेष्ठपुरुषं पतिरूपेण ग्रहणं करोति सा स्त्री समाजे निन्दनीया भवति तथा 'परपूर्वा' व्यभिचारिणी इत्युच्यते। या स्त्री परपुरुषेण व्यभिचारकार्ये लिप्तं भवति सा मृत्युर्पश्चात् शृगालरूपेण जन्मं लभते तथा कुष्ठादि रोगाक्रान्ता भवति इत्युक्तं मनुस्मृतौ[८]।

मनुना उक्तं यत् या नारी मनः, वाक् तथा शरीरं संयम्य पत्युः विरुद्धाचरणं न करोति मृत्युर्पश्चात् तस्याः परलोकप्राप्तिः भवति तथा इहलोके सज्जनैः सा पतिव्रता इत्युच्यते। मनुस्मृतौ विषयेऽस्मिन् उक्तं[९]–

पतिं या नाभिचरति मनोवाग्देहसंयुता।
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते।।

यत्र स्त्री सुखेन वसति तत्कुलस्य विनाशः कदापि नैव भवति। तदर्थमेव स्त्रीणामधिकारोऽयं सम्यग् भवेत् येन ताः सर्वदा सुखेन तिष्ठेयुः[१०]। प्रसंगेऽस्मिन् उक्तं मनुना–

शोचन्ति जामयो यत्र विनशत्यशु तत्कुलम्।
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वदा।।

अतः मनुः उक्तवान् यत् तेनैव कारणेन यः मनुष्यः सदा उन्नतिमिच्छति सः स्वस्य स्त्रीणां विशेषरूपेण आदरसत्कारं कुर्यात्[११]। भारतीयसमाजे इदानीमपि स्त्रीणामयमेव विशेषाधिकारो वर्तते। शय्या, आसनः, आभूषणप्रीतिः, कामः, क्रोधः, अनार्जवमं, द्रोहभावं, कुचर्यां च स्त्रीणां मनुसृष्टः साधारणधर्मः। उक्तं यथा–

शय्याऽसनमलङ्कारं कामं क्रोधमनार्जवम्।
द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत्।।

मनुमते स्त्रीणां कृते पृथक्यज्ञं पृथक्व्रतं तथा पृथक उपवासविधिं च नास्ति, पत्युः सेवया ताः स्वर्गं प्राप्नुवन्ति।[१२] या नारी पतिलोकं प्राप्तुमिच्छति सा पत्युः जीविते वा मृत्योः पश्चादपि किञ्चिदप्रियं

नाचरेत्[९]। पत्युः मृत्युर्पश्चात् स्त्रीणां किं कर्तव्यमिति विषये मनुना उक्तं[१३]

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
नतु नामापि गृह्नीयात् पत्यो प्रेते परस्य तु।।
आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म एक पत्नीनां काङ्क्षन्ती तमनुत्तमम्।।

**वेदाध्ययने स्त्रीणामधिकारः**

वैदिकवाङ्मयात् एतत् ज्ञायते यत् प्राचीनकाले शिक्षाक्षेत्रे सर्वेषामधिकारो आसीत्। ऋग्वेदे पुत्र इव पुत्री अपि शिक्षायाम् समानाधिकारं प्राप्नोति स्म। भारतीयसर्वकार इदानीमपि मानवाधिकारे स्त्रीणां शिक्षायाम् अधिकरूपेण गुरुत्वं ददाति। बृहदारण्यकोपनिषदि शिक्षायां विदुषीपुत्रीणामाकांक्षा अभिव्यक्ता। तैत्तिरीयोपनिषदः उपाख्याने प्रमाणितं यत् कन्याः धार्मिकशिक्षायामभिरुचिमुत्पादयति स्म। मन्त्रद्रष्टाऋषीणामिव घोषा, विश्ववारा, अपाला, लोपमुद्रादयः स्त्रिय अपि शिक्षाक्षेत्रे स्वदक्षतां प्रदर्शितवत्यः।

**स्त्रीणां स्वतन्त्रताधिकारः**

वेदकालिनसमाजे कन्याः स्त्रियश्च गृहे नैव आवध्दाः स्म। ताः मुक्तवातावरणे कालं नीतवत्यः इत्यनुमीयते सम्यक्। स्त्रियः वेशभूषायामाढ्यं प्रकटय्य लोकोत्सवेषु विवाहेषु गच्छन्ति स्म। स्त्रीणामस्वातन्त्र्यमेवमुक्तं मनुना।[१४]

पिता रक्षति कौमारे भर्ता रक्षति यौवने।
रक्षन्ति स्थविरे पुत्राः न स्त्री स्वातन्त्र्यमर्हति।।

वचनमेतत् प्रायः समालोचितमस्ति। न स्त्री स्वातन्त्रमर्हति इत्युतेः प्रसङ्गः तात्पर्यं च विभिन्नदृष्ट्या चर्चितव्ये। एतत् विचारणीयम् यत् किं आधुनिककाले प्रकृतरूपेण स्त्रीणाम् ईदृशी अवस्था वर्तते न वा। बालिका, युवती अथवा बृद्ध्या कस्यापि गृहकर्मे कापि स्वतन्त्रता नास्ति। स्त्रियः कदापि स्वातन्त्रं नैव भवति। बाल्ये पिता, यौवने पतिः तथा बृद्ध्यावस्थायां पुत्राधीनं भवति[१५]।

